102 (1.D)

Mahamahopadhyaya
HARAPRASAD SASTRI
M. A., C. I. E.

26, Pataldanga Street,
Calcutta 191

No 4. Śārṅgadhara-Saṃhitā. (A Collection by Śārṅgadhara).

Substance — Country-made paper.
No. of ~~Pages~~ leaves — 90.
Chapters — 32.
Lines in a page — 14.
Appearance — mouse-eaten in some places.
Character — Devanāgarī of 1830 A.D. (Samvat 1887).

23. vi. 19.

ŚĀRṄGADHARA, son of Dāmodara.

102. Sanskrit MS. in Devanāgarī characters, on country-made paper: written in A. D. 1830 (Saṃvat 1887): 10×5 in., 90 leaves.

Śārṅgadharasaṃhitā, a compendium of Materia Medica and Pharmacology, in 3 pts.

श्रीगणेशाय नमः॥ श्रियं स दद्याद्भवतां पुरारिर्यदङ्गतेजःप्रसरे भवानी॥ विराजते निर्म्मलचंद्रिका
यां महौषधीव ज्वलिता हिमाद्रौ॥१॥ प्रसिद्धयोगा मुनिभिः प्रयुक्ताश्चिकित्सकैर्ये बहुशोऽनुभूताः
॥ विधीयते शार्ङ्गधरेण तेषां सुसंग्रहः सज्जनरंजनाय॥२॥ ते त्वाहिन्नु पाऽकृतिसात्म्यजातिभे
देः समीक्ष्यातुरसर्वरोगान्॥ चिकित्सितं कर्षणबृंहणाख्यं कुर्वीत वैद्यो विधिवत्सुयोगैः॥३॥
दिव्यौषधीनां बहवः प्रभेदा वृंदारकाणामिव विस्फुरंति॥ ज्ञात्वेति संदेहमपास्य धीरैः संभाव
नीया विविधप्रभावाः॥४॥ स्वाभाविकागंतुककायिकांतर्ना रोगा भवेयुः किल कर्म्मदोषजाः॥
तच्छेदनार्थं दुरितापहारिणः श्रेयो मयात्र योगवरान्नियोजयेत्॥५॥ प्रयोगानागमात्सिद्धा
न्प्रत्यक्षादनुमानतः॥ सर्वलोकहितार्थाय वक्ष्याम्यति विस्तरात्॥६॥ अथ पाठक्रमणिका
॥ प्रथमं परिभाषा स्याद्भैषज्याख्यानकं तथा॥ नाडीपरीक्षादिविधिस्ततो दीपनपाचनं॥ त
तः कलादिकाख्यानमाहारादिगतिस्तथा॥ रोगाणां गणना चैव पूर्वखंडो यमीरितः॥
स्वरसः क्वाथफांटौ च हिमः कल्कश्च चूर्णकं॥ तथैव गुटिकालेहौ स्नेहः संधानमेव
च॥ धातुशुद्धी रसाश्चैव खंडोऽयं मध्यमः स्मृतः॥ स्नेहपानं स्वेदविधिर्वमनं च विरेच
नं॥ ततस्तु स्नेहबस्तिः स्यात्ततश्चापि निरूहणं॥ ततः स्यादुत्तरो बस्तिस्ततो नस्यविधि

घि १

म्नस्तं॥ धूमपानविधिश्चैव गंडूषादिविधिस्तथा॥ लेपादीनां विधिः ख्यातस्तथा शोणितविस्रु
तिः॥ नेत्रकर्मप्रकारश्च खंडे स्यादुत्तरस्त्वयं॥ द्वात्रिंशत्संमिताध्यायैर्युक्तेयं संहिता
स्मृताः॥ षड्विंशतिशतान्यत्र श्लोकानां गणितानि च॥ अथ मानपरिभाषा॥ न मानेन
विना युक्तिर्द्रव्याणां जायते क्वचित्॥ अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया॥ त्रसरे
णुर्बुधैः प्रोक्तस्त्रिंशता ३० परमाणुभिः॥ त्रसरेणुस्तु पर्य्यायनाम्ना वंशी निगद्यते॥ जा
लांतरगतैः सूर्यकरैर्वंशी विलोक्यते॥ ताभिः षष्ठतमो ६ भागः परमाणुः स कथ्यते॥ ष
ड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिः ६ श्च राजिका॥ तिसृभी ३ राजिकाभिश्च सर्षपः प्रो
च्यते बुधैः॥ यवोऽष्ट ८ सर्षपैः ८ प्रोक्तो गुंजा स्यात्तच्चतुष्टयं॥ षड्भिः ६ स्तु रक्तिकाभिः स्या
न्माषको हेमधानकौ॥ माषैश्चतुर्भिः ४ शाणः स्याद्धरणः स निगद्यते॥ टंकः स एव क
थितस्तद्द्वयं कोल उच्यते॥ क्षुद्रको वटकश्चैव द्रंक्षणः स निगद्यते॥ कोलद्वयं च कर्षः स्या मा·१६
त्स प्रोक्तः पाणिमाणिका॥ अक्षं पिचुः पाणितलं किंचित्पाणिश्च तिंदुकं॥ विडालप
दकं चैव तथा षोडशिका मता॥ करमध्यो हंसपदं सुवर्णं कवलग्रहः॥ उदुंबरं च पर्यायैः
कर्ष एव निगद्यते॥ स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा॥ शुक्तिभ्यां च पलं ज्ञेयं मु

मा०३२ मा·६४

श्रीराम०
शा० वैद्य०
२

२ ३ ४ ५ ६ ७ १२८

ष्टिरामंत्रंचचतुर्थिका॥प्रकुंचः षोडशीबिल्वं पलमेवात्र कीर्त्यते॥पलाभ्यां प्रसृतिर्ज्ञेया प्रसृ
तश्चनिगद्यते॥प्रसृतिभ्यामंजलिः स्यात्कुडवोर्द्धशरावकः॥ अष्टमानं च स ज्ञेयः कुडवा
भ्यांचमाणिका॥शरावोष्टपलं तद्वज्ज्ञेयमात्रविचक्षणैः॥शरावाभ्यांभवेत्प्रस्थश्चतुःप्रस्थै
स्तथाढकं॥भाजनंकंसपात्रंचचतुःषष्टिपलश्च सः॥चतुर्भिराढकैर्द्रोणः कलशो नल्व
णोर्मणः॥उन्मानंचघटोराशिर्द्रोणपर्यायसंज्ञिताः॥द्रोणाभ्यांशूर्पकुंभौचचतुःषष्टिशरा
वकः॥शूर्पाभ्यांचभवेद्द्रोणीवाहोगोणीचसास्मृता॥द्रोणीचतुष्टयंखारीकथिता सूक्ष्मबु
द्धिभिः॥चतुःसहस्रपलिकाषण्णवत्यधिका च सा॥पलानां द्विसहस्रं तु भारएकः प्रकीर्तितः
॥तुलापलशतंज्ञेयंसर्वत्रैवैषनिश्चयः॥माषटंको[illegible]बिल्वानि कुडवः प्रस्थ
स्यमाढकं[illegible]॥राशि[illegible]गोणीखारिकेतियथोत्तरचतुर्गुणाः॥गुंजादिमानमार
भ्ययावत्स्यात्कुडवस्थितिः॥द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतं॥प्रस्थादिमानमार
भ्यद्विगुणं तद्द्रवार्द्रयोः॥मानंतथातुलायास्तुद्विगुणं न क्वचित्स्मृतं॥मृद्वृक्षवेणुलोहादे
र्भांडंयच्चतुरंगुलं॥विस्तीर्णंचतथोच्चंचतन्मानंकुडवं वदेत्॥यदौषधंतुप्रथमं यस्य योग
स्यकथ्यते॥तन्नाम्नैवसयोगोहिकथ्यतेत्रविनिश्चयः॥ इति मागधपरिभाषा॥

प्र१०२४ मा४०९६ रा१६३८४ गो६५५३६ खा२६२१४४

चतुः
तद्

मान १

स्थितिर्नास्त्येव मात्रायाः कालमग्निं वयो बलं॥ प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रक
ल्पयेत्॥ यतो मंदाग्नयो ह्रस्वा हीनसत्वा नराः कलौ॥ अतस्तु मात्रा तद्योग्या प्रोच्यते सु
जनसंमता॥ यवो द्वादशभिः १२ गौरसर्षपैः प्रोच्यते बुधैः॥ यवद्वयेन २ गुंजा स्यात्त्रि ३
गुंजो वल्ल उच्यते॥ माषो गुंजाभिरष्टाभिः ८ सप्तभि ७ र्वा भवेत्क्वचित्॥ स्याच्चतुर्भिर्माष
कैः ४ शाणः स निष्कष्टंक ए वच॥ गद्याणो माषकैः षड्भिः ६ कर्षः स्याद्दश १० माषकः॥
चतुः ४ कर्षैः पलं प्रोक्तं दशशाण १० मितं बुधैः॥ चतुः ४ पलैश्च कुडवं प्रस्थाद्याः पूर्ववन्म
ताः॥ कालिंगमागधं चेति द्वि २ विधं मानमुच्यते॥ कालिंगान्मागधं श्रेष्ठमिति
मानविदो विदुः॥ इति कालिंगपरिभाषा॥ नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु
॥ विना विडंगकृष्णाभ्यां गुडधान्याज्यमाक्षिकैः॥ गुडूची कुटजो वासा कूष्मांडश्च श
तावरी॥ अश्वगंधा सहचरः शतपुष्पा प्रसारिणी॥ प्रयोक्तव्याः सदैवार्द्रा द्वि २ गुणा नै
व कारयेत्॥ शुष्कं नवीनं यद्द्रव्यं योज्यं सकलकर्मसु॥ आर्द्रं च द्वि २ गुणं युंज्यादेष सर्वत्र
निश्चयः॥ कालेऽनुक्ते प्रभातं स्यादंगेऽनुक्ते जटा भवेत्॥ मानेऽनुक्ते च साम्यं स्यात्पा
त्रेऽनुक्ते च मृन्मयं॥ द्रवाऽनुक्ते जलं ग्राह्यं तैलेऽनुक्ते तिलोद्भवं॥ एकमप्यौषधं यो
गे यस्मिन्यत्पुनरुच्यते॥ मानतो द्वि २ गुणं प्रोक्तं तद्द्रव्यं तत्त्वदर्शिभिः॥ चूर्णस्नेहा

(margin: पीपरी ६ — कटसरैया ५ — रूसा ६ — सौंफ — तरी)

श्रीराम०

शा० वै०

३

श्वेतचंदनं

सर्वौषेलाः प्रायशश्चंदनान्विताः॥ कषायलेपयोः प्रायो युज्यते रक्तचंदनं॥ गुण
हीनं भवेद्वर्षादूर्ध्वं तद्रूपमौषधं॥ मासद्वयात्तथा चूर्णं हीनवीर्यत्वमाप्नुते॥ हीनत्वं
गुटिकालेहौ लभेते वत्सरात्परं॥ हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकात्तथा॥ ओ
षध्यो लघुपाकाः स्युर्निर्वीर्या वत्सरात्परं॥ पुराणाः स्युर्गुणैर्युक्ता आसवा धातवो र
साः॥ व्याधेरयुक्तं यद्द्रव्यं गणोक्तमपि तत्त्यजेत्॥ अनुक्तमपि युक्तं च योजयेत्तत्र तद्बुधः॥
इति युक्तायुक्तविचारः॥ आग्नेया विंध्यशैलाद्याः सौम्यो हिमगिरिर्मतः॥ अतस्तदौ
षधानि स्युरनुरूपाणि हेतुभिः॥ अन्येष्वपि प्रशेलेति वनेषूपवनेषु च॥ गृह्णीयात्ता
नि सुमनाः शुचिः प्रातः सुवासरे॥ आदित्यसंमुखो मौनी नमस्कृत्य शिवं हृदि
॥ साधारणधराद्द्रव्यं गृह्णीयादुत्तराश्रितं॥ वल्मीककुत्सितानूपश्मशानोषरमा
र्गजाः॥ जंतुवह्निहिमव्याप्ता नौषध्यः कार्यसाधकाः॥ शरद्यखिलकार्यार्थं ग्रा
ह्यं सरसमौषधं॥ विरेकवमनार्थं च वसंतांते समाहरेत्॥ अतिस्थूलजटा याः
स्युस्तासां ग्राह्यास्त्वचो बुधैः॥ गृह्णीयात्सूक्ष्ममूलानि सकलान्यपि बुद्धिमान्॥
ग्रीष्मे मंजरिकाग्रेषु वर्षासु दलचर्मणि॥ वसंते मूलमाश्रित्य वल्लीनां रससंभवेति

देशोल्पवारिद्रुनगो जांगलः स्वल्परोगदः। आनूपो विपरीतोस्मात्समः साधारणः स्मृतः १ [illegible] देशलक्षणे ५

३

पाठांतरं॥ न्यग्रोधादेस्त्वचोग्राह्याःसारंस्याद्बीजकादितः॥ तालीसादेश्चपत्राणिफलं
स्यात्त्रिफलादितः॥ इतिश्रीदामोदरसूनुनाशार्ङ्गधरेणविरचितायांसंहितायांसू
त्रस्थानेपरिभाषाध्यायः १॥ भेषज्यमभ्यवहरेत्प्रभातेप्रायशोबुधः॥ कषायांश्चवि
शेषेणतत्रभेदस्तुदर्शितः॥ ज्ञेयापंचविधःकालोभेषज्यग्रहणेनृणां॥ किंचित्सूर्योद
येजातेतथादिवसभोजने॥ सायंतनेभोजनेचमुहुश्चापितथानिशि॥ प्रायःपित्त
कफोद्रेकेविरेकवमनार्थयोः॥ लेखनार्थंचभेषज्यंप्रभातेतत्समाहरेत्॥ एवंस्यात्प्र
थमःकालोभेषज्यग्रहणेनृणां॥ इतिप्रथमःकालः॥ भेषज्यंविगुणेऽपानेभोजनाग्रेप्रश
स्यते॥ अरुचौचित्रभोज्यैश्चमिश्रंरुचिरमाहरेत्॥ समानवातेविगुणेमंदेप्यग्नावग्नि
दीपनं॥ दद्याद्भोजनमध्येचभेषज्यंकुशलोभिषक्॥ व्यानकोपेचभैषज्यंभोजनांते
समाहरेत्॥ हिक्काक्षेपककंपेषुपूर्वमंतेचभोजनात्॥ एवंद्वितीयःकालश्चप्रोक्तोभे
षज्यकर्मणि॥ इतिद्वितीयःकालः॥ उदानेकुपितेवातेस्वरभंगादिकारिणि॥ ग्रास
ग्रासांतरेदेयंभेषज्यंसांध्यभोजने॥ प्राणेप्रदुष्टेसांध्यस्यभक्तस्यांतेचदीयते॥ औ
षधंप्रायशोधीरैःकालोयंस्यात्तृतीयकः॥ इतितृतीयःकालः॥ मुहुर्मुहुश्चतृ

लेखनार्थे ६

सायंकाले २

कूरप्रन्हे १४

सायंभक्तस्यांते दद्यात् २

वमन १ ~~गरमी~~ शरीरउष्मार्थे २

विष:

गलस्थाई २

छर्दिहिक्काश्वासगरेषु च ॥ सान्नं च भेषजं देयमिति कालश्चतुर्थकः ॥ इति चतुर्थः
कालः ॥ ऊर्ध्वजत्रुविकारेषु लेखने बृंहणे तथा ॥ पाचने शमने देयमनन्नं भेषजं
निशि ॥ इत्ययं पंचमः कालः प्रोक्तो भेषजपद्धतौ ॥ इति पंचमः कालः ॥ द्रव्ये रसो गुणो
वीर्यं विपाकः शक्तिरेव च ॥ संबंधेन क्रमादेताः पंचावस्थाः प्रकीर्तिताः ॥ मधुरोऽम्लः
पटुश्चैव कटुस्तिक्तः कषायकः ॥ इत्येते षड्रसास्ते तु नानाद्रव्यसमाश्रिताः ॥ धराम्बु
न्हमानलजलज्वलनाकाशमारुतैः ॥ वाय्वग्निक्ष्मानिलैर्भूतद्वयै रसभवः क्र
मात् ॥ इति रसाः ॥ गुरुः स्निग्धश्च तीक्ष्णश्च रूक्षो लघुरिति क्रमात् ॥ धराम्बुव
ह्निपवनव्योम्नां प्रायो गुणाः स्मृताः ॥ एष्वेवांतर्भवंत्यन्ये गुणेषु गुणसंचयाः
॥ इति गुणाः ॥ वीर्यमुष्णं तथा शीतं प्रायशो द्रव्यसंश्रयं ॥ यत्सर्वमग्नीषोमीयं दृ
श्यते भुवनत्रयं ॥ अत्रैवांतर्भविष्यंति वीर्याण्यपराणि यानि च ॥ इति वीर्यं ॥ मिष्टः प
टुश्च मधुरमम्लोऽम्लं पच्यते रसः ॥ कषायकटुतिक्तानां पाकः स्यात्प्रायशः कटुः ॥
मधुराज्जायते श्लेष्मा पित्तमम्लाच्च जायते ॥ कटुकाज्जायते वायुः कर्माण्येतानि पा

जठराग्निनायोगाद्यदुदेति रसांतरं ॥ रसानां परिणामांते स विपाक इति स्मृतः ॥ त्रिधा वि
पाको द्रव्यस्य मध्वम्लकटुकात्मकः ॥ २

लवण ५

अन्नरहितं २

रसा ५

कत्तः॥ इति विपाकः॥ प्रभावस्तु यथा धात्री लकुचस्य फलादिभिः॥ समापि कुरुते दोषः
त्रितयस्य विनाशनं॥ क्वचित्तु केवलं द्रव्यं कर्म कुर्यात्स्वभावतः॥ ज्वरं हंति शिरोवद्धा
सहदेवीजटा यथा॥ इति प्रभावः॥ क्वचिद्रसो गुणो वीर्यं विपाकः शक्तिरेव च॥ कर्म
स्वं स्वं प्रकुर्वीत द्रव्यमाश्रित्य ये स्थिताः॥ इति द्रव्यरसगुणवीर्यविपाकप्रभावाः॥
चयप्रकोपशमा यस्मिन्दोषाणां संभवेदिह॥ ऋतुषड्डं तत्र स्यात्ते रवेराशिसंक्र
मात॥ ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृण्मिथुनकर्कयोः॥ सिंहकन्ये स्मृता वर्षा
तुलावृश्चिकयोः शरत्॥ धनुर्मकरहेमंतो वसंतः कुंभमीनयोः॥ ग्रीष्मे संचीय
ते वायुः प्रावृट्काले प्रकुप्यति॥ वर्षायां चीयते पित्तं शरत्काले प्रकुप्यति॥ हेमंते
चीयते श्लेष्मा वसंते च प्रकुप्यति॥ प्रायेण प्रशमं याति स्वयमेव समीरणः॥ शर
त्काले वसंते च पित्तं प्रावृड्नो कफः॥ कार्तिकस्याहिनान्यष्टौ अष्टावग्रहणस्य च
॥ यमदंष्ट्रा समाख्याता अल्पाहारो भवेत्ततः॥ चयकोपशमान्दोषान्विहारा
हारसेवनैः॥ समानैर्यान्त्यकालेपि विपरीतैर्विपर्ययं॥ लघुरूक्षमिताहारो

६ =

तिशीतात्श्रमात्तथा प्रद्वेषेकामशोकाभ्यांभीचिंतारात्रिजागरैः॥ अभिघाताल्पपां
गाहात्जीर्णेऽन्नेधातुसंक्षयात्॥ वायुःप्रकोपंयात्येभिःप्रत्यनीकैश्चशाम्यति॥ विदाहिकटु
काऽम्लोष्णभोज्यैरत्युष्णसेवनात्॥ मध्यान्हेक्षुत्तृषारोधाजीर्यत्यन्नेऽर्द्धरात्रिके॥ पित्तंप्र
कोपंयात्येभिःप्रत्यनीकैश्चशाम्यति॥ मधुरस्निग्धशीतादिभोज्यैर्दिवसनिद्रया॥ मं
देऽग्नौचप्रभातेचभुक्तमात्रेतथाऽश्रमात्॥ श्लेष्माप्रकोपमायातिप्रत्यनीकैश्चशाम्यति
॥ इतिशार्ङ्गधरेणविरचितेस्वत्रस्थानेभैषज्यकालोक्तिद्रव्यरसगुणवीर्यविपाकप्रभावो
क्तिक्रमन्तुभैषज्याख्यानाध्यायः २॥ आदौसर्वेषुरोगेषुनाडिकामूत्रयोस्तथा॥ परिज्ञानंका
रयेद्वैद्यःपश्चाद्रोगंचिकीर्षयेत्॥ करस्यांगुष्ठमूलेयाधमनीजीवसाक्षिणी॥ त
च्चेष्टयासुखंदुःखंज्ञेयंकायस्यपंडितैः॥ नाडीधत्तेमरुत्कोपेजलौकासर्पयोर्गतिं॥ कुलिं
गकाकमंडूकगतिंपित्तस्यकोपतः॥ हंसपारावतगतिंधत्तेश्लेष्मप्रकोपतः॥ लावति
त्तिरवर्त्तीरगमनंसन्निपाततः॥ कदाचिन्मंदगमनाकदाचिद्वेगवाहिनी॥ द्विदोषकोप
तोज्ञेयाहंतिचस्थानविच्युता॥ स्थित्वास्थित्वाचलतियासास्मृताप्राणनाशिनी॥
अतिक्षीणाचशीताचजीवितंहंत्यसंशयः॥ ज्वरकोपेनधमनीसोष्मावेगवतीभवेत्॥

चटकं ५

वेटर ३

लावायन्ही ४

अस्त्रकू पूर्णा भवेत्कोष्मा गुर्वी सा ऽऽमा गरीयसी ॥ लघ्वी वहति दीप्ताग्नेस्तथा
वेगवती मता ॥ सुखितस्य स्थिरा ज्ञेया तथा बलवती स्मृता ॥ चपला क्षुधित
स्य स्यात्तृप्तस्य वहति स्थिरा ॥ इति नाडीपरीक्षा ॥ स्वप्ने शुभान्स्नानं...श्च रक्तोत्
ष्माम्बरावृतान् ॥ व्यंगांश्च विकृतान्कृष्णान्सपाशान्सायुधानपि ॥ बध्नतो
निघ्नतश्चापि हन्ति एणां दिशमाश्रितान् ॥ महिषोष्ट्रखरारूढान्स्त्रीपुंसो
यस्तु पश्यति ॥ स स्वस्थो लभते व्याधिं रोगी यात्येव पंचताम् ॥ अधो यो निपत
त्युच्चात् जले ऽग्नौ वा विलीयते ॥ श्वापदैर्हन्यते यो ऽपि मत्स्याद्यैर्गिलितो भवेत्
॥ यस्य नेत्रे विलीयेते दीपो निर्वाणतां व्रजेत् ॥ तैलं सुरां पिबेद्वापि लोहं वा ल
भेत तिलान् ॥ पक्वान्नं लभते ऽश्नाति विशेत्कूपांश्च मानवः ॥ स स्वस्थो ल
भते रोगं रोगी यात्येव पंचताम् ॥ दुःस्वप्नान्येवमादीनि दृष्ट्वा ब्रूयान्न कस्य
चित् ॥ स्नानं कुर्यादुषस्येव दद्याद्धेम तिलान्यपि ॥ पठेत्स्तोत्राणि देवानां

प्रातःकाले २

श्रीराम॰
शा॰ वै॰

स्वप्नजलउत्तर पं॰ ३

रात्रौ हेवालयेविसेत॥ कृत्वेवंत्रिदिनंमर्त्योऽस्वमालारिमुच्यते॥ स्वप्नेभुंयःसुरा
न्नंपायसंजीविनोऽस्थिदंसंदिजा॥ गोसुंमिकाग्निनीर्याणिपश्येसुखमाप्नुया
त॥ तीर्त्वाकूलंधनीराशिंजित्वाशत्रुगणंनृपा॥ आरुह्यसौधंमौशैलंकेवालाभुखीभ
वेत॥ शुक्लपुष्पाणिवासांसिमांसमत्स्यान्फलान्यपि॥ प्राप्याऽऽत्तुरःसुखीभूयात्स्व
स्थोधनमवाप्नुयात॥ अगम्यागमनंलेपोविष्टयारुदितंमृतिः॥ आममांसाऽऽश
नंस्वप्नेधन्यारोग्यानयेदिदुः॥ जलौकाभ्रमरीसर्पोमक्षिकावापिदंशयेत॥ रो
गीसन्नूपाहानोगपः स्वस्थोधनमवाप्नुयात॥ इतिस्वप्नलक्षणानि॥ दूताः स्वजा
तयोऽव्यंगाः पटवोनिर्मलांवराः॥ सुखिनोऽश्ववृषारूढाः शुक्लपुष्पफलेधृताः॥
सुजातयःसुचेष्टाश्चसजीवदिशिसंगताः॥ भिषजंसमयेप्राप्तारोगिणःसुख
हेतवे॥ यस्यांप्राणमरुद्यातिसानाडीजीवसंज्ञिता॥ इतिलक्षणानिदूतीनि॥ चिकि
त्सारोगिणःकर्त्तुंगच्छतोभिषजःशुभं॥ यात्रायांसोम्यशकुनंप्रतीतंनसुखावऽऽ
वहं॥ वेधालायायद्नेस्यगच्छतोरोगिनःकृते॥ नशुभंसोम्यशकुनंप्रतीतंच

शीतलशकुनंचंद्रमये २

रोगिणः ४
कार्यमोसर ५

नाडिकायां ३

रोगीसुप्यिमयं २

संज्ञा ६ सौफ २४

सुखावहं ॥ इति शकुनं ॥ निज प्रकृति वर्णाभ्यां युक्तः सत्त्वेन संयुतः ॥ चिकित्स्यो भिषजो नी
रोगी वै घृणिको जितेंद्रियः ॥ इति रोगीलक्षणं ॥ इति श्रीदामोदरसूनुना शार्ङ्गधरेण विर
चितायां संहितायां सूत्रस्थाने नाडीपरीक्षा स्वप्नलक्षणदूतशकुनरोगीलक्षणना
ख्याध्यायः ३ ॥ पचेन्नामं वह्निकृत् दीपनं तद्यथा मिसि ॥ पचत्यामं न वह्निं च कुर्याद्य
त्तद्धि पाचनं ॥ नागकेशरवद्विद्याच्चित्रो दीपनपाचनः ॥ न शोधयति न दोषान् समा
न्नोदीरयत्यपि ॥ समीकरोति विषमान् शमनं तद्यथामृता ॥ कृत्वा पाकं मला
नां यद्भित्त्वा बंधमधो नयेत् ॥ तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी ॥ पक्तव्यं
यदपक्वैव श्लिष्टं कोष्ठे मलादिकं ॥ नयत्यधः स्रंसनं तद्यथा स्यात्कृतमालकः
॥ मलादिकमबद्धं यद्बद्धं वा पिंडितं मलैः ॥ भित्वाधः पातयति तद्भेदनं कटुकी य
था ॥ विपक्वं यदपक्वं वा मलादि द्रवतां नयेत् ॥ रेचयत्यपि तज्ज्ञेयं रेचनं त्रिवृ
ता यथा ॥ अपक्वं पित्तश्लेष्माणौ च यद्बलादूर्ध्वं नयेत्तु यत् ॥ वमनं तद्धि विज्ञेयं मदन ह २
स्य फलं यथा ॥ स्थानाद्बहिर्नयेदूर्ध्वमधो वा मलसंचयं ॥ देहसंशोधनं तत्स्या
द्देवदालीफलं यथा ॥ श्लेष्माणं कफादिकान्दोषानुन्मूलयति यद्बलात् ॥

नागकेशरि ५
चित्ता ५
गुडुचि ६
हरय ७
आमिलतास ८
कालीनिशोत ४
मयनफल २
वंदाव १

जवाखार १ मिरिच २ शिलाजित ३

वच २ धान्यपत्र २

छेदनं तद्यथा क्षारा मरिचानि शिलाजतु ॥ धातून्मलान्वा देहस्य विशोष्योल्ले
खयेच्च यत् ॥ लेखनं तद्यथा क्षौद्रं नीरमुष्णं वचा यवाः ॥ दीपनं पाचनं यत्स्यादु
ष्णत्वाद्द्रवशोषकं ॥ ग्राहि तच्च यथा शुंठी जीरकं गजपिप्पली ॥ रौक्ष्याच्छैत्यात्क
षायत्वाल्लघुपाकाच्च यद्भवेत् ॥ वातकृत्स्तंभनं तत्स्याद्यथा वत्सकटुंटुकौ ॥
रसायनं च तज्ज्ञेयं यज्जराव्याधिनाशनं ॥ यथाऽमृता रुदंती च गुग्गुलुश्च हरीत
की ॥ यस्माद्व्यवायी भवेत्स्त्रीषु हर्षो वाजिकरं च यत् ॥ यथा नागबलाद्याः स्युर्बीजं च
कपिकच्छुजं ॥ यस्माच्छुक्रस्य वृद्धिः स्याच्छुक्रलं च तदुच्यते ॥ यथाऽश्वगंधा मुश
ली शर्करा च शतावरी ॥ दुग्धं माषाश्च भल्लातफलमज्जाऽमलानि च ॥ प्रव
र्तकानि कथ्यंते जनकानि च रेतसः ॥ प्रवर्त्तनी स्त्री शुक्रस्य रेचनं बृहतीफलं ॥
जातिफलं स्तंभकं स्यात्कालिंगं च यकादि च ॥ देहस्य सूक्ष्मछिद्रेषु विशेद्यत्सू
क्ष्ममुच्यते ॥ तद्यथा सैंधवं क्षौद्रं निंबतैलं रुबूद्भवं ॥ पूर्वं व्याप्याखिलं कायं ततः
पाकं स गच्छति ॥ व्यवायि तद्यथा भंगा फेनं चाहिसमुद्भवं ॥ संधिबंधांस्तु शि

केवाचकरवीज ६

जायफल ३

सोंठि १ जीरा २
गजपिप्पली ३ । ३

कोरइया १ शाल
पाठि २ । ४

खिरयी विशेषः
ककइकरवीज ९
भेलावाकर फल ५
अवरा ५
भटकटइयाकर फल ४

तरकज २ नीवकरतेल २ रेंडीकरतेल २

भाग १ मुर २ अफीम १

उपारी१ कोरव१

पिलान्यत्करोति विकाशितत् ॥ विश्लेष्योजश्च धातुभ्यो यथा क्रमुककोद्रवाः ॥ बुद्धिं
लुंपति यद्द्रव्यं मदकारि तदुच्यते ॥ तमोगुणप्रधानं च यथा मद्यसुरादिकं ॥ व्यवायि
च विकाशि स्यात्सूक्ष्मं छेदि मदावहं ॥ आग्नेयं जीवितहरं योगवाहि स्मृतं विषं ॥ नि
जवीर्येण यद्द्रव्यं श्रोतोभ्यो दोषसंचयं ॥ निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा ॥
पैछिल्याद्गौरवाद्द्रव्यं रुद्ध्वा रसवहाः सिराः ॥ धत्ते यद्गौरवं तत्स्यादभिष्यंदि यथा द
धि ॥ इति श्री दामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां दीपनपाचनादि
गणोक्तिविधिर्द्ध्यायः ४ ॥ कलाः सप्ताशयाः सप्त धातवः सप्त तन्मलाः ॥ सप्तो
पधातवः सप्त त्वचः सप्त प्रकीर्तिताः ॥ त्रयो दोषा नव शतं स्नायूनां संधयस्तथा ॥
दशाधिकं द्विशतमस्थ्नां च त्रिशतं मतं ॥ सप्तोत्तरं मर्मशतं सिराः सप्तशतं तथा ॥
चतुर्विंशतिराख्याता धमन्यो रसवाहिकाः ॥ मांसपेश्यः समाख्याता नृणां
पंचशतं बुधैः ॥ स्त्रीणां च विंशत्यधिकाः कंडराश्चैव षोडश ॥ नृदेहे दश रंध्रा
णि नारीदेहे त्रयोदश ॥ एतत्समासतः प्रोक्तं विस्तरेणाधुनोच्यते ॥ मांसासृ
कमेदसां तिस्रो यकृत्प्लीह्नोश्चतुर्थिका ॥ पंचमी च तथांत्राणां षष्ठी चाग्निध

शारीरमध्ये कला

दधिकेवलं५

आरगतं१

पहले तैसेग ... भागमे ॥ पीछे ... हिराभागमे

वीर्य ११ छाति

रामताः ॥ रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः ॥ श्लेष्माशयः स्यादुरसि तस्मादा
माशयस्त्वधः ॥ ऊर्ध्वमग्न्याशयो नाभेर्वामभागे व्यवस्थितः ॥ तस्योपरि तिलं ज्ञेयं त
दधः पवनाशयः ॥ मलाशयस्त्वधस्तस्य वस्तिर्मूत्राशय स्मृताः ॥ [illegible]
जीवरक्ताशयमुरो ज्ञेयाः सप्ताशयास्त्वमी ॥ पुरुषेभ्योऽधिकाश्चान्ये नारीणामा
शयास्त्रयः ॥ धरा गर्भाशयः प्रोक्तः स्तनौ स्तन्याशयो मतौ ॥ रसासृङ्मांसमे
दोऽस्थिमज्जाशुक्राणि धातवः ॥ जायंतेऽन्योन्यतः सर्वे पाचिताः पित्ततेजसा ॥ जिह्वा
नेत्रकपोलानां जलं पित्तं च रंजकं ॥ कर्णविड् रसना दंतकक्षामेढ्रादिजं मलं
॥ नखनेत्रमलं वक्त्रे स्निग्धत्वं पिडकास्तथा ॥ जायंते सप्तधातूनां मलान्येता
न्यनुक्रमात् ॥ स्तन्यं रजश्च नारीणां काले भवति गच्छति ॥ शुद्धमांसभवः स्नेहो
यस्या संप्रोक्ता ते वसा ॥ स्वेदो दंतास्तथा केशास्तथैवौजश्च सप्तमं ॥ ओजः सर्वश
रीरस्थं स्निग्धं शीतं स्थिरं सितं ॥ सोमात्मकं शरीरस्य बलपुष्टिकरं मतं ॥ इ
ति धातुभवा ज्ञेया एताः सप्तोपधातवः ॥ ज्ञेयाऽवभासिनी पूर्वं सिध्मस्थानं च

सा मता॥ द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः॥ श्वेता तृतीया संख्याता
स्थानं चर्मदलस्य सा॥ ताम्रा चतुर्थी विज्ञेया किलासश्वित्रभूमिका॥ पंचमी वेदिनी
ख्याता सर्वकुष्ठोद्भवा ततः॥ विख्याता लोहिता षष्ठी ग्रंथिगंडापचीस्थितिः॥ स्थू
ला त्वक् सप्तमी ख्याता विद्रध्यादेः स्थितिश्च सा॥ इति सप्तत्वचः प्रोक्ताः स्थूला व्री
हिद्विमात्रया॥ वायुः पित्तं कफो दोषा धातवश्च मला स्तथा॥ तत्रापि पंचधा ख्या
ताः प्रत्येकं देहधारणात्॥ पवनस्तेषु बलवान् विभागकरणान्मतः॥ रजोगुणमयः सू
क्ष्मः रूक्षः शीतो लघुश्चलः॥ मलाशये चरेत्कोष्ठे वह्निस्थाने तथा हृदि॥ कंठे स
र्वांगदेशेषु वायुः पंचप्रकारतः॥ अपानः स्यात्समानश्च प्राणोदानौ तथैव च॥
व्यानश्चेति समीरस्य नामान्युक्तान्यनुक्रमात्॥ पित्तमुष्णं द्रवं पीतं नीलं स
त्वगुणोत्तरं॥ कटुतिक्तरसं ज्ञेयं विदग्धं चाम्लतां व्रजेत्॥ अग्न्याशये भ
वेत्पित्तमग्निरूपं तिलोन्मितं॥ त्वचि कांतिकरं ज्ञेयं लेपाभ्यंगादिपाचकं॥
द्रश्यं यकृति यत्पित्तं तद्रसं शोणितं नयेत्॥ यत्पित्तं नेत्रयुगले रूपदर्शनकारितत्॥

यत्पित्तं हृदये तिष्ठेन्मेधाप्रज्ञाकरं च तत् ॥ पाचकं भ्राजकं चैव रंजकालोचके तथा
॥ साधकं चेति पंचैव पित्तनामान्यनुक्रमात् ॥ कफः स्निग्धो गुरुः श्वेतः शीतलश्च पिच्छिल
स्तथा ॥ तमोगुणाधिकं स्वादुर्विदग्धो लवणो भवेत् ॥ कफश्चामाशये मूर्ध्नि कंठे हृदि च सं
धिषु ॥ तिष्ठन् करोति देहस्य स्थैर्यं सर्वांगपाटवं ॥ क्लेदनः स्नेहनश्चैव रसनश्चावलंब
नः ॥ श्लेष्मणश्चेति नामानि कफस्योक्तान्यनुक्रमात् ॥ स्नायवो बंधनं प्रोक्ता देहे मां
सास्थिमेदसां ॥ संधयश्चांगसंधाना देहे प्रोक्ताः कफान्विताः ॥ आधारश्च तथा सा
रः काये स्युस्त्रिविधा विदुः ॥ मर्माणि जीवाधाराणि प्रायेण मुनयो जगुः ॥ संधि
बंधनकारिरोपाहोषधातुवहाः सिराः ॥ धमन्यो रसवाहिन्यो धमंति पवनं तनौ ॥ मां
सपेश्यो बलाय स्युरवष्टंभाय देहिनां ॥ प्रसारणाकुंचनयोरंगानां कंडरा मताः ॥ ना
सानयनकर्णानां द्वे द्वे रंध्रे प्रकीर्तिते ॥ मेहनापानवक्त्राणामेकैकं रंध्रमुच्यते ॥
दशमं मस्तके चोक्तं रंध्राणीति नृणां विदुः ॥ स्त्रीणां त्रीण्यधिकानि स्युस्तनयोर्गर्भव
र्त्मनः ॥ सूक्ष्मच्छिद्राणि चान्यानि मतानि त्वचि जन्मिनां ॥ तद्वामे फुफुसं प्लीहा द
क्षिणांगे यकृन्मतं ॥ उदानवायोराधारः फुफुसं प्रोच्यते बुधैः ॥ रक्तवाहि

लासा २

फुफुसरी २

धरामूलं प्लीहाख्यातो महर्षिभिः॥ यकृद्रंजकपित्तस्य स्थानं रक्तस्य संश्रयं॥ ज
लवाहिशिरामूलं तृष्णाछादनकं तिलं॥ वृक्कौ पुष्टिकरौ प्रोक्तौ जठरस्य च मेदसः
॥ वीर्यवाहिशिराधारौ वृषणौ पौरुषावहौ॥ गर्भाधानकरं लिंगमयनं वीजमू
त्रयोः॥ हृदयं चेतनास्थानमोजसश्चाश्रयं मतं॥ शिराधमन्यो नाभिस्थाः स
र्वा व्याप्य स्थितास्तनुं॥ तिष्ठंति चानिशं वायोः संयोगात्सर्वधातुभिः॥ नाभि
स्थः प्राणपवनः स्पृष्ट्वा हृत्कमलांतरं॥ कंठाद्बहिर्विनिर्याति पातुं विष्णु
पदामृतं॥ पीत्वा चांबरपीयूषं पुनरायाति वेगतः॥ प्रीणयन्देहमखिलं
जीवयन्जठरानलं॥ शरीरप्राणयोरेवं संयोगादायुरुच्यते॥ कालेन तद्वि
योगाच्च पंचत्वं कथ्यते बुधैः॥ न जंतुः कश्चिदमरः पृथिव्यां जायते क्वचि
त्॥ अतो मृत्युरवार्यः स्यात्किंतु रोगान्निवारयेत्॥ जाप्यत्वं याति साध्य
स्तु याप्यो गच्छत्यसाध्यतां॥ जीवितं हंत्यसाध्यस्तु नरस्याऽप्रतिकारिणः॥

श्रीराम॰
शा॰ वै॰
१०

अतोरूग्म्यस्तत्कुर्यान्नरः कर्मविपाकवित् ॥ धर्मार्थकाममोक्षाणां शरीरं साधनं यतः ॥
धातवस्तन्मला दोषा नाशयंत्यसमास्तु तं ॥ समाः सुखाय विज्ञेया बलायोपचयाय च ॥ इ
ति कलादिकथनं ॥ जगद्योनेरनिच्छस्य चिदानंदैकरूपिणः ॥ पुंसोस्ति प्रकृतिर्नित्या प्रति
च्छायेव भास्वतः ॥ अचेतनापि चेतन्ययोगेन परमात्मनः ॥ अकरोद्विश्वमखिलं अनि
त्यं नाटकाकृतिः ॥ प्रकृतिर्विश्वजननी पूर्वं बुद्धिमजीजनत् ॥ इच्छामयी महद्रूपा म
हंकारस्ततोऽभवत् ॥ त्रिविधः सोपि संयातः रजः सत्वतमो गुणैः ॥ तस्मात्सत्वरजो
युक्तादिंद्रियाणि दशाभवन् ॥ मनश्च जातं तान्या— श्रोत्रत्वक्नयने तथा ॥ जिव्हाघ्रा
णं वचोहस्तपादोपस्थगुदानि च ॥ पंचबुद्धींद्रियाण्याहुः श्रोत्रकादीनीतराणि च ॥ क
र्मेंद्रियाणि पंचैव कथ्यंते स्तन्मबुद्धिभिः ॥ तमः सत्वगुणोत्कृष्टादहंकारादयोऽभ
वत् ॥ तन्मात्रा पंचकं तस्य नामान्युक्तानि सूरिभिः ॥ शब्दतन्मात्रकं स्पर्शतन्मा
त्रं रूपमात्रकं ॥ रसतन्मात्रकं गंधतन्मात्रं चेति तद्विदुः ॥ तन्मात्रपंचकात्तस्मात्सं
जातं भूतपंचकं ॥ व्योमानिलाऽनलजलजन्होणीद पंचतन्मतं ॥ शब्दः स्पर्शश्च रू
पं च रसो गंधा व्योमक्रमात् ॥ तन्मात्राणां विशेषास्युः स्थूलभावमुपागताः ॥ बुद्धीं

द्रियाणं पंचैव शब्दाद्या विषया मताः॥ कर्मेंद्रियाणं विषया भाषादानविहारिताः॥ आ
नंदोत्सर्गकौ चैव कथितास्तत्वदर्शिभिः॥ प्रधानं प्रकृतिः शक्तिर्नित्या वा विकृतिस्तथा॥
एतानि तस्या नामानि शिवमाश्रित्य या स्थिता॥ महानऽहंकृतिः पंचतन्मात्राणि प
प्रकृतयः॥ प्रकृतिर्विकृतिश्चैव सप्तेता विबुधा जगुः॥ दशेन्द्रियाणि चित्तं च महाभूता
नि पंच च॥ विकाराः षोडश ज्ञेयाः सर्वव्याप्य जगत्स्थिताः॥ एवं चतुर्विंशतिभिस्तत्वैः
सिद्धं वपुर्नृणां॥ जीवात्मा नियतो नित्यो वसति स्वांतरूतवान्॥ स देही कथ्यते पाप
पुण्यदुःखसुखादिभिः॥ व्याप्तो वध्यश्च मनसा कृत्रिमैः कर्मबंधनैः॥ कामक्रोधौ लो
भमोहौ अहंकारश्च पंचमः॥ दशेन्द्रियाणि बुद्धिश्च तस्य बंधाय देहिनः॥ प्राप्नोति बं
धमज्ञानादात्मज्ञानाच्च मुच्यते॥ तद्दुःखे योगकृद्व्याधिरारोग्यं तत्सुखावहं॥ इति सृष्टि
क्रमकथनं॥ इति श्री दामोदरसूनुनाशार्ङ्गधरेण विरचितायां संहितायां शारीरक
लादिकथनं सृष्टिक्रमकथनाध्यायः ५॥ यात्वाऽऽमाशयमाहारः पूर्वं प्राणानिलेरितः
॥ माधुर्यं फेनभावं च षड्रसोपि लभेत तु॥ अथ पाचकपित्तेन विदग्धश्चाम्लतां व्र
जेत्॥ ततः समानमरुता ग्रहणीमभिनीयते॥ ग्रहण्यां पच्यते कोष्ठवह्निना जायते

कटुः॥ रसो भवति संपक्वात्पक्वाशयसमं भवेत्॥ वन्हेर्वलेन माधुर्य्यं स्निग्धतां याति तद्रसः
॥उष्मणाऽतिधातूनऽखिलान्सम्यक्पक्वोऽमृतोपमः॥ मंदवन्हिर्विदग्धश्च कटुर्वाम्लो भवेद्र
सः॥ विषभावं व्रजेत्कापि कुर्याद्वा रोगसंकरं॥ आहारस्य रसः सारः सारहीनो मलाद्रवः
॥ शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात्॥ तत्किट्टं च मलं ज्ञेयं तिष्ठत्पक्वाशये च त
त्॥ वलित्रितयमार्गेण यात्यपानेन नोदितं॥ प्रवाहिणी सर्जनी च ग्राहिकेति वलित्रयं॥
रसस्तु हृदयं याति समानमरुतेरितः॥ रंजितः पाचितस्तत्र पित्तेनाऽयाति रक्ततां॥ र
क्तं सर्वशरीरस्य जीवस्याधारमुत्तमं॥ स्निग्धं गुरुतरं स्वादु विदग्धं पित्तवद्भवेत्॥
पाचिताः पित्ततापेन रसाद्या धातवः क्रमात्॥ शुक्रत्वं याति मासेन तथा स्त्रीणां रजो
भवेत्॥ कामाग्निपुनसंयोगे शुक्रशोणितशुक्रतः॥ गर्भः संजायते नार्याः स जातो
वाल उच्यते॥ आधिक्ये रजसः कन्या पुत्रः शुक्राधिके भवेत्॥ नपुंसकं समत्वेन
यथेच्छा पारमेश्वरी॥ वालस्य प्रथमे मासि देया भेषजरक्तिका॥ अवलेहीकृ
तेश्चैव क्षीरक्षौद्रसिताघृतैः॥ वर्द्धयेत्तावदेकैकां यावन्भवति वत्सरः॥ माषै
र्वृद्धिस्तदूर्द्धं स्याद्यावत्षोडशवत्सराः॥ ततः स्थिरा भवेत्तावद्यावद्वर्षाणि स

रतीभ्ररिभेष
जेश्या३

कुल्त्थासेचधावनं ३

सतिः॥ ततो बालकवन्मात्रा ह्रासनीयाः शनैः शनैः॥ मात्रेयं कल्कचूर्णानां कषाया
णां चतुर्गुणं॥ अंजनं चतुर्थाब्दात्स्नानमभ्यंगकर्म च॥ वमनं प्रतिमर्षं च जन्मप्रभृति शस्य
ते॥ कवलः पंचमाद्वर्षा६ षमा८न्नस्य कर्म च॥ विरेकः षोडशाद्वर्षाद्विंशतेश्चैव मैथुनं॥
बाल्य १० वृद्धिः २० छवि ३० र्मेधा ४० त्वक् ५० दृष्टिः ६० शुक्रं ७० विक्रमो ८० बुद्धिः ९० कर्मेन्द्रियं
१०० चेति जीवितं दशाब्दतो ह्रसेत्॥ इत्याहार पाक गर्भोत्पत्ति कुमार पोषणानि॥ अल्पकेशः

श्वेतकेशः

कृशो रूक्षो वाचालश्चलमानसः॥ आकाशचारी स्वप्नेषु वातप्रकृतिको नरः॥ अकालप
लितैर्व्याप्तो धीमान् स्वेदी च रोषणः॥ स्वप्नेषु ज्योतिषां द्रष्टा पित्तप्रकृतिको नरः॥ गंभीर
बुद्धिः स्थूलांगः स्निग्धकेशो महाबलः॥ स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः॥ ज्ञात
व्या मिश्रचिन्हैश्च द्वित्रिदोषोल्वणा नराः॥ तमः कफाभ्यां निद्रा स्यान्मूर्च्छा पित्ततमोभवा
॥ रजः पित्तानिलैर्भ्रान्तिस्तंद्रा श्लेष्मतमोनिलैः॥ ग्लानिरोजः क्षयाद्दुःखादजीर्णाच्छ
श्रमाद्भवेत्॥ यः सामर्थ्येप्यनुत्साहः तमालस्यमुदाहृतं॥ चेतन्यशिथिलत्वाच्च पी
त्वैकं श्वासमुद्धरेत्॥ विस्तीर्णवदनः श्वासं जृंभा सा कथ्यते बुधैः॥ उदानप्राणयोरू
र्ध्वयोगान्मौलिकफाश्रयात्॥ शब्दः संजायते नस्तः क्षुतं तत्कथ्यते बुधैः॥ उदानको

उकार१

पाहारस्तु स्थिरत्वाच्चयम्भवेत् ॥ पवनस्योर्ध्वगमनं तमुद्गारं प्रचक्षते ॥ इति प्रकृतिल
क्षणानि ॥ इति श्री शा० मो० शारीरे आहारपाकक्रियागर्भोत्पत्तिकुमारपोषणप्रकृ
तिलक्षणाख्याध्यायः ६ ॥ रोगाणां गणना पूर्वमुनिभिर्या प्रकीर्तिता ॥ मयाऽत्र प्रोच्य
ते सैव तद्भेदा बहवो मताः ॥ पंचविंशतिरुद्दिष्टा ज्वरास्तद्भेद उच्यते ॥ एकैकदोषैस्त्रि
धा द्वंद्वभेदेन त्रिविधः स्मृताः ॥ एकश्च सन्निपातेन तद्भेदा बहवः स्मृताः ॥ प्रायशः स
न्निपातेन पंच स्युर्विषमज्वराः ॥ सततः सततश्चैव अन्येद्युस्तृतीयकः ॥ चतुर्थक
श्च पंचैते कीर्तिता विषमज्वराः ॥ तथागंतुज्वरो प्येकस्त्रयाष्टविधो मतः ॥ अभिचा
रग्रहावेशशापैरागंतुकस्त्रिधा ॥ श्रमाच्छेदाद्भिहताद्दाहात्स्वेतुर्धा वातजो ज्वरः ॥ कामा
द्भीतेश्शुचो रोषादभिषाद्धेषधगंधतः ॥ अष्टांगज्वराः षट् स्युरेवं ज्वरविनिश्चयः ॥ जर २५
एकैकत्रिदोषैः सर्वैश्च सोकादामाद्भयादपि ॥ अतिसारः सप्तधा स्यात्क्रहणी पंच
धा मता ॥ एकैकदोषैः सन्निपातात्तथा आमेन पंचमी ॥ संग्रहणी ५ ॥ प्रवाहिका
चतुर्धा स्यात्एकैकदोषैस्तथाऽस्त्रतः ॥ प्रवाहिका ४ ॥ अजीर्णं त्रिविधं प्रोक्तं विष्टब्धं वा
युना मतं ॥ पित्ताद्विदग्धं विज्ञेयं कफेनामं तदुच्यते ॥ अजीर्ण ३ ॥ विषाजीर्णरसोद्

मि

कं दोषैः स्यादलसः त्रिधा॥ आलस ३ विशूची त्रिविधा प्रोक्ता दोषैः सा स्यात्स्वपक्व
पक्वं॥ विशूची ३। ६ ३ कालशकं चैकं ९ एकं स्याद्विलंबिका॥ अर्शांसि षड्विधान्याहु
र्वातपित्तकफास्रतः॥ सन्निपाताच्च संसर्गात्तेषां द्विधा मता॥ सहजोत्तरजन्माभ्यां त
था शुष्कार्द्रभेदतः॥ अर्श ६॥ त्रिधैव चर्मकीलानि वातात्पित्तात्कफात् ३ पि॥ चर्मकी
ल ३॥ द्वाविंशतिप्रकारे स्यात् क्रिमयः स्युर्द्विधा च ते॥ बाह्यास्तथाभ्यंतराः स्युस्तेषु जूका वहि
श्चराः॥ लिक्षाश्चान्ये भ्यंतरास्तु कफान्ते हृदयोदकाः॥ अंत्रादा उदरावेष्टाश्चुरवश्च
मतागुरु॥ सुगंधा दर्भकुसुमास्तथा रक्ताश्च मातरः। सौरसा लोमविध्वंसा रोमद्वीपा
उदुंबराः॥ केशादाश्च तथैवान्ये शकृज्जाताः मकेरुकाः॥ लेलिहाश्च सशूलाश्च सौ
सुरादा मकेरुकाः॥ तथान्यः कफरक्ताभ्यां संजाताः स्नायुकस्मृताः॥ व्रणस्येल्मय य
श्चान्ये विषमावाद्धयोनयः॥ क्रिमि २२। पांडुरोगाश्च पंच स्युः ५ वातपित्तकफैस्त्रिधा
॥ त्रिदोषैर्मृत्तिकाभिश्च तथैका कामला स्मृता॥ स्यात्कुंभकामला चैका तथैकं हलीम
कं॥ रक्तपित्तं त्रिधा प्रोक्तं मूर्ध्वगं कफसंगतं॥ अधोगं मारुतादेयं तत्तद्द्वयेन द्विमार्गगं॥
रक्तपित्त ३॥ कासाः पंच समुद्दिष्टास्तेत्रयस्तु त्रिभिर्मलैः॥ उरःक्षतोच्च तुषैः स्यात्

क्षेया क्षतोश्च पंचमः॥ कास ५॥ क्षयाः पंचविधा ज्ञेयास्त्रिभिर्दोषैस्त्रयश्च ते॥ चतुर्थः
सन्निपातेन पंचमः स्यादुरःक्षतात्॥ राजयक्ष्मा ५॥ शोषाः स्युः षट्प्रकारेण स्त्रीप्रसंग
शुचोव्रणात्॥ अध्वश्रमाच्च व्यायामाद्वार्द्धक्यादपि जायते॥ धातुशोष ६॥ श्वासाः पंचवि
धा ज्ञेयाः क्षुद्रस्तात्तमकस्तथा॥ ऊर्द्ध्वश्वासो महाश्वासश्छिन्नश्वासश्च पंचमः॥ श्वास ५॥
कथिताः पंच हिक्कास्तु तास्तु क्षुद्रान्नजास्तथा॥ गंभीरा यमलाश्चैव महती पंचमी तथा॥
हिक्का ५ चत्वारोग्नेर्विकाराः स्युर्विषमो वातसंभवः॥ तीक्ष्णः पित्तात्कफान्मंदो भस्मको
वातपित्तयोः॥ जठराग्निदोष ४॥ पंचैवारोचका ज्ञेया वातपित्तकफैस्त्रिधा॥ सन्निपाता
न्मनस्तापाच्छर्दयः सप्तधा मताः॥ त्रिभिर्दोषैः पृथक्तिस्रः कृमिभिः सन्निपाततः॥ द्वेष
याच तथा स्त्रीणां गर्भधानाच्च जायते॥ छर्दि ७॥ स्वरभेदाः षडेव स्युर्वातपित्तकफैस्त्रिधा
॥ मेदसा सन्निपातेन क्षयात्षष्ठः प्रकीर्तिताः॥ स्वरभेदाः॥ तृष्णा च षड्विधा प्रोक्ता वा
तात्पित्तात्कफादपि॥ त्रिदोषैरुपसर्गेण क्षयाद्धातोश्च षष्ठिका॥ तृष्णा ६ मूर्छा चतुर्विधा प्रो
क्ता वातपित्तकफैः पृथक्॥ चतुर्थी सन्निपातेन तथैवैको भ्रमः स्मृतः॥ मूर्छा ४॥ भ्रम १
निद्रा तंद्रा च सन्न्यासो ग्लानिश्चैकैकशः स्मृताः॥ निद्रा १ तंद्रा १ सन्न्यास १ ग्लानि १॥ मदाः

सप्त समाः ख्याताः वातपित्तकफैस्त्रयः॥ त्रिदोषैरसृजा मद्याद्विषादपि सप्तमः॥ मद ७ मद्
त्ययश्चतुर्द्धा स्याद्वातात्पित्तात्कफादपि॥ त्रिदोषैरपि तत्र ज्ञेयः एकः परमदस्तथा॥ पानाजी
र्णं तथैवैकं तथैकः पानविभ्रमः॥ पानात्ययस्तथैवैकः दाहाः सप्त तथा मताः॥ रक्तपित्तात्त
था रक्ता तृष्णायाः पित्ततस्तथा॥ धातुक्षयान्मर्म्मघाताद्दाहो भ्रष्टर्णोदरादपि॥ दाह ७ उन्मादाः
षट्समाख्यातास्त्रिभिर्दोषैस्त्रयश्च ते॥ सन्निपाताद्विषाज्ज्ञेयः षष्ठो दुःखेन चेतसा॥ उ
न्माद ६ भूतोन्मादाः विंशतिः स्युर्देवाद्दानवादपि॥ गंधर्वात्किंन्नराद्यक्षात्पितृभ्योगु
रुशापतः॥ प्रेताच्च गुह्यकात्सिद्धाद्भूताच्चैव पिशाचतः॥ जलादिदेवताद्याश्च नागाच्च ब्रह्मरा
क्षसात्॥ राक्षसादपि कुष्मांडात्कृत्यावेतालयोरपि॥ भूतोन्माद २० अपस्मारश्चतुर्द्धा स्या
त्समीरात्पित्ततस्तथा॥ श्लेष्मणोपि तृतीयास्याच्चतुर्थः सन्निपाततः॥ अपस्मार ४। चत्वा
रश्चामवाताः स्युर्वातपित्तकफैस्त्रिधा॥ चतुर्थः सन्निपाताच्च शूलान्यष्टौ बुधाः ज
गुः॥ पृथक्दोषैस्त्रिधा द्वंद्वभेदेन त्रिविधान्यपि॥ आमेन सप्तमं प्रोक्तं सन्निपातेन चाष्टमं॥
शूलाः ८ परिणामभवं शूलमष्टधा परिकीर्त्तितं॥ मलजैः शूलसंख्यास्यात्तैरेव परिणाम
जं॥ परिणामशूल ८॥ अन्नद्रवभवं शूलं जरत्पित्तभवं तथा॥ एकैकं गणितं सूत्रे रुद्रावर्त्ता
स्त्रयोदश॥ एकं न्युन्निग्रहात्प्रोक्तं तथा नोधाद्द्वितीयकं॥ निराबात तृतीयः स्याच्चतुर्थः श्वा

मगी ७

सनिग्रहात्॥ छर्दिनोधात्पंचमः स्यात्षष्ठः न्नवथुनिग्रहात्॥ जंभारोधात्सप्तमः स्यादुद्गा
रग्रहतोष्टमः॥ नवमः स्यादश्रुनोधात्दशमः शुक्रधारणात्॥ मूत्ररोधान्मलस्यापि नोधाद्वा
तविनिग्रहात्॥ उदावर्तास्त्रयश्चैते घोराः पंचदशकारकाः॥ उदावर्त १३॥ अनाहो द्विविधः प्रो
क्त एकः पक्वाशयोद्भवः॥ आमाशयोद्भवश्चान्यः प्रत्यानाहः स कथ्यते॥ प्रत्यानाह १
उनो ग्रह स्याच्चैको हृद्रोगाः पंच ५ कीर्तिताः॥ वातादिभिस्त्रयः प्रोक्ताश्चतुर्थः सन्निपा
ततः॥ पंचमः क्रिमिसंजातः तथाष्टावुदराणि तु॥ हृद्रोग ५ वातात्पित्तात्कफात्त्रीणि त्रिदोषे
म्योजलात्तथा॥ शीतान्नयादुक्तरात्दष्टमं परिकीर्तितं॥ उदर ८॥ गुल्माश्चाष्टौ समाख्याताः
वातपित्तकफैस्त्रयः॥ द्वंद्वजैस्त्रयः प्रोक्ताः सप्तमः सन्निपातजः॥ रक्ताद्दष्टमकः ख्या
तो गुल्म ८॥ मूत्राघातास्त्रयोदश॥ वातकुंडलिकाष्ठीला वातष्ठीला तथा परा॥ वातव
स्तिस्तृतीयः स्यान्मूत्रघातश्चतुर्थकः॥ पंचमं मूत्रजठरं षष्ठो मूत्रक्षयः स्मृतः॥ मू
त्रोत्सर्गः सप्तमः स्यान्मूत्रग्रंथिस्तथाष्टमः॥ मूत्रशुक्रं तु नवमं विट्घातो दशमः
स्मृतः॥ मूत्रसादश्चोष्णवातो वस्तिकुंडलिका तथा॥ त्रयोदशैते मूत्राघाताः प्रपक
घोराः प्रकीर्तिताः॥ मूत्रघात १३॥ मूत्रकृच्छ्राणि चाष्टौ स्युर्वातात्पित्तात्कफात्त्रिधा॥

सन्निपाताच्चतुर्थं स्याच्छुक्रकृच्छ्रं तु पंचमं॥ विट्कृच्छ्रं षष्ठमाख्यातं वातकृच्छ्रं च सप्तमं॥ अष्टमं चा
श्मरीकृच्छ्रं चतुर्धा चाश्मरी मता॥ मूत्रकृच्छ्र ८॥ वातात्पित्तात्कफाच्छुक्रात्तथा मेहाश्च विंशति॥ अश्म
री ४॥ इक्षुमेहः सुरामेहः पिष्टमेहश्च सांद्रकः। शुक्रमेहोदकाख्यो च लालामेहश्च शीतकः। सिकता
ख्यः शनैर्मेहो दशैते कफसंभवाः॥ मंजिष्ठाख्यो हरिद्राख्यो नीलमेहश्च रक्तकः॥ क्षारमेहः षडे
ते पित्तसंभवा॥ अस्थिमेहो वसामेहो मज्जामेहो मधुप्रमेहः॥ चत्वारो वातजा मेहाः इति मेहाश्च
विंशतिः॥ प्रमेहा २०॥ श्लेष्ममेहोपि साध्यः स्यात् कष्टसाध्यस्तु पैत्तिकः॥ वातप्रमेहो मुनिभिः
असाध्यः स्यात्प्रकीर्तितः॥ सोमरोगस्तथैकः प्रमेहपिडका दशः॥ शराविका कच्छपिका पुत्रि
णी विनता लजी॥ मसूरिका सर्षपिका जालिनी च विदारिका॥ विद्रधिश्च दशैतास्तु पिडका मेहसं
भवाः॥ मेदोदोषस्तथा चैकः शोफरोगा नवस्मृताः॥ दोषैः पृथक् द्वयैः सर्वैरभिघाताद्विषादपि॥ वृ
द्धयः सप्त गदिताः वातात्पित्तात्कफेन च। रक्तेन मेदसा दंत्रवृद्धिश्च सप्तमी॥ अंडवृद्धिस्तथा चै
का तथैका गंडमालिका॥ गंडालजीति चैका स्याद्ग्रंथयो नवधा मताः॥ त्रिभिर्दोषैस्त्रयो रक्ता
त्सिराभिर्मेदसा व्रणात्॥ अस्थ्ना मांसेन नवमः षड्विधं स्यात्तथार्बुदं॥ वातात्पित्तात्कफा पची २
द्रक्तान्मांसादपि च मेदसः॥ श्लीपदं च त्रिधा प्रोक्तं वातात्पित्तात्कफादपि॥ विद्रधिः षड्विधः

ख्यातो वातपित्तकफैस्त्रयः॥ रक्तेनान्यस्त्रिदोषैश्च व्रणाः पंचदशोदिताः॥ तेषां चतुर्विंशतिभे
दः स्यादागंतुरिहजस्तथा॥ दुष्टोऽदुष्टश्च विज्ञेयस्तत्र संख्या कथ्यते पृथक्॥ वातव्रणः पित्तज
श्च कफजो रक्तजो व्रणः॥ वातपित्तभवश्चान्यो वातश्लेष्मभवस्तथा॥ तथा पित्तकफाभ्यां
च सन्निपातेन चाष्टमः॥ नवमो वातरक्तेन दशमः पित्तरक्तजः॥ श्लेष्मरक्तभवश्चान्यो
वातपित्तास्रगुद्भवः॥ वातश्लेष्मास्रगुत्पन्नः पित्तश्लेष्मास्रसंभवः॥ सन्निपातास्रगु
द्भवः इति पंचदश व्रणाः॥ सद्योव्रणस्त्वष्टधा स्यादवल्कितविलंबितौ॥ छिन्नभिन्नप्रच
लिताः घृष्टविद्धनिपातितः॥ कोष्ठभेदो द्विधा प्रोक्तः छिन्नांत्रो निस्सृतांत्रकः॥ अस्थि
भंगोऽष्टधा प्रोक्तो भग्नपिष्टविदारिताः॥ विवर्त्तितश्च विश्लिष्टस्तिर्य्यक्कुन्तितस्त्वधोगतः॥
ऊर्द्धगः संधिभग्नश्च वह्निदग्धश्चतुर्विधः॥ प्लुष्टोऽतिदग्धो दुर्दग्धः सम्यक्दग्धश्च की
र्तितः॥ नाड्यः पंच समाख्याता वातपित्तकफैस्त्रिधा॥ त्रिदोषैरपि शल्येन तथा षष्ठोस्तु
भगंदराः॥ शतपोनकस्तु पवनादुष्ट्रग्रीवश्च पित्ततः॥ परिस्रावी कफात्ज्ञेयऋजुर्वा
तकफोद्भवः॥ परिक्षेपी मरुत्पित्तादर्शोजः कफपित्ततः॥ आगंतुजातस्त्वोन्मार्गी
शंखावर्त्ती त्रिदोषजः॥ मेढ्रे पंचोपदंशाः स्युर्वातपित्तकफैस्त्रिधा॥ सन्निपातेन

रक्ताच्च मेढ्रे शूकाख्या स्तथा॥ चतुर्विंशतिराख्याता लिंगार्शोग्रथितं तथा॥ निर्वृत्तमवमं
पश्चुम्नहितं सतपोनकः॥ अष्ठीलिका सर्षपिका त्वक्पाकश्चावपाटिका॥ मांसपाकः सशील
निर्विद्रुद्रुमणिबंधकः॥ मांसार्बुदं पुष्करिका संव्यूढः पिडकालजी॥ रक्तार्बुदं विद्रधिश्च कुं
भीका तिलकालकः॥ निरुद्धप्रकशः प्रोक्तस्तथैव परिकीर्तिता॥ कुष्ठान्यष्टादशोक्तानि
वातात्कापालिकं भवेत्॥ पित्तेनौदुम्बरं प्रोक्तं कफान्मंडलचर्च्चिके॥ मरुत्पित्ताद् ऋष्यजि
ह्वं श्लेष्मवाताद्विपादिका॥ तथा सिध्मैककुष्ठं च किटिभं वालसं तथा॥ कफपित्तात्पुन
र्दद्रुः पामा विस्फोटकस्तथा॥ महाकुष्ठं चर्मदलं पुंडरीकं शतारुकः॥ त्रिदोषैः काकणं
स्तेयं तथान्यश्चित्रसंज्ञितं॥ तच्च वातेन पित्तेन श्लेष्मणा च त्रिधा भवेत्॥ क्षुद्ररोगाः ष
ष्टिसंख्यास्तेष्वादौ शर्करार्बुदं॥ अंडवृद्धिः पनसिका विवृत्ता त्वालजी तथा॥ वराहदं
ष्ट्रो वल्मीकं कच्छपी तिलकालकः॥ गर्द्दभी रकसा चैव यममरव्या विदारिका॥ कदरं म
शकश्चैव नीलिका जालगर्दभः॥ इरिवेल्ली जतुमणिर्गुदभंशोऽग्निरोहिणी॥ सन्नि
रुद्धगुदः कोष्ठः कुनखोऽनुशायी तथा॥ पद्मिनीकंटकश्चिप्पमलसो मुखदूषिका॥
कन्नाक्षणकछूरवगंधः पाषाणगर्दभः॥ राजिका च तथा व्यंगाः चतुर्धा परिकी
र्तिताः॥ वातात्पित्तात्कफाद्रक्तात् द्वित्वक्कं व्यंगलन्हणं॥ विस्फोटान्क्षुद्ररोगे भवतेऽष्टधा

परिकीर्तिताः॥ एककदोषैस्त्रयो द्वंद्वैस्त्रिविधः सप्तमोस्रजः॥ अष्टमः सन्निपातेन
न्युदरु कुसुमसूरिका॥ चतुर्दशप्रकारेण त्रिभिर्दोषैस्त्रिधा च सा॥ द्वंद्वजा त्रिविधा प्रोक्तो स
न्निपातेन सप्तमी॥ अष्टमी त्वग्गता ज्ञेया रक्तजा नवमी स्मृता॥ दशमी मांससंजाता व
तस्रोन्याश्च दुस्तराः॥ मेदोस्थिमज्जाशुक्रस्थाः क्षुद्ररोगा इतीरिताः॥ विसर्प्यो रोगो नव
धा वातपित्तकफैस्त्रिधा॥ त्रिधा च द्वंद्वभेदेन सन्निपातेन सप्तमः॥ अष्टमो वह्निदाहेन न
वमश्चाभिघातजः॥ तथैकः श्लेष्मपित्ताभ्यामुदर्दः परिकीर्तितः॥ वातपित्तेन चैकस्तु
शीतपित्तामयः स्मृतः॥ अम्लपित्तं त्रिधा प्रोक्तं वातेन श्लेष्मणा तथा॥ तृतीयं श्लेष्म
वाताभ्यां वातरक्तं तथाऽष्टधा॥ वाताधिक्येन पित्तोच्चैः कफाद्दोषत्रयेण च॥ रक्ताधिक्ये
न द्वाभ्यां द्वंद्वेन त्रिविधः स्मृताः॥ अशीतिः ८० वातजा रोगाः कथ्यंते मुनिभाषिताः॥
आक्षेपको हनुस्तंभ ऊरुस्तंभः शिरोग्रहः॥ बाह्यायामोंतरायामः पार्श्वशूलं कटिग्र
हः॥ दंडापतानकः खल्ली जिह्वास्तंभस्तथार्दितः॥ पक्षाघातः क्रोष्टुशीर्षो मन्यास्तंभ
श्च पंगुता॥ कलायखंजता तूनी प्रतूनी चैव खंजता॥ पादहर्षो गृध्रसी च विश्वाची चा
वबाहुकः॥ अपतानो व्रणायामो वातकंठो पतंत्रकः॥ अंगभेदोंगशोषश्च मिन्मिनत्वं

जठरवात ४
जलपीति ६

स्फुरणं शिराणां पूरणं तथा ॥ कंपः कार्श्यं श्यावता च प्रलापः क्षिप्रमूत्रता ॥ निद्रानाशः स्वेदनाशो दुर्बलत्वं बल
क्षयः ॥ अतिप्रवृत्तिः २

च गर्दः ॥ मत्स्यकीला कीलिका च वामनत्वं च कुब्जता ॥ अंगपीडांगशूलं च संकोचस्तंभरूक्ष
ता ॥ अंगभंगोंगविभ्रंशो विडूहो वद्धविट्कता ॥ मूकत्वमतिजृंभा स्यादत्युद्गारो त्रकूजनं ॥ वातप्रवृ
त्तिः शुक्रस्य कार्श्यं नाशश्च रेतसः ॥ अनवस्थितचित्तत्वं काठिन्यं विरसास्यता ॥ कषायवक्त्रता
ध्मानं प्रत्याध्मानं च शीतता ॥ रोमहर्षश्च भीरुत्वं तोदः कंडूरसाज्ञता ॥ शब्दाज्ञता प्रसुप्तिश्च गंधाज्ञ
त्वं दृशः क्षयः ॥ अथ पित्तभवा रोगाः चत्वारिंशद्विहोदिताः ॥ धूमोद्गारो विदाहः स्यादुष्णांगत्वं मति
भ्रमः ॥ कांतिहानिः कंठशोषो मुखशोषो ल्पशुक्रता ॥ तिक्तास्यताम्लवक्त्रत्वं स्वेदस्रावोंग
पाकता ॥ क्लमो हरितवर्णत्वमतृप्तिः पीतकायता ॥ रक्तस्रावोंगदरणं लोहगंधास्य
ता तथा ॥ दौर्गंध्यं पीतमूत्रत्वमरतिः पीतविट्कता ॥ पीतावलोकनं पीतनेत्रता पीतद
न्तता ॥ शीतेच्छा पीतनखता तेजोद्वेषो ल्पनिद्रता ॥ कोपश्च गात्रसादश्च भिन्नविट्कत्व
मंधता ॥ उष्णोच्छ्वासत्वमुष्णत्वं मूत्रस्य च मलस्य च ॥ तमसो दर्शनं पीतमंडलानां च दर
शनं ॥ निःसत्वं च पित्तस्य चत्वारिंशद्रुजः स्मृताः ॥ कफस्य विंशतिः प्रोक्ताः रोगाः
तंद्रातिनिद्रता ॥ गौरवं मुखमाधुर्यं मुखलेपः प्रसेकता ॥ श्वेतावलोकनं श्वेतविट्कत्वं श्वे
तमूत्रता ॥ श्वेतांगवर्णता शैत्यमुष्णेच्छा तिक्तकामिता ॥ मलाधिक्यं च शुक्रस्य बाहुल्यं ब
हुमूत्रता ॥ आलस्यं मंदबुद्धित्वं तृप्तिर्घर्घरवाक्यता ॥ अचैतन्यं च गदिता विंशतिः श्लेष्म

जागदाः॥ रक्तस्य च दशप्रोक्ता व्याधयस्तेषु गौरवं॥ रक्तमंडलता रक्तनेत्रत्वं रक्तमूत्रता॥ रक्त
ष्ठीवनता रक्तपिडकानां च दर्शनं॥ औष्ण्यं च दंतिगंधित्वं पीडा पाकश्च जायते॥ चतुःसप्त
ति ७४ संख्याता मुखरोगास्तथोदिताः॥ तेष्वोष्ठरोगा गणिता एकादश मिता बुधैः॥ वा
तपित्तकफैस्त्रेधा त्रिदोषैरस्रजा तथा॥ क्षतमांसार्बुदं चैव गंडोष्ठं च जलार्बुदं॥ मेदोर्बुदं चार्बु
दं चेनोगा एकादशोष्ठजाः॥ दंतरोगा दश ख्याता दालनः क्रमिदंतकः॥ दंतहर्षः करालश्च दं
तवालश्च शर्करा॥ अधिदंतः श्यावदंतो दंतभेदः कपालिका॥ तथा त्रयोदश मिता दंतमूला
मयास्स्मृताः॥ शीतादो दालकुशो दौर्दंतविद्रधिपुप्पुटौ॥ अधिमांसो विदर्भश्च महाशुषिर
सौषिरौ॥ तथैव गतयः पंच वातात्पित्तात्कफादपि॥ सन्निपाताद्गतिश्चान्या रक्तेनाऽथ च
पंचमी॥ तथा जिह्वामयः षट् स्युर्वातपित्तकफैस्त्रिधा॥ अलसश्च चतुर्थः स्यादधिजि
ह्वा च पंचमी॥ षष्ठी जिह्वोपजिह्वा स्यात्तथा षोतालुजा गदाः॥ अर्बुदं तालुपिडिका कच्छपी ता
लुसंहतिः॥ गलशुंडी तालुशोषः तालुपाकश्च पुप्पुटः॥ गलरोगास्तथा ख्याता अष्टाद
शमिता बुधैः॥ वातरोहिणिका पूर्वं द्वितीया पित्तरोहिणी॥ कफरोहिणिका प्रोक्ता
त्रिदोषैः रोहिणी॥ मेदोरोहिणिकावृंदगलौघा गलविद्रधिः॥ स्वरहा तुंडिकेरी च
शतघ्नी तालुकोर्बुदं॥ गिलायुर्वलयश्चापि वातागंडः कफात्तथा॥ मेदोगंडस्तथैक

स्यादित्यष्टोदश कंठजाः ॥ मुखांतःसंभवा रोगा अष्टौ ख्याता महर्षिभिः ॥ मुखपाको भवे
द्वातात्पित्तात्कफादपि ॥ रक्ताच्च सन्निपाताच्च इत्यास्योर्द्ध गदादपि ॥ अर्बुदं चेति मुखजाः
चतुःसप्ततिरामयाः ॥ कर्णरोगाः समाख्याता अष्टादश मिता बुधैः ॥ वातात्पित्तात्कफाद्रक्तात्स
न्निपाताच्च विद्रधिः ॥ शोफोर्बुदं पूतिकर्णः कर्णा[illegible]णतल्लिका ॥ बाधिर्यं तंत्रिका कंडूः
शष्कुली कृमिकर्णकः ॥ कर्णनादः प्रतीनाह इत्यष्टादश कर्णजाः ॥ कर्णपाली समुद्भूता रो
गाः सप्त प्रकीर्तिताः ॥ उत्पात पाली शोषश्च विदारी दुःखवर्द्धनः ॥ परिपोटश्च लेली च
पिप्पली चेति संस्मृताः ॥ कर्णमूलामयाः पंच वातात्पित्तात्कफादपि ॥ सन्निपाता
च्चैत्तोच्च तथा नासाभवा गदाः ॥ अष्टादशैव संख्याताः प्रतिश्यायस्तु तेष्वपि ॥ वातात्
पित्तात्कफाद्रक्तात्सन्निपातेन पंचमः ॥ पीनसः पूतिनासश्च नासाशोश्च भ्रंशान्हवः ॥
नासानाहः प्रतिरक्तमर्बुदं दुष्टपीनसं ॥ नासाशोषो घ्राणपाकः पूयस्रावश्च दीप्तयः
॥ तथाष्टादश शिरोरोगा वातेनार्द्धावभेदकः ॥ शिरस्तापश्च वातेन पित्तपीडा तृतीय
कः ॥ चतुर्थी कफजा पीडा रक्तजा सन्निपातजा ॥ क्षयावर्त्तशिरः पाकात्कृमिभिः शंख
केन च ॥ तथा कपालरोगास्तु नव ते षूपशीर्षिका ॥ अ[illegible]षिका विद्रधिश्च दारुणः पि
डकार्बुदं ॥ इंद्रलुप्तं च खलतिः पलितं चेन्नवाहृता नेत्रभवा ख्याताश्चतुर्नवतिरा

[illegible]तिते

२ रू२

मयः॥ तेषु वर्त्मगदाः प्रोक्ताश्चतुर्विंशति संज्ञिताः॥ कृच्छ्रोन्मीलः पक्ष्मपातः कफोत्क्लि-
ष्टश्च लोहितः॥ रूग्मेषः कर्दमश्च रक्तोत्क्लिष्टः कुकूणकं॥ पक्ष्मार्शः पक्ष्मरोध-
श्च पित्तोत्क्लिष्टाश्च पोथकं॥ श्लिष्टवर्त्मा पाचबहुलः पक्ष्मोत्संगस्तथार्बुदं॥ कुं-
भिकासिकतावर्त्म लगणोंजननामिका॥ तथैव श्याववर्त्माश्च विषवर्त्मा तथा-
लजी॥ उत्क्लिष्टवर्त्मेति गदाः प्रोक्ता वर्त्मसमुद्भवाः॥ नेत्रसंधिसमुद्भूता नव
रोगाः प्रकीर्तिताः॥ जलस्रावः कफस्रावो रक्तस्रावैश्च पर्वणी॥ पूयस्रावः
कृमिग्रंथि उपानाहस्तथालजी॥ पूयालस इति प्रोक्ता रोगा नयनसंधिताः
॥ तथा सिरागतान् रोगान् बुधैः प्रोक्तास्त्रयोदश॥ शिरोत्पातः शिराहर्षः शि-
राजाश्चलशुक्तिका॥ शुक्लार्माचाधिमांसार्म्मी प्रस्तार्माचापि पिष्टकः॥
सिरायाः पिडकाश्चैवस्तकफग्रंथितोर्जुनः॥ स्नाय्वर्माचाधिमांसा-
स्यादिति शुक्लगता गदाः॥ तथा कृष्णसमुद्भूता पंच रोगाः प्रकीर्तिताः॥
॥ शुद्धशुक्रं सिराशुक्रं क्षतशुक्रं तथाजका॥ सिरासंगश्च सर्वेपि प्रोक्ताः
कृष्णगता गदाः॥ काचं तु षड्विधं ज्ञेयं वातात्पित्तात्कफादपि॥ सन्निपाताच्च

रक्ताच्च षष्ठं संसर्गसंभवं॥ तिमिराणि षडेव स्युर्वातात्पित्तात्कफात्त्रिधा॥ संसर्गेण
च रक्तेन षष्ठः स्यात्सन्निपाततः॥ लिंगनाशास्तथा स्याद्वातात्पित्तात्कफेन च॥ त्रि
दोषैरुपसर्गेण रक्तात्संसर्गजस्तथा॥ अष्टधा दृष्टिरोगास्तु तत्र पित्तविदग्धकं
॥ अम्लपित्तविदग्धं च तथैवाम्लविदग्धकं॥ नकुलांध्यं धूसरांध्यं च रात्र्यंधं ह्रस्व
दृष्टिका॥ गंभीरदृष्टिः इत्येते रोगा दृष्टिगताः स्मृताः॥ चत्वारश्चाधिमंथाः स्युर्वात
पित्तकफास्रजः॥ अभिष्यंदाश्च चत्वारो रक्तोदोषैस्त्रिभिस्तथा॥ सर्वाक्षिरोगाश्चा
ष्टौ स्युस्तेषु वाताद्विपर्ययः॥ अल्पशोथोऽल्पतो वातस्तथा पाकात्ययः स्मृतः॥ शु
क्लाक्षिपाकश्च तथा शोफोऽथ शुष्कितश्च च॥ हताधिमंथ इत्येते रोगाः सर्वाक्षिसंभवाः
॥ वर्त्मदोषास्तु पंचैव प्रोक्तास्तत्रेष्विकः स्मृतः॥ आसेकश्चैव कुंभीकस्तु गंधीबद्धसं
ज्ञितः॥ शुक्रे दोषास्तथा षोस्युर्वातात्पित्तकफेन च॥ कुणपं श्लेष्मवाताभ्यां पूयाभं
श्लेष्मपित्ततः॥ न्हीणं च वातपित्ताभ्यां गंधिपिश्च श्लेष्मरक्ततः॥ मलाभं सन्नि
पाताच्च शुक्रे दोषा इतीरिताः॥ अथ स्त्रीरोगनामानि प्रोच्यंते पूर्वशास्त्रतः॥
अष्टावार्त्तवदोषास्तु वातपित्तकफैस्त्रिधा॥ पूयाभं कुणपं गंधि न्हीणं मलसमं तथा॥

तथा चरक्त प्रदरं चतुर्विधमुदाहृतं॥ वातपित्तकफैस्त्रेधा चतुर्थः सन्निपाततः
॥ विंशतिर्योनिरोगाः स्युर्वातात्पित्तात्कफादपि॥ सन्निपाताच्च रक्ताच्च लोहित
क्षयतस्तथा॥ शुष्का न्हिका[illegible]मिनी चैव खंडितांतर्मुखी तथा॥ सूचीमुखी वि
प्लुता च जातघ्नी च परिप्लुता॥ उपप्लुता प्राक्चरणा महायोनिरुदाहृता॥ कर्णि
का चातिचरणा योनिरोग इतीरिताः॥ चतुर्विधं योनिकंदं वातपित्तकफैस्त्रिधा॥
चतुर्थं सन्निपातेन तथाष्टौ गर्भतागदाः॥ उपविष्टकगर्भः स्यात्तथा नागोदरः स्मृतः॥
मक्कल्लो मूढगर्भश्च विष्कंभो गूढगर्भकः॥ जरायुदोषो गर्भस्य पातश्चाष्टमकः स्मृ
तः॥ पंचैव स्तनरोगाः स्युर्वातात्पित्तात्कफादपि॥ सन्निपातान्क्षताच्चैव स्तथा स्तन्यो
द्भवा गदाः॥ बालरोगेषु कथिताः स्त्रीदोषास्त्वत्रयः स्मृताः॥ अहन्ता पुरुषोत्पन्नः
सपत्नीविहितस्तथा॥ दैवाजातस्तृतीयस्तु तथा ये सूतिकागदाः॥ ज्वरादय
श्चिकित्स्यास्ते यथा दोषं यथाबलं॥ द्वाविंशतिर्बालरोगास्तेष्वन्ही राक्षसास्त्र
यः॥ वातात्पित्तात्कफाच्चैव दंतोद्भेदश्चतुर्थकः॥ दंतवातो दंतशोषः कालदंतो
तिपूतना॰ मुखपाको मुखस्रावो गुदपाकोपशीर्षकः॥ पार्श्वारुणस्तालुकंठो

विछिन्नः परिगर्भिकः ॥ दोर्बल्यं गात्रशोषश्च शय्यामूत्रं कुकूणकः ॥ रोदनं चागत्री
स्याद्विति द्वाविंशतिः स्मृता । तथा बालग्रहाख्याता द्वादशैव मुनीश्वरैः ॥ स्कंदग्रहो वि
शाखः स्यात्श्वग्रहश्च पितृग्रहः ॥ नैगमेषग्रहस्तद्वत्सकुनिः शीतपूतना ॥ मुख
मंडिनिका तद्वत्पूतना ॥ रेवती चैव संख्याता तथा स्यात्शुष्करेवती ॥ तथा वरणभे
दास्तु वातरक्तादिकाश्चये ॥ द्विचत्वारिंश ४२ इत्युक्तास्ते नोजे छेवमुनीश्वरैः ॥ द्विष
ष्ठिर्दृष्टिभेदाः स्युः सन्निपातादिकाश्चये ॥ तेपि रोगगणेगणिताः पृथक्प्रोक्ता न तेक
चित् ॥ हीनमिथ्यातियोगानां भेदैः पंचदशोदिताः ॥ पंचकर्मभवा रोगास्ते बुरोग
बुसंज्ञिताः ॥ स्नेहः स्वेदस्तथा धूमो गंडूषो जनतर्पणे ॥ अष्टादशैवजाः पीडास्ता
श्चरोगेषु लन्हिताः ॥ शीतोपद्रवरूकः स्यादेकश्चाग्निमोन्हवो मतः ॥ शस्त्रोपद्रवर
कश्चन्यो राद्येकस्मृतस्तथा ॥ स्थावरं जंगमं चैव कृत्रिमं च त्रिधा विषं ॥ तेषां च का
लकूटाद्ये न्नेवधा स्थावरं विषं ॥ जंगमं वसुधा प्रोक्तं तत्र भूतान् जंगमाः ॥ वृश्चिका
मूषकाः कीटाः प्रत्येकं ते चतुर्विधाः ॥ दृष्टाविषं नखविषं तथा शंकाविषं मतं ॥ कृ
त्रिमं द्विविधं प्रोक्तं गररूपी विभेदतः ॥ सप्तधातुविषं ज्ञेयं तथा सप्तोपधातुजं ॥

तथैवोपविषं ज्ञेयं जातं सप्तविधं मतं॥ डुह्नीरविषं चैकं तथैकं दुग्धजं विषं॥ कपि
कछूमवाकंतुंड छनीरमवा तथा॥ तथाश्वररणकं दुश्चवशो याभल्लातजस्तथा॥ म
हश्चतुर्विधश्चान्यः पूगभंगान्नकोद्रवेः॥ चतुर्विधान्यो द्रव्याणां फलत्वङमूलदल
पत्रजे॥ इतिप्रसिद्धागणितायेलोपद्रवाऽविः॥ अस्तस्वाश्चापत्रेधातुमूलजी
वाहिसंभवाः॥ इतिश्रीदामोदरसूनुनाशार्ङ्गधरेण विरचितायां संहितायां
निदाने नागगणनासंख्याध्यायः॥ इतिपूर्वखंडः समाप्तः॥ अथ पाऽतः स्व
रसः कल्क काथश्चहिमफांटको॥ ज्ञेयाः कषायाः पंचैते लघवः स्युर्यथो
त्तरं॥ अथ स्वरसकल्पना॥ आहतातत्क्षणकृष्टाद्द्रव्यात्तत्क्षुल्लात्समुद्ध
रेत्॥ वस्त्रनिःपीडितो यः स्यात्स्वरसो रस उच्यते॥ कुडवं चूर्णितं द्रव्यं
न्क्षिप्तं द्विगुणे जले॥ अहोरात्रं स्थितं तस्माद्भवेद्वा रस उत्तमः॥ आदाय
शुष्कद्रव्यं वा स्वरसानामऽसंभवेत्॥ जलेऽष्टगुणिते साध्यं पादशिष्टं च
गृह्यते॥ स्वरसस्य गुरुत्वाच्च पलमर्द्धं प्रयोजयेत्॥ निशोषितं चाग्निसिद्धं
पलमात्रं रसं पिबेत्॥ मधुश्वेतागुडक्षारान्जीरकं लवणं तथा॥ घृतं

च

मिस्री अपवाचिनी १

अर्द्धकर्ष १ आमलकः २ मधुः २ गुरूची १ मधुः १

तैलं च चूर्णाद्धीनं क्वाथमात्रान्रसेन्नियेत्॥ स यथा॥ अमृताया रसः क्षौद्रयुक्तः
सर्वप्रमेहजित्॥ हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः॥ वासकः स्वरसः पे
यं मधुना रक्तपित्तजित्॥ ज्वरकासक्षयहरः कामलाश्लेष्मपित्तहा॥ त्रिफलाया
रसः क्षौद्रयुक्तो दार्वीरसोऽथवा॥ निंबस्य गुडूच्या वा पीतो जयति कामलां॥ पी
तो मरिचचूर्णेन तुलसीपत्रजो रसः॥ द्रोणपुष्पीरसो वापि निहंति विषमज्व
रान्॥ जंबाम्रामलकीनां च पल्लवोत्थो रसो जयेत्॥ मध्वाज्यक्षीरसंयुक्तो
रक्तातीसारमुल्वणं॥ स्थूलबब्बुलिकापत्ररसः पीनो व्यपोहति॥ सर्वातिसा
रान्स्योनाककुटजत्वग्रसोऽथवा॥ आर्द्रकस्वरसः क्षौद्रयुक्तो व षणवातनु
त्॥ श्वासकासारुचिर्हंति प्रतिश्यायं व्यपोहति॥ बीजपूररसः पानान्मधुक्षार
युतो जयेत्॥ पार्श्वहृद्वस्तिशूलानि कोष्ठवायुं च दारुणं॥ शतावर्य्याश्च
मधुना पित्तशूलहरो रसः॥ निशाचूर्णकन्यारसः श्लीलापचीहरः॥ अ
लंबूषायाः स्वरसः पीतो द्विपलमात्रया॥ अपचीगंडमालानां कामला

जोकी १ घिवकुवारि २

हरद्री ४
मरिच ५
बबुरपत्र ९
अरलुका छाल कारस ८
जोभन ९
आम्र
अमरा

वसा २
गुमीछ ष्प ५
यवाषार १६
बिजवरा नेबू
शतावरि २

याश्च नाशनः॥ शशांडुरसः कोह्मोमरिचैरवधूलितः॥ जयेत्सप्तदिनाभ्यासात्
स्त्रियावर्त्तार्द्धभेदकौ॥ ब्राह्मीकूष्मांडषड्ग्रंथाशंखिनीस्वरसः पृथक्॥ मधुकुष्ठयुताः
पीताः सर्वोन्मादापहारिणः॥ कुष्मांडकस्य स्वरसो गुडेन सहयोजितः॥ उष्णकोद्र
वसंजातं मदं पानाद्व्यपोहति॥ खड्गादिछिन्नगात्रस्य तत्कालं पूरितो व्रणः॥ गो
गेरूकीमूलरसैर्जायते गतवेदनः॥ अथ पुटपाकः॥ पुटपाकस्य कल्कस्य स्वरसो
गृह्यते यतः॥ अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया॥ पुटपाकस्य मात्रेयं ले
पस्यांगारवर्णता॥ लेपं च द्व्यंगुलं स्थूलं कुर्याद्वांगुष्ठमात्रकं॥ काश्मरीवटजंबा
दिपत्रैर्वेष्टनमुत्तमं॥ पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत्॥ कल्कचूर्ण
द्रवाद्यास्तु देयाः स्वरसवद्बुधैः॥ सयपा॥ तत्कालाकृष्टकुटजत्वचं तंडुलवारि
णा॥ पिष्ट्वा चतुःपलमितां जंबूपल्लववेष्टितां॥ सूत्रेण बद्धां गोधूमपिष्टेन प
रिवेष्टितां॥ लिप्तां च घनपंकेन गोमयैर्वह्निना दहेत्॥ अंगारवर्णां च मृदं दृ
ष्ट्वा वह्नेः समुद्धरेत्॥ ततो रसं गृहीत्वा च शीतं क्षौद्रयुतं पिबेत्॥ जयेत्सर्वान
तीसारान्दुस्तरान्सुचिरोत्थितान्॥ कुटजपुटपाकः॥ कंडितं तंडुलं पलं ज

नागवला५

रुडकापत्र

कोरईमाया

सेऽष्टगुणितेन्निक्षिपेत्॥ भावयित्वा जलं ग्राह्यं देयं सर्वत्र कर्मसु॥ इति तंडुलजलं॥ अरलु
त्वक्कृतश्चैव पुटपाकोऽग्निदीपनः॥ मधुमोचरसाभ्यां चैव युक्तः सर्वातिसारनुत्॥ अ
रलुपुटपाकः॥ न्यग्रोधादिश्च कल्केन श्ररयेज्जौरे तित्तिरं॥ निरंत्रमुदरं सम्यक् पुटपा
केन तत्पचेत्॥ तत्कल्कस्य रसः क्षौद्रयुक्तः सर्वातिसारनुत्॥ तित्तिरपुटपाकः॥ पु
टपाकेन विपचेत्पक्वदाडिमीफलं॥ तद्रसो मधुसंयुक्तः सर्वातीसारनाशनः॥ दा
डिमीपुटपाकः॥ बीजपूराम्रजंबूनां पल्लवानि जटाः पृथक्॥ विपचेत्पुटपाकेन
क्षौद्रयुक्तश्च तद्रसः॥ छर्दिं निवारयेद्घोरां सर्वदोषसमुद्भवां॥ पल्लवपुटपाकः
॥ पिष्टानां वृषपत्राणां पुटपाकरसो हिमः॥ मधुयुक्तो जयेद्रक्तपित्तकासज्वरान्क्ष
यान्॥ वासापुटपाकः॥ पचेत्क्षुद्रां सपंचांगं पुटपाकेन तद्रसः॥ पिप्पलीचूर्णसं
युक्तः कासश्वासक्षयापहः॥ कंटकारीपुटपाकः॥ बिभीतकफलं किंचिद्धृतेनाभ्य
लेपयेत्॥ गोधूमपिष्टेनांगारैर्विपचेत्पुटपाकवत्॥ ततः पक्वं समुद्धृत्य त्वचं तस्य मु
खे निक्षिपेत्॥ कासश्वासप्रतिश्याय स्वरभंगाञ्जयेत्ततः॥ बिभीतकपुटपाकः॥

पकरि३

अरूस८

भटकटईयाढ

श्रीराम०
शा०ध०
२२

चूर्णं किंचिद्धृताभ्यक्तं शुण्ठ्याः स्वरसं उजेद्दलैः॥ वेष्टितं पुटपाकेन विपचेन्मंदवह्निना॥ तत
उद्धृत्य तत्चूर्णं ग्राह्यं स्वच्छं ततः सितासमं॥ तेन यातिशमं पीडा आमातीसारसंभवाः॥ शुं
ठीपुटपाकः॥ शुंठीकल्कं विनिक्षिप्य स्वरसे रंडमूलजे॥ विपचेत्पुटपाकेन तद्रसं स्नेह
द्र संयुतः॥ आमवातसमुद्भूतां पीडां जयति दुस्तरां॥ द्वितीयशुंठीपुटपाकः॥ सोरणं
कंदमाहाय पुटपाकेन पाचयेत्॥ सतैललवणस्तस्य रसश्चार्शोविकारनुत्॥ स्वर
णपुटपाकः॥ शरावसंपुटे दग्धं शृंगं हरिणजं पिबेत्॥ गव्येन सर्पिषायुक्तं हृच्छू
लं नश्यति ध्रुवं॥ मृगशृंगपुटपाकः॥ इतिश्रीदामोदरसूनुना शार्ङ्गधरेण विरचिता
यां संहितायां चिकित्सास्थाने स्वरसादिकल्पनाध्यायः॥ अथ क्वाथकल्पना॥ पानी
यं षोडशगुणं क्षुण्णे द्रव्यपले क्षिपेत्॥ मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितं॥
तज्जलं पाययेद्धीमानकोष्णं मृद्वग्निसाधितं॥ शृतः क्वाथः कषायश्च निर्यूहः सनि
गते॥ आहाररसपाके च संयाते द्विपलोन्मितं॥ वृद्धवैद्योपदेशेन पिबेत्क्वाथं सुपा
चितं॥ क्वाथे क्षिपेत्सितामंशैश्चतुर्थाष्टमषोडशैः॥ वातपित्तकफार्तेके विपरीतं

स्वरसे

१६

धनिया ३   श्रोठि मिरिच पीपरि १

शालिवन ५   गोखरु २

मधुस्मृतं ॥ जीरकं गुग्गुलं न्हारं लवणं च शिलाजतु ॥ हिंगु त्रिकटुकं चैव क्वाथे शाणे
न्मितान्क्षिपेत् ॥ न्हीरं घृतं गुडं तैलं मूत्रं चान्य द्रवं तथा ॥ कल्कं चूर्णादिकं क्वाथे निक्षिपेत्क
र्षसम्मितान् ॥ सयपा ॥ गुडूचीधान्यकारिष्ठपटोलकैः रक्तचंदनैः ॥ गुडूचीपिप्पलीमू
लं नागरैः पाचनो स्मृतं ॥ दद्याद्वातज्वरे पूर्णे लिंगे सप्तमवासरे ॥ गुडूच्यादिपाचनं वा
तज्वरे ॥ शालिपर्णीबलाद्रासागुडूचीसारिवा पचा ॥ अंसांका पंपिवेत्कोस्मं तीव्रवा
तज्वरच्छिदं ॥ शालिपर्ण्यादि ॥ काश्मरी सारिवा द्राक्षा त्रायमाणा मृता भयाः ॥ कषा
यः सगुडः पीतो वातज्वर विनाशनः ॥ काश्मर्यादिः ॥ कटफलेंद्रयवा वंबषातिक्तामु
स्तैः स्मृतं जलं ॥ पाचनं दशमे ह्नि स्यात्तीव्रे पित्तज्वरे बुधाः ॥ कटफलादि पाचनं पित्तज्व
रे ॥ यष्ट्या वासककुत्तिक्ता कैरातो धन्वयासकः ॥ प्रियंगुश्च कृतः क्वाथः सवां
शर्करया युतः ॥ पिपासा दाहपित्तात्स्रयुक्तं पित्तज्वरं जयेत् ॥ यष्ट्यादिः ॥ द्रा
क्षा हरीतकी मुस्तं कटुका कृतमालकैः ॥ पर्पटश्च कृतः क्वाथः पिबेत्पित्तज्व
रापहः ॥ तृष्णा मूर्च्छा दाहपित्तास्रशमनो भेदन स्मृतः ॥ द्राक्षादिः ॥ बीजपूरशि
फा पथ्या नागरं ग्रंथिकैः स्मृतं ॥ सन्हारं पाचनं श्लेष्मज्वरे द्वादशवासरे ॥ बी

हरय ३   सोठि १   मोथा ३   चिरायता ५   धवासा ५   पित्तपापरा ३

यवान्हार १

गुडूच्यादिगणः क्वाथः सर्वज्वरहरः स्मृतः ॥ दीपनो हृल्लास
रुचाद्दि वमि तृट् जित् ॥ गुडूच्यादिक्वाथः ॥ ३

सरिवन ५   कायफर ८   सोनापाठि   कटुकी ८

कचूर
बेतरासोहि१
चिरायता१ पदवर२२ कटुकी२

जधूराद्धि पाचनं श्लेष्मज्वरे ॥ भूनिंबनिंबपिप्पल्यः सटी शुंठी शतावरी ॥ गुडूची
बृहती चेति क्वाथो हन्यात्कफज्वरं ॥ भूनिंबादिः ॥ पटोलत्रिफलातिक्ता सटी वासा
अमृताभवः ॥ क्वाथो मधुयुतः पीतो हन्यात्कफसंभवं ज्वरं ॥ पटोलादिः ॥ पर्पटोऽमृ
ता विश्वा केशरैः साधितं जलं ॥ पंचभद्रमिदं ज्ञेयं वातपित्तज्वरापहं ॥ पंचभद्रं ॥ कु
लत्थशुंठीगुडूचीनां कषायः पौष्करस्य च ॥ कफवाताधिके पेयो ज्वरे वापि त्रिदोष
जे ॥ कासश्वासारुचिकरे पार्श्वशूलविधायिनी ॥ लघ्वक्षुद्रादिः ॥ आरग्वधकणा
मूलमुस्तातिक्ताऽभयाकृतः ॥ क्वाथः शमयति क्षिप्रं ज्वरं वातकफोद्भवं ॥ आ
मशूलप्रशमनो भेदी पाचनः ॥ आरग्वधादिः ॥ अमृतारिष्टकटुकामुस्ते
द्रयवनागरैः ॥ पटोलचंदनाभ्यां च पिप्पलीचूर्णयुक्तः ॥ अमृताष्टकमे
तच्च पित्तश्लेष्मज्वरापहं ॥ छर्द्यरोचकहृल्लासदाहतृष्णानिवारणं ॥ अमृताष्ट
कं ॥ कंटकारीद्वयं शुंठी धान्यकं सुरदारु च ॥ एभिः सृतं पाचनं स्यात्सर्वज्वरवि
नाशनं ॥ कंटकारीद्वयपाचनं सर्वज्वरेषु ॥ शालिपर्णी पृष्णिपर्णी बृहती देय

रक्तचंदन४
भटकटैया दुयं२ धनियार देवदारु२ भटकटैया२

बडीमे ८ क ३ आर
गुरुच्म२
चिरायता४
भटकटैया५
हरणः६ मोथा६
सोठि४
धमा२

हुंस२
बैतरासोहिर
पित्तपापरा
नागरमोथा३
पिपरामूल७
अमलतास९
निवका छाल५

गुडूची १ हरड़ ५

मुरब्बा

गंभारी १ सोनापाठा १

गोक्षुरैः॥ बिल्वोऽग्निमंथः स्योनाकः काश्मरी पाटलायुतः॥ दशमूलमिति ख्यातं क्वथितं तज्ज
लं पिबेत्॥ पिप्पलीचूर्णसंयुक्तं वातश्लेष्महरं परं॥ सन्निपातज्वरं हंति सूतिकारोगनाशनं
॥ शोथश्चैतन्यमस्वेदकासस्वासविकारजित्॥ हृत्कंठग्रहपार्श्वार्तितंद्रामस्तकशूलहृत्
॥ दशमूलं सन्निपाते ज्वरे॥ अभयामुस्तधान्याकरक्तचंदनपद्मकैः॥ वासकेंद्रयवोशी
रगुडूचीकृतमालकैः॥ पाठानागरतिक्ताभिः पिप्पलीचूर्णयुक्तः स्मृतः॥ पिबेत्त्रिदोषज्वर
जित् पिपासादाहकाशजित्॥ प्रलापश्वासतंद्राघ्नं दीपनं पाचनं परं॥ विरामूत्रानिलवि
ष्टंभवमीशोषारुचिच्छिदं॥ अभयादिः सन्निपातज्वरे॥ किरातकटुकामुस्तधान्येंद्रयवना
नागरैः॥ दशमूलमहादारुगजपिप्पलिकायुतैः॥ कृतः कषायः पार्श्वार्ति सन्निपातज्व
रं जयेत्॥ कासश्वासवमीहिक्कातंद्राहृद्ग्रहनाशनः॥ अष्टादशांगः॥ कट्फलांबुद
भार्गीभिधान्यरोहिसपर्पटैः॥ वचाहरीतकीशृंगीदेवदारुमहौषधं॥ क्वाथः कास
ज्वरं हंति श्वासश्लेष्मागलग्रहान्॥ कट्फलादिः॥ क्वाथो जीर्णज्वरं हंति गुडूच्याः
पिप्पलीयुतः॥ तथा पर्पटकक्वाथः पित्तज्वरहरः परः॥ जीर्णज्वरे॥ निदिग्धिका
ऽमृताशुंठीकषायं पाययेद्भिषक्॥ पिप्पलीचूर्णसंयुक्तं श्वासकासार्दितापहं॥ पी

हरड़ ४

देवदारु

कुलंजन

कुरैया ४

पद्माख ४

इन्द्रजव ४

चिरायता ७

कायफल ५

मोथा ५

सुगंधबाला ४

पित्तपापड़ा ४

काकड़ासिंगी ४

सोंठि ४

लघुभटकटैया

अर्दितं रोगविशेषत वातरोगे पठितं १

मधु४ अनकाप ठूसर२ मूल२

विल्वतरवर१ चिरायता२ भटकटैया१ ब्रह्मदंडी२

नुसारुचिवेश्वर्यं सूरूलजीर्णज्वरछिदं ॥ निदिग्धिकादिः जीर्णज्वरे ॥ गुडूचीधान्यकं शुंठीभिंगुडू
चीमुस्तपद्मकैः ॥ रक्तचंदनमूर्वानिंबपटोलवृषपौष्करैः ॥ कटुकेंद्रयवारिष्टभार्गीपर्पट
कैः समैः ॥ क्वाथं प्रातर्निषेवेत सर्वशीतज्वरछिदं ॥ वृहत्क्षुद्रादिः शीतज्वरे ॥ मुस्तानुग्राम्लता
कुंठीधात्रीक्वाथः समान्हिकः ॥ पिप्पलीचूर्णसंयुक्तो विषमज्वरनाशनः ॥ मुस्तादिः विषम
ज्वरे ॥ पटोलत्रिफलानिंबद्राक्षाशम्याकवासकैः ॥ क्वाथः सितामधुयुतो जयेदैकाहिकं
ज्वरः ॥ पटोलादिः ऐकाहिकज्वरे ॥ गुडूचीधान्यमुस्ताभिश्चंदनोशीरनागरैः ॥ कृतं क्वाथं पि
बेन्मांद्रसितायुक्तं ज्वरातुरः ॥ तृतीयज्वरनाशाय तृष्णादाहनिवारणं ॥ गुडूच्यादिस्तृ
तीयज्वरे ॥ देवदारुशिवावासाशालिपर्णी महौषधैः ॥ धात्रीयुक्तैः स्रुतं शीतं दद्यान्मधुसिता
युतं ॥ चतुर्थकज्वरश्वासमंदानलेतृषा ॥ देवदार्व्यादि चातुर्थकज्वरे ॥ ज्वराधिकारः ॥ गुडूचीधा
न्यकोशीरशुंठीवालकपर्पटैः ॥ विल्वप्रतिविषापाठारक्तचंदनवत्सकैः ॥ किरातमुस्तेंद्रयवैः
क्वथितं शिशिरं पिवेत् ॥ सन्निपातं रक्तपित्तं ज्वरातीसारनाशनं ॥ वृहद्गुडूच्यादिर्ज्वरातीसा
रे ॥ नागरं कुटजो मुस्तं अमृतातिविषातथा ॥ एभिः कृतं पिवेत्क्वाथं ज्वरातीसारनाशनं ॥
धान्यं वालकं विल्वादि नागरैः साधितं जलं ॥ आमशूलहरं ग्राहि दीपनं पाचनं परं ॥ धान्य

मोथा२
अवरा४
आमिलताश
परवर१
अनंघा५
हरड़१
सुगंधवाला४

निंवछाल२
ठूसर५
गाठरकीजर६
सोठ६
धात्रीफल६
चिरायता४

सुगंधवाला१ चिरायता४ कासे५ ठूस६ अतीस४ कोरैयाकरछाल४

मोथा१ अतीस२ विल्वपत्र४ सोनापाठा४

कोरइया २ अतीस २ धाइफूल २ सुगंधवाला ३
धवफूल १ सुगंधवाला २ रक्तकरमूल १
धनीया १ सोंठि १

पंचकं ॥ धान्यनागरजः क्वाथः पाचनो दीपनस्तथा ॥ एरंडमूलयुक्तेश्च जयेद्रामानिलव्यथां ॥ धान्यनागरं ॥ वत्सकातिविषाबिल्वमुस्तवालकजः स्मृतः ॥ अतीसारं जयेत्साम चिरजं रक्तशूलजित् ॥ वत्सकादिः ॥ कुटजातिविषापाठाधातकीलोध्रमुस्तकैः ॥ ह्रीवेरदाडिमयुतैः कृतः क्वाथः समाग्निकः ॥ पयोमोचरसेनैव कुटजाष्टकसंज्ञकः ॥ अतीसाराञ्जयेद्धोरान् रक्तशूलामदुस्तरान् ॥ कुटजाष्टकः ॥ ह्रीवेरं धातकी लोध्र पाठा लज्जालु वत्सकैः ॥ धान्यकातिविषामुस्तागुडूची बिल्वनागरैः ॥ कृतः कषायः शमयेदतीसारं चिरोत्थितं ॥ अरोचकामशूलास्रज्वरघ्नः पाचनः स्मृतः ॥ ह्रीवेरादिः ॥ धातकीबिल्वलोध्राणि वालकं गजपिप्पली ॥ एभिः कृतं सृतं शीतं शिशुभ्यः क्षौद्रसंयुतं ॥ प्रदद्याद्बलवद्वा सर्वातीसारशांतये ॥ धातक्यादिः ॥ शालिपर्णीबला बिल्वधान्यशुंठीकृतः सृतः ॥ आध्मानशूलसहितं वातजां ग्रहणीं जयेत् ॥ शालिपर्ण्यादिः ॥ गुडूच्यतिविषाशुंठीमुस्तैः क्वाथः कृतो जयेत् ॥ आमानुसक्तां ग्रहणीं ग्राही पाचनदीपनः ॥ चातुर्भद्रकं ॥ यवधान्यपटोलानां सन्तोऽद्रशार्कराः ॥ योज्यः क्वथितसार्द्रेषु बिल्वाम्रास्थिभवस्तथा ॥ इंद्रयवादिः ॥ त्रिफलादेवदारुश्च मुस्ता मूषककर्णिका ॥ शिग्रुरेतैः कृतः क्वाथः कामलापांडुतान्नपा ॥ फलत्रिकादिः ॥ उनमनेवामयानिंब दार्वीत्रिका पटोलकैः ॥ गुडूचीनागर

पिप्पलीचूर्णसंयुतः ॥ विडंगचूर्णयुक्तश्च कृमिघ्नः कमरोग्रहा ॥ त्रिफलादिः ॥ फलत्रिसहिजनकी गुठर २ मूसाकर्णीका २
कामलातिक्त निंबकेरातवासकैः ॥ जयेन्मधुयुतः क्वाथः रक्तपि गहापूना १ दार्वी हलदर दारी १ कडकी १

अतीस
मधु ४
सुगंधवाला ५
धवफूल ७
अतीस ४
इंद्रयव ३

पठानीलोध ३
अनारफूल ३
लजालु ५
कायैफ ५
अतीस ५
मडोसन २
आम्रकी गुठली बेलकी गुठली ३

सोठि ५ ३ कूसर २

युतैः क्वाथो गोमूत्रसंयुतः॥ पांडुकासोदरश्वासशूलसर्वांगशोथहा॥ पुनर्नवादिः॥ वासा क्षुद्राभयाक्वाथः पीतः सक्षौद्रशर्करः॥ निहंति रक्तपित्तार्त्तिश्वासकासान् सुदारुणान्॥ रक्तपित्तं क्षयं कासं श्लेष्मपित्तज्वरं तथा॥ केवलो वासकक्वाथः पीतः क्षौद्रेण नाशयेत्॥ वासा क्षुद्रामृताक्वाथः क्षौद्रेण ज्वरकासहा॥ कासघ्नः पिप्पलीचूर्णयुक्तः क्षुद्राश्रृतस्तथा॥ क्षुद्राकुलत्थवासाभिर्नागरेण च साधितः॥ क्वाथः पौष्करचूर्णाढ्यः कासश्वासान्निवारयेत्॥ रेणुकं पिप्पलीक्वाथो हिंगुकल्केन संयुतः॥ पानाद्वातिपं चाशिति हिक्कां नाशयति ध्रुवम्॥ ~~रेणुकावीज~~ विल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः॥ जयेत्त्रिदोषजां छर्दिं पर्प्पटः पित्तजां तथा॥ त्रिफलापुष्करं च एणी घोरशूलसूतां जयेत्॥ गधुसी केवलं क्वाथः शेफाली पत्रजस्तथा॥ रास्नामृतामहादारुनागरैरंडजैः स्तृतः॥ सप्तधातुगते वाते सामे सर्वांग पिचेत्॥ रास्नापंचकं॥ रास्नागोक्षुरकैरंडदेवदारुपुनर्नवाः॥ गुडूच्यारग्वधश्चैव क्वाथमेषां विपाचयेत्॥ शुंठीचूर्णेन संयुक्तं पिबेज्जंघाकटिग्रहे॥ पार्श्वपृष्ठोरुपीडायामामवाते सुदुस्तरे॥ रास्नासप्तकं॥ रास्ना द्विगुणभागा स्यादेकभागास्ततः परे॥ धन्वयासवलैरंडदेवदारुसटीवचावासको नागरं पथ्या चव्यामुस्तपुनर्नवाः॥ गु

धमासा १ कचूर २ गडूच्या १
वरियारी १

कंटकारी ४
कुलथी ५
रेणुकावीज ६
अपवर्ग
स्वल८

पित्तपापरा ७
सफालीनो रस
ओद
सप्तधातुगते
इति सप्तधातु
५

भटकटैयार अमिलतास१

विधारा१ सउफ१ जवाइन१ शाहिर अतीस१ पीपरी१

रुचीवृहस्तारश्चवंशातउव्याचगोक्षुरुः॥ अश्वगंधाशतिविषाकृतमालःशताबरी॥ कृस्मी
सेलचरस्त्रेवधान्यकंचलतीदयं॥ एभिः कृतंपिवेतक्काथंशुंठी चूर्णेनसंयुतं॥ कृस्ना चूर्णेनवा
योज्यंयोगराजेनवाथवा॥ अजमोदाहिंगोवापितेलेनेरंडजेनवा॥ सर्वांगकंपेकुब्जत्वे पन्हाघा
तेववाहुके॥ गध्रस्यामामवातेच श्लीपदेचापतानके॥ अंत्रवृद्धौतथाध्मानेजंघाजानुगदे
र्दिते॥ शुक्रामयेमेढ्ररोगेवंध्यायोन्यामयेषुच॥ मलारास्नाहिरास्वातो व्रणगर्भकार
णं॥ मलारास्नादिः॥ एरंडोवीजश्चरस्वगोक्षुरुकल्तीदयं॥ अश्मभेदस्तपाविल्वस्तन्मूलै
:कृतःस्यजः॥ एरंडतैलहिंग्वाधःसयवक्षार सैंधवः॥ स्तनकंठकटीमेढ्रहृदयोत्थांव्यथां
जयेत्॥ एरंडसप्तकः॥ ~~कोपी पानीमा~~ नागरैरंडजंक्काथः क्काथरेकयवस्यच॥ लिंगसोवर्च
लोपेतो वातशूलनिवारणः॥ त्रिफलारग्वधक्काथःशर्करान्तोद्रसंयुतः॥ रक्तपित्त
तनोदाहः पित्तशूलनिवारणः॥ एरंडमूलद्विपलं जले षड्गुणितेपचेत्॥ तत्क्काथो षावं
शूकाघ्नः पार्श्वहृत्कफशूलहाः॥ दशमूलकृतःक्काथः सयवक्षार सैंधवः॥ हृद्रोगो
गुल्मशूलानिकासश्वासंचनाशयेत्॥ हरीतकीउरालंभाकृतमालकगोक्षुरैः॥ पा

जवासा१ अमिलतास१

गुग्लं१ विजौरानेह१

पीपरि१ पाषाणभेद२ कालानोन५ मधु४ यवान्हार१

श्रीराम।
शा.ध.
२६

अरलु २

इलाइची ५
उखरू ५

चिरायता

बट २

पा

रि ३

श्रीर २ अर्जुन २ छ २ रेणुका बात ५ मेरा ... पत्र मवन श्री वृक्ष गुलु खारी २ अर... २

ज्येष्ठीमधु: ५ मधु: १

पाषाणभेदसहितैः क्वाथो माक्षिकसंयुतः॥ विबंधे मूत्रकृच्छ्रे च सदाहे सरुजे हितः॥ हरी
तक्यादिः॥ वीरतरुर्वृन्दावंदाकासः सहचरत्रयं॥ कुशाद्वयं नलो गुंद्रा वसुकः पुष्पोऽग्निमथकः॥ मूर्वा पा
षाणभेदश्च शोणाको गोक्षुरस्तथा॥ अपामार्गश्च कमलं ब्राह्मी चेति गणो वरः॥ वीरतर्वा
दिरित्युक्तः शर्कराश्मरिकृच्छ्रहा॥ मूत्राघातं वायुरोगान्नाशयेन्निखिलानपि॥ वीरतर्वादिः॥
कूस पिपरी
एलामधुकगोकंटरेणुकेरंडवासकैः॥ कृष्णाश्मभेदसहितैः क्वाथः स्यात्साधितः॥ शिलाज
तुयुतः पेयः शर्कराश्मरिकृच्छ्रहा॥ एलादिः॥ समूलगोक्षुरं क्वाथः सितामाक्षिकसंयुतः॥ नाश
त्रिफला देव
येन्मूत्रकृच्छ्राणि तथा चोष्णसमीरणं॥ वरादार्वीदेदारूणां क्वाथः क्षौद्रेण मेहहा॥ वत्सक
त्रिफलादार्वीमुस्तावीजकजस्तथा॥ फलत्रिकदार्वीणां विशालायाः सृतं पिबेत्॥ निशाक
कूस
ल्कयुतं सर्वप्रमेहविनिवृत्तये॥ फलत्रिकादिः॥ दार्वीरसांजनमुस्ताभल्लातः श्रीफलं वृषः॥
केरातश्च पिबेदेषां क्वाथं शीतं समाक्षिकं॥ जयेत्सशूलं प्रदरं पीतश्वेतासितारुणं॥ दार्व्यादिः॥
बेत बेरि
न्यग्रोधप्लक्षकोशाम्रवेतसौ वदरी तुणिः॥ मधुयष्टीप्रियालश्च लोध्रद्वयउदुंबरैः॥ पिप्पल
श्च मधूकश्च तथा पालाशपिप्पलः॥ शल्लकी तिंडकी जंबूद्वयमाम्रतरुः शिवा॥ कदंबककुभौ
चैव भल्लातकफलानि च॥ न्यग्रोधादिगणः क्वाथ यथालाभं च कारयेत्॥ अयं क्वाथो मह

अवरा का छाल २ बिजयशार का छाल ६ मोषा १ हरीतकी २
अरूसा ५ छाल २
गूलरि की छाल २
सरखहार २ नेलर ५

चूर्णिहार २

हरदि ६

त्रिनी ६
मधु: ६
कोरइया १

दारुहरन ६

इनार ६

ककोर २

२६

ग्याहीवुरणमेंरविषापहः॥ बिल्वोग्निमंथश्योनाकः काश्मर्यः पाटलास्तथा॥ क्वाथ
एषांजयेन्मेहोहोभग्नंचसाधयेत॥ योनिदोषहरो हालमेहोहौद्रेण संयुतः॥ न्हौ
द्रेण त्रिफलाक्वाथः पीतो मेहहरः स्मृतः॥ शीतीभूतं मधु तोयं स्त्रावमेहो हं लेहोद्र संयु
तं॥ चव्यचित्रकविश्वाणां साधितो देवदारुणा॥ क्वाथः त्रिफलाचूर्णयुतो गोमूत्रे रोगह
रान्जयेत॥ पुनर्नवामृता दारु पथ्या नागर साधितः॥ गोमूत्रगुगलयुतः क्वा
थः शोफोदरापहः॥ पथ्यारोहितकक्वाथं यवक्षारकणायुतं॥ पिबेत्स्नातयकृत्प्ल
प्लीहगुल्मोदरनिवृत्तये॥ पुनर्नवादारुनिशानिशाशुंठीहरीतकी॥ गुरूचीचि
त्रकोभार्ङ्गीदेवदारुकृतेः स्मृतः॥ पाणिपादोदरस्थ स्वशासशोथं निवारयेत॥ फल
त्रिकोद्भवं क्वाथं गोमूत्रेणैव पाचयेत॥ वातश्लेष्मकृतं ह्नीतशोथं वर्षणसंभवं॥ रास्ना
मृता बलायष्ठीगोक्षुरदेरंडजः स्मृतः॥ एरंडतैलसंयुक्तः क्वाथः विमंत्रभवं जयेत॥
कांचनारत्वचः क्वाथः शुंठीचूर्णेन नाशयेत॥ गंडमालां तथा क्वाथः न्होद्रेण त्वचः॥

कचनार १

वरुणः १

वोपरिमरिचदद
मेढाशंगी५

सहिजनकाछाल२

साखोटवल्कलंकाथं गोमूत्रेण युतं पिबेत् ॥ श्लीपदानां विनाशाय मेदोदोषनिवृत्त
ये ॥ पुनर्नवावरुणयोः क्वाथोंतर्विद्रधिं जयेत् ॥ तथा शिग्रुभवः क्वाथो हिंगुसैंधवसंयु
तः ॥ वरुणादिगणः क्वाथम पक्वमध्यविद्रधौ ॥ ऊषकादिरजोयुक्तं पिबेत्तशमनहेतवे ॥
सपपा ॥ वरुणो बकपुष्पश्च बिल्वापामार्गचित्रकाः ॥ अग्निमंथद्वयं शिग्रुद्वयं तद्व
त्तीक्ष्णयं ॥ सैरेयकत्रयं मूर्वा मेषशृंगी किराततः ॥ अजशृंगी च बिंबी च करंजश्च श
तावरी ॥ वरुणादिगणः क्वाथः कफमेदोहरः स्मृतः ॥ हंति गुल्मं शिरःशूलं तथाभ्यं
तरविद्रधीन् ॥ वरुणादिः ॥ अथ भगंदरे ॥ खदिरत्रिफलाक्वाथो महिषीघृतसंयुतः
॥ विडंगचूर्णयुक्तश्च भगंदरविनाशनः ॥ पटोलत्रिफलानिंबकिराततखदिरास
नैः ॥ क्वाथः पीतो जयेत्सर्वानुपदंशान्सगुग्गुलुः ॥ अमृतैरंडवासानां क्वाथ ए
रंडतैलयुक् ॥ पीतः सर्वांगसंचारिवातरक्तं जयेद्ध्रुवं ॥ पटोलत्रिफलातिक्ता
गुडूची च शतावरी ॥ एतत्क्वाथो जयेत्पीतो वातास्रं दाहसंयुतं ॥ पित्तोत्तरे वा पटो
लादिः ॥ क्वाथोऽवल्गुजचूर्णाढ्यो धात्रीखदिरसारयोः ॥ जयेत्सश्वित्रं नित्यं

अगीरू५ (left margin)
दूर५ (left margin)

अरणी५
कटसरैया५
ममरी५
कुडू५
आसन५

वकुची१

खयरसार१

शिवत्रं पथ्याशिरीषीन्दुकणं ॥ अवल्गुजादिः ॥ मंजिष्ठात्रिफलातिक्ता वचादारुनिशामृ
ता ॥ निंबश्चैषां कृतः क्वाथो वातरक्तविनाशनः ॥ पामाकापालिकाकुष्ठरक्तमंड
लजिन्मतः ॥ लघुमंजिष्ठादिः ॥ मंजिष्ठामुस्तकुटजो गुडूचीकुष्ठनागरैः ॥ भार्ङ्गीक्षु
द्रावचानिंबनिशाद्वयफलत्रिकैः ॥ पटोलकटुकामूर्वाविडंगासनचित्रकैः ॥ शता
वरीत्रायमाणाकृष्णेन्द्रयववासकैः ॥ भृंगराजमहादारुपाठाखदिरचंदनैः ॥ त्रिवृ
द्वरुणकैरातवाकुचीकृतमालकैः ॥ शाखोटकमहानिंबकरंजातिविषाजलैः ॥
इंद्रवारुणिकानंतासारिवापर्पटैः समैः ॥ एभिः कृतं पिबेत्क्वाथं कणगुग्गुलसं
युतं ॥ अष्टादशोघ्र कुष्ठानि वातरक्तार्दितं[?] [illegible] ॥ उपदंशश्लीपदे च प्रसुप्तौ पक्षघा
तकः ॥ मेदोदोषे नेत्ररोगे मंजिष्ठादिः प्रशस्यते ॥ वृहन्मंजिष्ठादिः ॥ पथ्याक्षधात्रीभू
निंबैर्निशानिंबामृतायुतैः ॥ कृतः क्वाथः षडंगोयं सगुडः शीर्षशूलहृत् ॥ भ्रूशंख
कर्णशूलानि तत्पार्श्वशिरसो रुजं ॥ सूर्यावर्त्तं शंखकं च दंतपातं च तद्रुजं ॥ नक्तांध्यं

विद्युत्क्रांता[?]

चता[?] ५
चूर्ण[?] ४
वकाइन ६
सरखवा[?] ६
वेहरा ३

ईश्वर जवकपुरीर

मोपार ॠत ह२य१

पटलं शुक्रं च नन्तुः पीडां व्यपोहति॥ पथ्यादिः॥ वासाविश्वामृतादार्वीरक्तचंदनचित्रकैः॥ भू
निंबनिंबकटुकापटोलत्रिफलाम्बुदैः॥ यवेंद्रकलिंगकृष्णजैः क्वाथः सर्वाक्षिरोगहा॥ वै
श्वानरीं पीनसं श्वासं नाशयेदुरसः क्षतं॥ वासादिः॥ अमृतात्रिफलाक्वाथः पिप्पलीचू
र्णसंयुतः॥ सक्षौद्रः शीतलो नित्यं सर्वनेत्रव्यथां जयेत्॥ अमृतादिः॥ अश्वत्थोदुं
बरप्लक्षवटवेतसजः स्मृतः॥ व्रणशोथोपदंशानां नाशनः क्षालनात्स्मृतः॥ इति क्वा
थः॥ इति श्री० चिकित्सानेकल्पनाध्यायः॥ अथ प्रमथ्या॥ प्रमथ्या प्रोच्यते द्रव्यप
लात्कल्कीकृतात्सृतात्॥ तोयेष्टगुणिते तस्याः पानमाहुः पलद्वयं॥ सयष्टा॥ मु
स्तकेंद्रयवैः सिद्धा प्रमथ्या द्विपलोन्मिता॥ सुशीता मधुसंयुक्ता रक्तातीसारना
शिनी॥ अथ यवागूः॥ साध्यं चतुःपलं द्रव्यं चतुःषष्टिपलेऽम्भसि॥ तत्क्वाथेनार्द्ध
शिष्टेन यवागूं साधयेद्घनां॥ सयष्टा॥ आम्राम्रातकजंबूत्थकषाये विपचेद्बु
धः॥ यवागूं शालिभिः सिद्धां क्षौद्रां तां तु ग्रहणीं जयेत्॥ अथ यूषः॥ कल्कद्रव्यपलं

आ प्रकाछ्वालर आप्राकाछ्वालर

व३२२

शुंठीपिप्पलीचार्द्रकार्षिकी॥ वारिप्रस्थेन विपचेत्स क्वाथो यूष उच्यते॥ सयषा॥ कुलत्थय
वकोलैश्च मुद्गमूलकशुष्ककैः॥ शुंठीधान्याकयुक्तैश्च यूषः श्लेष्मानिलापहः॥ सप्तमु
ष्टिकइत्येष सन्निपातज्वराञ्जयेत्॥ ~~रुचि~~ आमवातहरः कंठहृद्वक्त्राणां विशोधनः॥ स
प्तमुष्टिकयूषः॥ अथ पानादिकल्पना॥ द्रव्यं पलं साधयेच्चतुःषष्टिपलेजले॥ अ
र्धशिष्टं च तद्देयं पानभक्तादिसंविधौ॥ सयषा॥ उसीरपर्पटोदीच्यमुस्तनागरचंद
नैः॥ जलं संस्कृतं हिमं पेयं पिपासाज्वरनाशनं॥ अथोष्णोदकविधिः॥ अष्टमेनांश
शेषेण चतुर्थेनार्धकेन वा॥ अथवा क्वाथनेनैव सिद्धमुष्णोदकं वदेत्॥ श्लेष्मा
मवातमेदोघ्नं वस्तिशोधनपाचनं॥ कासश्वासज्वरान्हंति पीतमुष्णोदकं निशि॥ अथ क्षी
रपाकविधिः॥ क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणं॥ क्षीरावशेषं तत्पीतं शू
लमामोद्भवं जयेत्॥ तंडुलैश्चतुर्माषैश्च तिलैर्वा साधिता हिता॥ यवागूर्ग्राहिणी
बल्या तर्पणी वातनाशिनी॥ इति यवागूः॥ अथ विलेपी॥ विलेपी घनसिक्थ्यां
च सिक्थानीरचतुर्गुणे॥ विलेपी तर्पणी हृद्या मधुरा पित्तनाशिनी॥ इति विलेपी॥

कुरंथ बा सा ५

द्रवाधिका स्वल्पसिक्था चतुर्दशगुणे जले ॥ सिद्धा पेया बुधैर्ज्ञेया यूषः किंचिद्घनः स्मृ
तः ॥ पेया लघुतरा ज्ञेया ग्राहिणी धातुपुष्टिदा ॥ यूषो बल्यस्ततः कंठ्यो लघुः पाके कफा
पहः ॥ इति पेयायूषौ ॥ जले चतुर्दशगुणे तंडुलानां चतुष्पलं ॥ विपचेत्स्रावयेन्मंड
स भक्तो मधुरो लघुः ॥ इति भक्तः ॥ अथ मंडः ॥ नीरे चतुर्दशगुणे सिद्धो मंडस्त्वसि
क्थकः ॥ शुंठी सैंधवसंयुक्तः पाचनो दीपनः स्मृतः ॥ इति शुद्धमंडः ॥ धान्यत्रिकटु
सिंधूत्थयुक्तस्तक्रेणायोजितः ॥ भृष्टश्च हिंगुतैलाभ्यां स मंडोऽष्टगुणः स्मृतः ॥ दीप
नः प्राणदो बस्तिशोधनो रक्तवर्द्धनः ॥ ज्वरजित्सर्वदोषघ्नो मंडोऽष्टगुण उच्य
ते ॥ इत्यष्टगुणमंडः ॥ सुकंडितैस्तथा भृष्टैर्वाट्यमंडो यवैर्भवेत् ॥ कफपित्तहरः कं
ठ्यो रक्तपित्तप्रसादनः ॥ इति वाट्यमंडः ॥ लाजैर्वा तंडुलैर्भृष्टैर्लाजमंडः प्रकी
र्तितः ॥ श्लेष्मपित्तहरो ग्राही पिपासाज्वरजिन्मतः ॥ इति लाजमंडः ॥ इति श्री॰
चिकित्सास्थाने क्वाथादिकल्पनाध्यायः ॥ अथ फांटकल्पना ॥ क्षुण्णे द्रव्य
पले सम्यक् जलमुष्णं विनिःक्षिपेत् ॥ मृत्पात्रे कुडवोन्मानं ततस्तु स्रावयेत्

बोलन८

भृजितिंग६

यवगुरी५

पारभरि१

मनक्का २ जेष्ठीमधुः २ फालसं २ कमलकाजर २

घिनी १ गभारी २

मधुना ३

पानं ॥ सस्यात्खर्जूरिकाद्यः फांटस्तन्मानं द्विपलोन्मितं ॥ मधुसितालाउशीरं सुकाष्ठवत्तत्रनिःक्षि
पेत् ॥ सयथा ॥ मधूककषायमधुकं चंदनं सपरूषकं ॥ मृणालं कमलं लोध्रं कंभारी नागकेस
रं ॥ त्रिफला सारिवा द्राक्षा लाजा कोष्णजले क्षिपेत् ॥ सितामधुयुतः पेयः फांटो वा सोऽहि
मोऽथवा ॥ वातपित्तज्वरं दाहं तृष्णा मूर्छा मतिभ्रमान् ॥ रक्तपित्तं मदं हन्यान्नात्र कार्या
विचारणा ॥ इति मधूककषायादिफांटः ॥ आम्रजंबूकिशलयैः वटशुंगप्ररोहकैः ॥
उशीरेण कृतः फांटः सक्षौद्रो ज्वरनाशनः ॥ पिपासाछर्दितीसारान् मूर्छां जयति दु
स्तरां ॥ आम्रादिफांटः ॥ मधूककषायं कंभारी चंदनो सीरधान्यके ॥ द्राक्षासाचकृ
तः फांटः शीतः शर्करयायुतः ॥ तृष्णापित्तहरः प्रोक्तो दाहमूर्छाभ्रमान्जयेत् ॥ ल
घुमधूककषायादिफांटः ॥ अथ मंथः ॥ मंथोपि फांटभेदः स्यात्तेन चात्रैव कथ्यते ॥
सयथा ॥ जले चतुष्पले शीते क्षुण्णं द्रव्यपलं क्षिपेत् ॥ मृत्पात्रे मंथयेत्सम्यक्त
स्माच्च द्विपलं पिबेत् ॥ सयथा ॥ खर्जूरदाडिमीद्राक्षा तिंतिलीकाम्लिकोऽमलैः
लैः ॥ सपरूषैः कृतो मंथः सर्वमद्यविकारनुत् ॥ खर्जूरादिमंथः ॥ क्षौद्रउष्णक्वा

सारिवनर २

वटकुनगप्रोह ५

आवरा २

फालसा १ छोहारा २ आमिली २

मसूरसक्तु १ जलं १

मसूराणां सक्तवो वा तद्वि मांभसा॥ मथितावारयंत्याशु छर्दिं दोषत्रयोद्भवां॥ मसूरादिमंथः॥
भावितैः शीतनीरेण सघृतैर्यवसक्तुभिः॥ नातिसांद्रद्रवैर्मंथः तृष्णादाहास्रपित्तहा॥
सक्तुमंथः॥ इतिश्री० चिकित्सास्थाने फांटादिकल्पनाध्यायः॥ अथ हिमकल्पना॥
क्षुण्णं द्रव्यपलं सम्यक्षड्भिर्नीरपलैः प्लुतं॥ निशोषितं हिमः सस्यात्तथा शीतक-
षायकः॥ तन्मानं फांटवद्ज्ञेयं सर्वत्रैवेष निश्चयः॥ तद्यथा॥ आम्रजंबूचककुभं
चूर्णीकृत्य जले न्निक्षिपेत्॥ हिमं तस्य पिबेत्प्रातः सक्षौद्रं रक्तपित्तजित्॥ आम्रादि
हिमः॥ मरिचं मधुयष्टी च ककोडुंवरिपल्लवं॥ नीलोत्पलं हिमस्तद्वत्तृष्णाछर्दिनि
वारणं॥ मरीचादिहिमः॥ नीलोत्पलं वलाद्राक्षा मधूकं मधुकं तथा॥ उशीरं पद्म
कं चैव काश्मरी च परूषकं॥ एतत्शीतकषायश्च वातपित्तज्वरान्जयेत्॥ सप्र
लापभ्रमच्छर्दिमोहतृष्णानिवारणं॥ ~~अमृतादिहिमवासादिहिमश्च॥ प्राग्~~
नीलोत्पलादिहिमः॥ अमृतायाहिमः पेयो जीर्णज्वरहरः स्मृतः॥ वासा
याश्च हिमः कासं रक्तपित्तज्वरान्जयेत्॥ अमृतादिहिमवासादिहिमश्च॥

उदकाजर६
गंभारी४
रस २

प्रातः सशर्करः पेयो हिमो धान्याकसंभवः ॥ अंतर्दाहं तथा तृष्णां जयेत्स्रोतोविशोध
नः ॥ धान्यादिहिमः ॥ धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः ॥ रक्तपित्तज्वरं दाहं
तृष्णां शोषं च नाशयेत् ॥ धान्यादिहिमः ॥ इति श्री० चिकित्सास्थाने हिमकल्पनाध्या
यः ॥ अथ कल्ककल्पना ॥ द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् ॥ प्रक्षेपावाप
कल्कास्ते तन्मानं कर्षसंमितं ॥ कल्के मधु घृतं तैलं देयं द्विगुणमात्रया ॥ सितां गुडं समं
दद्यात् द्रवा देयाश्चतुर्गुणाः ॥ सयष्या ॥ त्रिवर्ष्या पंचवर्ष्या वा सप्तवर्ष्या पवाक
एण ॥ पिबेत् पिष्ट्वा दशाहानि तया चैवापकर्षयेत् ॥ एवं विंशाहिनं सिद्धं पिप्पलीवर्द्ध
मानकं ॥ अनेन पांडुवातास्रकासश्वासारुचिज्वराः ॥ उदरार्शः क्षयश्लेष्मवाता
न श्यंत्युन्नोष्यनः ॥ पिप्पलीवर्द्धमानं ॥ लेपान्निम्बदलैः कल्को व्रणशोधनरोपणः
॥ भक्षणात्छर्दिकुष्टानि पित्तश्लेष्मकृमीन्जयेत् ॥ महानिंबजटाकल्को गृध्रसीना
शनः स्मृतः ॥ शुंठ्याः कल्को रसोनस्य तिलतैलविमिश्रितः ॥ वातरोगान्जयेत्ती
व्रान्विषमज्वरनाशनः ॥ पद्मकंहोरसोनस्य गुटिकानिस्तुषीकृता ॥ पाटयित्वा

लैं ५
पीपर ६

निंबपत्रैः ४

वकाइनर

लहसुनर लहसुन १

क्ष्ाम्लानू नर

६२१ जवारनर

वुमध्यस्थं दृढीकुर्यात्तस्कुरं ॥ तद्गंधनाशाय नात्रौतक्रे विनिःक्षिपेत ॥ अपनी
यचतन्मध्यात्शिलायांपेषयेत्ततः ॥ तन्मध्ये पचमाशेन चूर्णमेषां विनिःक्षिपेत
॥ सोवर्चलं यवानीं च भर्जितं हिंगुसैंधवं ॥ कटुत्रिकं जीरकं च समभागानि कारयेत
॥ एकीकृत्य ततः सर्वं कल्कं कर्षप्रमाणतः ॥ खादेदग्निबलापेक्षी अनुदोषाद्य
पेक्षया ॥ अनुपानं ततः कुर्यात् एरंडशृतमन्वहं ॥ सर्वांगैकांगतं वातं मर्दितं चा
पतंत्रकं ॥ अपस्मारमपोन्माद मूत्रस्तंभं च गृध्रसी ॥ उरः पृष्ठकटीपार्श्वकु
क्षिपीडां क्रिमीं जयेत् ॥ अजीर्णमातपं रोषमतिनीरं पयो गुडं ॥ रसोनमश्न
न्पुरुषस्त्यजेदेतन्निरंतरं ॥ मद्यं मांसं तथाम्लं च रसं सेवेत नित्यशः ॥ इति
रसोनकल्कः ॥ पिप्पली पिप्पलीमूलं भल्लातकफलानि च ॥ एतत्कल्कश्चवस
त्तोरूरुस्तंभनिवारणः ॥ विहकांताजटकल्कः सिताक्षौद्रघृतैर्युतः ॥ प
रिणामभवं शूलं नाशयेत्सप्तभिर्दिनैः ॥ शुंठीतिलगुडैः कल्कं दुग्धेन सह यो
जयेत ॥ परिणामभवं शूलमामवातश्च नश्यति ॥ अपामार्गस्य बीजानां कल्क

प्रतिदिनं ५

बकासिर बद्रीकाजर १

सांडुबवारिणा॥ पीतोरक्तार्शसांनाशंकुरुतेनास्तिसंशयः॥ बदरीमूलकल्केनति
लकल्कश्चयोजितः॥ मधुन्वीरयुतः कुर्याद्रक्तार्शोनाशनंपरं॥ कूष्मांडकुडुसे
पिष्ठांलान्हांकर्षमितापिवेत्॥ रक्तन्तयकृनोघातंन्तयनोगं चनाशयेत्॥ तंदुली
यजटाकल्कः सक्षौद्रः सरसांजनः॥ तंदुलीहकसं पीतोरक्तप्रहरनाशनः॥ अं
कोलमूलकल्कश्च सक्षौद्रस्तंडुलाम्बुना॥ अतीसारहरः प्रोक्तः तथाविषहरः
स्मृतः॥ वंध्याककोंटिकामूलेपाटलाशाजटापवा॥ द्वतेनविल्वमूलेवाद्विविधंनाश
येद्विषं॥ अभयासेंधवंकृष्णाशुंठीकल्कस्त्रिदोषहा॥ पथ्यासेंधवशुंठीभिः कल्को
दीपनपाचनं॥ तद्वत्पलाशबीजानिपारसीययवानिका॥ कंपिल्लकंविडंगंचगु
डश्चसमभागिकः॥ तक्रेणकल्कमेतेषां पिवेत्क्रमिगणापहं॥ नवनीततिलैः कल्को
जेतारक्तार्शसास्मृतः॥ नवनीतसितानागकेशरैश्चापितद्विधः॥ पीतोमसू
रयूषेणकल्कः शुंठीशालाउजः॥ जयेत्संग्रहणींतक्रेणवहतीभवः॥ इति
श्री॰ चिकित्सास्थानेकल्ककल्पनाध्यायः॥ अथचूर्णकल्पना॰ अंत्यंतशुष्क

नेन्द्र ४

विल्वकाफर २

लाहर
रसवत ४
मेरवसाकरजर ६
सिरसि ६
पलाशवंहा ५
35

चवराहका जर ३
कमीला ५
खुरासानी जवाइन ५

यत्सूक्ष्मं तु पिष्टं वस्त्रगालितं ॥ तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्रा कर्षसंमिता ॥
चूर्णे गुडः समो देयः शर्करा द्विगुणा भवेत् ॥ चूर्णेषु भर्जिते हिंगु देयं नोत्क्लेदकृद्भवेत्
॥ लिहेच्चूर्णं द्रवैः सर्वैः घृताद्यैर्द्विगुणोन्मितैः ॥ पिबेच्चतुर्गुणेरेव चूर्णमालोडितं
द्रवैः ॥ चूर्णे वल्लेह गुटिका कल्कानामनुपानकं ॥ पित्तवातकफार्त्ते त्रिद्व्येकप
लमाहरेत् ॥ यथा तैलं जले क्षिप्तं क्षणेनैव विसर्प्यति ॥ अनुपानबलादंगे तथा
सर्पति भेषजं ॥ द्रवेण यावता सम्यक्चूर्णं सर्वं प्लुतं भवेत् ॥ भावनायाः प्रमा
णं तु चूर्णे प्रोक्तं भिषग्वरैः ॥ तद्यथा ॥ आमलं चित्रकः पथ्या पिप्पली सैंधव
स्तथा ॥ चूर्णितोयं गणो ज्ञेयः सर्वज्वरविनाशनः ॥ भेदी रुचिकरः श्लेष्मजेता
दीपनपाचनः ॥ आमलक्यादिचूर्णं ॥ शिवोऽग्निर्भूसितापथ्यापिप्पलीसैंध
वैः कृतं ॥ चूर्णं सर्वज्वरहरं दीपनं पाचनं सरं ॥ ज्वरे शिवादिचूर्णं ॥ मधुना
पिप्पलीचूर्णं लिहेत्कासज्वरापहं ॥ हिक्काश्वासहरं कंठ्यं प्लीहघ्नं बालकोचितं ॥

चिता२

बहेरा १ ४ अवरा १
१ हरय २

मधुपिप्पली॥ एका हरीतकी योज्या द्वौ च योज्यौ विभीतकौ॥ चत्वार्यामलकान्येव त्रिफलैषा प्रकीर्तिता॥ त्रिफला मेहशोफघ्नी नाशयेद्विषमज्वरान्॥ दीपनी श्लेष्मपित्तघ्नः कुष्ठहंत्री रसायनी॥ सर्पिर्मधुभ्यां संयुक्ता सैव नेत्रामयाञ्जयेत्॥ इति त्रिफला॥ पिप्पली मरिचं शुंठी त्रिभिस्त्र्यूषणमुच्यते॥ दीपनं श्लेष्ममेहघ्नं कुष्ठपीनससनाशनं॥ जयेदग्नौ च कंसामं मेहगुल्मगलामयान्॥ त्र्यूषणं॥ पिप्पली च व्यविश्वाह्वा पिप्पलीमूलचित्रकैः॥ पंचकोलमिति ख्यातं रुच्यं दीपनपाचनं॥ आनाहप्लीहगुल्मघ्नं शूलश्लेष्मोदरापहं॥ पंचकोलं॥ त्रिगंधमेलात्वक्पत्रैः चातुर्जातं सकेसरैः॥ त्रिगंधं सचतुर्जातं रुक्ष्णोष्णं लघुपित्तलं॥ वर्ण्यं रुचिकरं तीक्ष्णं पित्तश्लेष्मामयाञ्जयेत्॥ त्रिगंधि चातुर्जातकं॥ काकोली क्षीरकाकोली जीवकर्षभकौ तथा॥ मेदा चान्या महामेदा जीवंती मधुकं तथा॥ मुद्गपर्णी माषपर्णी जीवनीयो गणः स्वयं॥ जीवनीयो गणः स्वादुर्गर्भसंधानकृद्गुरुः॥ स्तन्यकृद्बृंहणो वृष्यः स्निग्धः शीतस्तृषापहः॥ रक्तपित्तं न्हतं शोषं

पिपर
सो. ठि६
चव्य६
पिपरामूल
चित्रक

सोंठ
इलायची
तेजपत्र
केसर६

सोचर २ वकथा पांगार २

ज्वरदाहानिलाञ्जयेत्॥ इतिजीवनीयगणः॥ मेदेद्वेचकाकोल्यौजीवकर्षभ
कौ तथा॥ ऋद्धिवृद्धीचतेसर्वैरष्टवर्गउदाहृतः॥ अष्टवर्गोबुधैःप्रोक्तोजीवनी
यसमोगुणैः॥ इतिअष्टवर्गः॥ सिंधुसौवर्चलंचैवविडंसामुद्रिकंगडं॥ एकद्वि
त्रिचतुःपंचलवणानिक्रमाद्विदुः॥ तेषुमुख्यंसैंधवंस्याद्युक्तेतत्प्रयोजयेत्॥
सैंधवाद्यंरोमकांतंज्ञेयंलवणपंचकं॥ मधुरंस्पष्टविण्मूत्रंस्निग्धंसूक्ष्मंव
लापहं॥ वीर्योष्णंरोचनंतीक्ष्णंकफपित्तविवर्द्धनं॥ इतिलवणपंचकं॥ स्वर्जि
कायांवशूकश्चक्षारयुग्ममुदाहृतं॥ ज्ञेयोवह्निसमौक्षारौस्वर्जिकायावशू
कजौ॥ क्षाराश्चान्येपिगुल्मार्शोग्रहणीरुक्छिदःसराः॥ पाचनाःकृमिपुंस्त्वघ्ना
शर्कराश्मरिनाशनाः॥ इतिक्षाराः॥ त्रिफलारजनीयुग्मंकंटकारीयुगंशठी॥ त्रि
कटुग्रंथिकंमूर्वागुडूचीधन्वयासकः॥ कटुकीपर्पटोमुस्तंत्रायमाणंचवा
लकं॥ निंबःपुष्करमूलंचमधुयष्टीचवत्सकः॥ यवानीन्द्रयवाभार्ङ्गीशिग्रुबी
जंसुराष्ट्रजा॥ वचात्वक्पद्मकोशीरचंदनातिविषाबला॥ शालिपर्णीपृश्निप

जवासो २

पवाढीर २

सलिमन १

कोरैया २

पिपरामूल २ मूलो

अतीस १

पद्मकाठ १

खरासानिजेवाईन २ ३३

फिटकीरी १

हातिबीनी २

जावित्री २

देवदारु १

र्णीविडंगंतरंतपा॥ चित्रकोदेवकाष्ठश्चचव्यंपत्रंपटोलजं॥ जीवकर्षभकौचैवलवंगंवंश
रोचना॥ पुंडरीकंचकाकोलीपत्रजंजातिपत्रकं॥ तालीसपत्रंचतथासमभागानिचूर्णि
येत्॥ सर्वचूर्णस्यचार्धांशंकेरातंप्रक्षिपेत्सुधीः॥ एतत्सुदर्शनंनामचूर्णंदोषत्रयाप
हं॥ ज्वरांश्चनिखिलान्हन्यान्नात्रकार्याविचारणा॥ पृथक्द्वंद्वागंतुजांश्चधातुस्था
न्विषमज्वरान्॥ सन्निपातोद्भवांश्चापिमानसानपिनाशयेत्॥ शीतज्वरैका

ग्राह
हिकादीन्मोहंतंद्रांभ्रमंतृषां॥ श्वासकासंचपांडुंचहृद्रोगंहंतिकामलान्॥ त्रिकपृ
ष्ठकटीजानुपार्श्वशूलनिवारणं॥ शीतांबुनापिबेद्धीमान्सर्वज्वरनिवृत्तये॥
सुदर्शनंयथाचक्रंदानवानांविनाशनं॥ तद्वज्ज्वराणांसर्वेषामिदंचूर्णंप्रनाश
नं॥ इतिसुदर्शनचूर्णं॥ कासश्वासज्वरहरात्रिफलापिप्पलीयुता॥ चूर्णिताम
धुनालीढाभेदिनीचाग्निबोधिनी॥ कट्फलंतिक्ताशटीशृंगीचपौष्करं॥ चूर्णमे
षांचमधुनाशृंगवेररसेनच॥ लिह्याज्ज्वरहरंकंठ्यंकासश्वासारुचीर्जयेत्॥
बालछर्दिहितपाशूलन्तयंचैवव्यपोहति॥ कट्फलादिचूर्णं॥ शृंगीअति

काकशृंगी २

कुस्तकं २

आहीकोरस २

श्रीराम०
शा० ध०
३५

पीपरि

विषालह्मा चूर्णिता मधुना लिहेत्॥ शिशुकासज्वरछर्दिशांत्यैवकेवलां विषां॥ शंग्याहि चूर्णं॥ शुंठीप्रतिविषाहिंगुमुस्ताकुटजचित्रकैः॥ चूर्णमुस्नाम्बुना पीतमामातीसारनाशनं॥ इत्यमतीसारंनाशनं॥ हरीतकी प्रतिविषा सिंधु सोवर्च्चलां वचा॥ हिंगुमुस्ता चेति कृतं चूर्णं पिबेदुस्नेन वारिणा॥ आमातीसारशमनं ग्राहि चाग्निप्रबोधनं॥ हरीतक्यादि आमातीसारे॥ मुस्तमिंद्रयवा बिल्वं लोध्रं मोचरसं तथा॥ धातकी चूर्णयेत्तक्रगुडाभ्यां पाययेत्सुधीः॥ सर्वातीसारशमनं निरूणद्धि प्रवाहिकां॥ लघुगंगाधरो नाम चूर्णः संग्राहकः परं॥ लघुगंगाधरं चूर्णम्॥ मुस्ताऽरलुकशुंठीभिर्धातकीलोध्रवालकैः॥ बिल्वमोचरसाभ्यां च पाठेंद्रयववत्सकैः॥ आम्रबीजं प्रतिविषा लज्जालुरिति चूर्णितैः॥ क्षौद्रतंडलपानीयं पानं यातिप्रवाहिका॥ सर्वातीसारग्रहणीं प्रशमं पाति वेगतः॥ वृद्धगंगाधरं चूर्णं सारि दे गोपि बंधकं॥ वृ

कोरेमा ३

अवच्छ ६

सोनापाठा ५

पिपरामूलय

नागंगाधरं चूर्णं ॥ तक्रेण यः पिबेन्नित्यं चूर्णं मरिचसंभवं ॥ चित्रसौवर्चलोपे
तं ग्रहणींत्तस्य नश्यति ॥ जठरस्त्रीह मंदाग्निगुल्मार्शोनाशनं भवेत् ॥ मरिचा
द्यं चूर्णं ॥ अष्टौ भागाः कपित्थस्य षड्भागा शर्करामता ॥ दाडिमीतिंतिडीकं
च श्रीफलं धातकी तथा ॥ अजमोदा च पिप्पल्यः प्रत्येकं स्युस्त्रिभागिकाः ॥ म
रिचं जीरकं धान्यं ग्रंथिकं वालकं तथा ॥ सौवर्चलं यवानी च चातुर्जातं सचित्र
कं ॥ नागरं चैकभागाः स्युः प्रत्येकं हि न्स्य चूर्णिताः ॥ कपित्थाष्टकसंज्ञा स्याच्चूर्ण
मेतदसामयान् ॥ अतीसारं क्षयं गुल्मं ग्रहणीं च व्यपोहति ॥ कपित्थाष्टकं ॥
दाडिमाद्वे पले ग्राह्ये खंडाद्दश पलानि च ॥ त्रिगंधस्य पलं चैकं त्रिकटोश्च
पलत्रयं ॥ एतदेकीकृतं सर्वं चूर्णं स्याद्दाडिमाष्टकं ॥ रुचिकृद्दीपनं स्वर्घ्यं ग्रा
हिका सज्वरापहं ॥ दाडिमाष्टकं ॥ दाडिमस्य पलान्यष्टौ शर्करायाः पलाष्टकं
॥ पिप्पली पिप्पलीमूलं यवानी मरिचं तथा ॥ धान्यकं जीरकं शुंठी प्रत्ये

जवाइन४

अमिलीर

दालचिनी तेजपत्र इलाइची४

श्रीराम।
शा॰ध॰
३५

वंशलोचना

माष ८

कं पलसंमिता ॥ कर्षमात्रा तु गान्धीरी त्वक्पत्रैलाश्च केसरं ॥ प्रत्येकं कोलमात्रा स्यु
स्तच्चूर्णं दाडिमाष्टकं ॥ अतिसारं क्षयं गुल्मं ग्रहणीं च गलग्रहं ॥ मंदाग्निं पीनसं का
सं चूर्णमेतद्व्यपोहति ॥ इति दाडिमाष्टकं ॥ लवंगं शुद्धकर्पूरं मेला त्वङ्नागकेशरं ॥
जातीफलं मुशीरं च नागरं कृष्णजीरकं ॥ कृष्णागुरुं तु गान्धीरीमांसी नी
लोत्पलं कणा ॥ चंदनं तगरं बालं कंकोलं चेति चूर्णयेत् ॥ समभागानि सर्वा
णि सर्वेभ्यार्धा सिता (चिनी) भवेत् ॥ लवंगाद्यमिदं चूर्णं राजार्हं वह्निदीपकं ॥ रोचकं
तर्पणं वृष्यं त्रिदोषघ्नं बलप्रदं ॥ हृद्रोगं कंठरोगं च कासं हिक्कां च पीनसं ॥ य
क्ष्माणं तमकं श्वासमतीसारमुरःक्षतं ॥ प्रमेहारुचिगुल्मांश्च ग्रहणीम
पि नाशयेत् ॥ लवंगाद्यं चूर्णं ॥ जातीफलं लवंगैला पत्रं त्वङ्नागकेसरं ॥ कर्पू
रं चंदनं तिलं त्वक्क्षीरी तगरामले ॥ तालीसं पिप्पली पथ्या स्थूलजीरकचित्रकैः
शुंठी विडंग मरिचैः समभागा विचूर्णितैः ॥ यावंत्येतानि सर्वाणि कुर्यात् भंगा

पीपरि ४

लवंगादि

वंशलोचनं ४

अवनार

भाग १

नागकेसरि २

चतावति॥ सर्वचूर्णसमा देया शर्करा च भिषग्वरैः॥ कर्षमात्रं ततः खादेन्मधुनाप्ला-
वितं सुधीः॥ अस्य प्रभावाद्ग्रहणीकासश्वासारुचिक्षयाः॥ वातश्लेष्मप्रतिश्यायं प्र-
शमं यान्ति वेगतः॥ जातीफलाद्यं चूर्णं॥ मरिचं नागकृष्णाणि तालीसं लवङ्गानि
च॥ प्रत्येकमेकभागास्युः पिप्पलीमूलचित्रकौ॥ त्वक्क्षीरा तिन्तिडीकं च जीरकं
च द्विभागिकं॥ धान्याम्लवेतसौ विश्वं भेदेलावदराणि च॥ अजमोदा जलधरः
प्रत्येकं स्युस्त्रिभागिकाः॥ सर्वौषधचतुर्थांशं दाडिमस्य फलं भवेत्॥ द्रव्येभ्यो
निखिलेभ्यश्च सिता देयार्द्धमात्रया॥ मताखाण्डवसंज्ञं स्याच्चूर्णमेतत्सुरो-
चनं॥ अग्निदीप्तिकरं हृद्यं कासातीसारनाशनं॥ हृद्रोगकंठजठरमुख-
रोगप्रणाशनं॥ विसूचिकां तथाध्मानमर्शोगुल्मक्रमीनपि॥ छर्दिं पंच-
विधां स्वासं चूर्णमेतदपोहति॥ मताखाण्डवं चूर्णं॥ चित्रकस्त्रिफला व्योषं
जीरकं हबुषा वचा॥ यवानी पिप्पलीमूलं शतकुब्जाजगन्धिका॥ अज

मोपा ५
इलाइची ५

ममरी १

क्षिमियासे३३२ चोक१ पत्रवार१

मोहाशटीधान्यंविडंगंस्थूलजीरकं॥हेमाह्वायोष्करंमूलंन्नारीलवणपंचकं॥
कुष्ठंचेतिसमांशानिविशोलास्यात्तद्विभागिका॥त्वक्त्रिभागाविज्ञेयाहंसोभा
गत्रयंभवेत्॥चतुर्भागासातलास्यात्सर्वाण्येकत्रचूर्णयेत्॥भावनंस्नेहव्या
घेश्वस्निग्धकोष्ठस्यरोगिणः॥हृद्याच्चूर्णविरेकायसर्वरोगप्रणाशनं॥हृद्रो
गेपांडुरोगेचकासेश्वासेभगंदरे॥मंदाग्नौचज्वरेकुष्ठेग्रहण्यांचगलग्रहे
॥हद्याघृतानुपानेनतथाध्मानेसुसाहिमि॥गुल्मेवदरनीरेणविडमेहह
धिमस्तुना॥उष्णांबुभिरजीर्णेचवल्लाम्लेःपरिकर्त्तिष॥उष्णीदुग्धेनोदरेषु
तप्तानत्रेणवागवां॥प्रसन्नयापत्तारोगेहाडिमांभोरशीस्ति॥द्विविधेचविषे
हद्याघृतेनविषनाशनं॥तेमन्नीरीत्रिवृच्चैवसातलाकडकावचा॥नीलि
नीसैंधवंल्कैमालवणंचेतिचूर्णयेत्॥उष्णोदेनमूत्रेणहाडिमत्रिफलार
सेः॥तप्तामांसरसेनापियथायोग्यंपिवेन्नरः॥अजीर्णलीलगुल्मेषुशो

अभिलवेत५

चोक२

क्षिमियासे३३२

रास्ना५ के२

फार्शो विषमाग्निषु ॥ हलीमकामलापांडुकुष्ठाध्मानो हरेत् च पि ॥ हवुषाद्यं चूर्णं ॥ ३ ठी हरीतकी कल्क
स्मात्त्वक् त्रीवर्चिलं तथा ॥ समभागानि सर्वाणि सूक्ष्मचूर्णानि कारयेत् ॥ ज्ञेयं च धूमै च समं चूर्ण
मेतत् शूलहरं परं ॥ आध्मानजठराशोघ्नमामवातहरं परं ॥ पंचसमं चूर्णं ॥ कर्षमात्रा भवेत्तस्मा
त्त्वक्तास्यात्पलोन्मिता ॥ खंडात्पलं च विज्ञेयं चूर्णमेकत्र कारयेत् ॥ कर्षोन्मितं लिहेदेतन्नरो
रेणाध्माननाशनं ॥ गाढविड्को हरकफोत्पित्तशूलानि नाशयेत् ॥ नाराच चूर्णम् ॥
वचनैत्रिवृतं पंन्तानोशतत्पथ्याद्वयं वचः ॥ अजमोदा जेगंधा च लघुषाजीरकद्वयं ॥ मरिचं
पिप्पलीमूलं पिप्पली गजपिप्पली ॥ हिंगुश्च हिंगुपत्री च सटी पाठा पकुंचिका ॥ ॐ
दी चित्रकचव्यानि विडंगं चाम्लवेतसं ॥ दाडिमं तित्तिडीकं च तत्व दंती शतावरी ॥ इंद्रवा
रुणिका भार्ङ्गी द्विक्षारू यवानिका ॥ कुस्तुंबुरुस्तुंबुरुणी पौष्करं वरालिणि च ॥ शिवाचि
त्रि समं शानि चूर्णमेकत्र कारयेत् ॥ भावये द्वाईकरसैः बीजपूर रसैस्तथा ॥ तत्पि
वेत् सर्पिषा जीर्णमथेनोष्णोदकेन वा ॥ कोलांभसा वा तक्रेण दुग्धेनोष्णेन मस्तुना ॥
यकृत्प्लीहकदोशरलगुल्महृद्रुजान्ति हृत्स्नमयान् ॥ अर्शो विष्टंभमंदाग्निगुल्मो कीलोदराणि च ॥
हिक्काध्मानश्वासकासान्जयेदेतान्न संशयः ॥ एतैरेवौषधैः सम्यक् घृतं वा साधयेत्

तुमरु विज ५   ~~सधिजलेर~~

निशाघ ३
सेंधव सोचरसा भर १६
ब्रह्म दंडी ५

१५२
मराउकाजर ६
कोटिलापची १
इंद्रयव ६
दधिजलर

निशोपर वस्त्रगालितं२ स्त्रन्स्म२

धीः॥ त्रिलवणाद्यं चूर्णं॥ तुम्बुरूणि त्रिलवणं यवानी पुष्कराव्हयं॥ यवक्षाराभयाहिंगु
विडंगानि समानि च॥ त्र्यूषत्रिभागा विज्ञेया चूर्णानि कारयेत्॥ पिबेदुष्णेन तोयेन यव
पक्केन वा पिबेत्॥ जयेत्सर्वाणि शूलानि गुल्माध्मानोदराणि च॥ तुंबुराद्यं चूर्णं॥ चित्रको
नागरं हिंगु पिप्पली पिप्पलीजटा॥ चव्याजमोद मरिचं प्रत्येकं कर्षसंमितं॥ स्वर्जिका
च यवक्षारः सिंधु सौवर्चलं विडं॥ सामुद्रिकं रोमकं च कोलमात्राणि कारयेत्॥ एकी
कृत्याखिलं चूर्णं भावयेन्मातुलुंगजैः॥ रसैर्दाडिमजैर्वापि शोषयेत्तापनेन च॥ एतच्चू
र्णं जयेत्गुल्मग्रहणीमामजं रुजं॥ अग्निं च कुरुते दीप्तं रुचिकृत्कफनाशनं॥ चि
त्रकाद्यं चूर्णं॥ सैंधवं पिप्पलीमूलं पिप्पली चव्य चित्रकं॥ शुंठी हरीतकी चेति क्रमवृ
द्धानि चूर्णयेत्॥ वडवानलनामैतच्चूर्णं स्यादग्निदीपनं॥ वडवानलं चूर्णं॥ अ
जमोदा विडंगानि सैंधवं देवदारु च॥ चित्रकः पिप्पलीमूलं शतपुष्पा च पिप्पली॥
मरिचं चेति कर्षांशं प्रत्येकं कारयेद्बुधैः॥ कर्षास्तु पंच पथ्याया दश स्युर्वृद्धदारु
कात्॥ नागराद्दशैव स्युः सर्वाण्येकत्र चूर्णयेत्॥ पिबेत्कोष्णजलेनैव चूर्णं श्व
यथुनाशनं॥ आमवातरुजं हंति संधिपीडां च गृध्रसीं॥ कटिपृष्ठगुदास्थं च जं

ममरी४ विधारा

ध्योश्वरुजं जयेत्॥ तूणी प्रतूणी विश्वाचीकफवातामयान्जयेत्॥ समेन वा गुडेनास्य वट
कान्कारयेत्सुधीः॥ अजमोदादि चूर्णं॥ हिंगु पाठाभयाधान्य दाडिमं चित्रकः सटी॥ अजमो
दात्रिकटुकं हबुषा चाम्लवेतसः॥ अजगंधा तित्तिडीकं जीरकं पौष्करं वचा॥ चव्यं क्षा
रद्वयं पंचलवणानीति चूर्णयेत्॥ प्राग्भोजनस्य मध्ये वा चूर्णमेतत्प्रयोजयेत्॥ पिबे
त्काजीकेन मद्येन तक्रेण मस्तोहकेन वा॥ गुल्मे वातकफोद्भूते हृच्छूले प्लीहिकासु च॥ हृ
त्पार्श्वशिरःशूलेषु शूले च गृह्ययोनिजे॥ मूत्रकृच्छ्रे तथानाहे पांडुरोगे रुचौ तथा॥
तिघ्नायां यकृति प्लीह्नि श्वासे कासे गलग्रहे॥ ग्रहण्यर्शोविकारेषु चूर्णमेतत्प्र
शस्यते॥ भावितं मातुलुंगस्य वल्कशः स्वरसेन वा॥ कुर्याद्वटिका वेद्धी वात
श्लेष्मरापरा॥ हिंग्वादि चूर्णं॥ यवानीदाडिमं शुंठी तित्तिडीकाम्लवेतसौ॥ बद
रास्त्वं चकुर्वीत चतुःशाणमितानि तु॥ सार्द्धद्विशाणं मरिचं पिप्पली दशशाणि
का॥ त्वक्सौवर्चलधान्याकजीरकं द्विद्विशाणकं॥ चतुःशाणोः शर्करामास्वंमि
त्रयोजयेत्॥ चूर्णितं सर्वमेकत्र यवानीखाडवाऽभिधं॥ चूर्णं जयेत्पांडुरोगं

हृद्रोगं ग्रहणीं ज्वरान्॥ छर्दिं शोतिसारश्च प्लीहानाहविबंधता॥ अरुचिं शूलमंदाग्निमशी
जिह्वागलामयान्॥ यवानीखांडवं चूर्णं॥ तालीसं मरिचं शुंठी पिप्पली वंशरोचना॥ एकद्वि
त्रिचतुःपंच कर्षैर्भागान्प्रकल्पयेत्॥ एलात्वचोस्तु कर्षार्धं प्रत्येकं भागमावहेत्॥ द्वात्रिंश
त्कर्षतुलिता प्रदेया शर्करा बुधैः॥ तालीसाद्यमिदं चूर्णं रोचनं पाचनं स्मृतं॥ कासश्वा
सज्वरहरं सर्वातीसारनाशनं॥ श्लेष्माध्मानहरं प्लीहग्रहणीं पांडुरोगजित्॥ पक्त्वा वा श
र्करां चूर्णं क्षिपेत्स्यात् गुटिका ततः॥ तालीसाद्यं चूर्णम्॥ सितोपला षोडशं स्यादष्टौ स्याद्वंश
रोचना॥ पिप्पली स्याच्चतुःकर्षा स्यादेला च द्विकार्षिकी॥ एककर्षस्त्वचः कार्यश्चूर्णयेत्सर्व
मेकतः॥ सितोपलादिकं चूर्णं मधुसर्पिर्युतं लिहेत्॥ श्वासकासज्वरहरं हस्तपादांगदाहजि
त्॥ मंदाग्निं सुप्तजिह्वत्वं पार्श्वशूलमरोचकं॥ ज्वरमूर्ध्वगतं रक्तपित्तमाशु व्यपोहति॥
सितोपलादिचूर्णं॥ सामुद्रलवणं कार्यं मष्टकर्षमितं बुधैः॥ पंचसौवर्चलं स्याद्बिड
सैंधवधान्यकं॥ पिप्पली पिप्पलीमूलं कृष्णजीरकपत्रकं॥ नागकेसरतालीसमम्ल
वेतसकं तथा॥ द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः॥ मरिचं जीरकं विश्वमेकैकं क
र्षमात्रकं॥ दाडिमं स्याच्चतुःकर्षं त्वगेला चार्धकार्षिके॥ एतच्चूर्णीकृतं सर्वं लवणं भास्क

वेरअंतर वीज ४॥

राग्निधं॥ शाणप्रमाणं दयेत्तु मस्तुतक्रसुरासवैः॥ वातश्लेष्मभवं गुल्मं प्लीहानमुदरं त्वयं॥ अ
र्शांसिग्रहणीकुष्ठं विवंधं च भगंदरं॥ शोफशूलं श्वासकासमामवातं च हृद्रुजं॥ मंदाग्निं नाश
येत्पीतं दीपनं पाचनं परं॥ सर्वलोकहितार्थाय भास्करेण हितं पुरा॥ भास्करलवण चूर्णं॥
एलाप्रियंगुमुस्तानि कोलमज्जा च पिप्पली॥ श्रीचंदनं तथा लाजौ लवंगं नागकेसरं॥ एत
च्चूर्णीकृतं सर्वं सितामध्वाप्लुतं लिहेत्॥ वातपित्तकफोद्भूतं छर्दिं हंत्यतिवेगतः॥ एलादि चूर्णं
॥ मूलं पत्रं फलं पुष्पं त्वचं निंवात्समाहरेत्॥ स्वल्पश्च चूर्णमिदं कुर्यात्पलैः पंचदशोन्मितं॥
लोहभस्म हरीतक्यो चक्रमर्दन चित्रकौ॥ भल्लातकं विडंगानि शर्करा मलकं निशा॥ पिप्पली
मरिचं शुंठीवाकुचीकृतमालकः॥ गोक्षुरश्च पलोन्मानमेकैकं कारयेद्बुधः॥ सर्वमेकीकृ
तं चूर्णं भृंगराजेन भावयेत्॥ अष्टभागावशिष्ठेन खदिरासनवारिणा॥ भावयित्वा च संशुष्कं
कर्षमात्रं ततः पिवेत्॥ खदिरासनतोयेन सर्पिषा पयसेन वा॥ मासेन सर्वकुष्ठानि विनि
हंति रसायनं॥ पंचनिम्बमिदं चूर्णं सर्वरोगप्रणाशनं॥ पंचनिंव चूर्णम्॥ शतावरी गोक्षुर
श्च वीजं चकापिकच्छुजं॥ गांगेरुकी चातिवला वीजमिक्षुरकोद्भवं॥ चूर्णितं सर्वमेकत्र गो

केवाचाविज ककहीकावीज१ तालमखाना१

दुग्धेन पिबेन्निशि॥ न तृप्तिं याति नारीभिर्नरश्चूर्णप्रभावतः॥ ७ षिकरं चूर्णं॥ अश्वगंधा दश पलानि तन्मात्रो वृद्धदारुकं॥ चूर्णीकृत्वा भयं विदोन्ह्यू तभांडे निधापयेत्॥ कर्षैकं पयसा पीत्वा नारीभिर्नैव तृप्यति॥ समभागानि कार्याणि नव भागा हतायसः॥ एतदेकीकृतं चूर्णं मधुसर्पिर्युतं लिहेत्॥ गोमूत्रमथवा तक्रमनुपाने प्रशस्यते॥ पांडुरोगं जयत्युग्रं हृद्रोगं च भगंदरान्॥ शोफकुष्ठोदरार्शांसि मेहाग्निमरुचिं क्रिमीन्॥ नवायसं चूर्णं॥ आकारकरभः शुंठी कंकोलं कुंकुमं कणा॥ जातीफलं लवंगं च चंदनं चेति कार्षिकान्॥ चूर्णानीमानि ततः कुर्यादहिफेनं पलोन्मितं॥ सर्वमेकीकृतं स्थूलं माषैकं मधुना लिहेत्॥ शुक्रस्तंभकरं चूर्णं प्रसादमानंदकारकं॥ नारीणां प्रीतिजननं सेवेत निशिकामुकः॥ आकारकरभादि चूर्णं॥ इति श्री० चिकित्सास्थाने चूर्णकल्पनाध्यायः॥ वटकाश्च प्रकथ्यंते तन्नाम गुटिका वटी॥ मोदको वटिका पिंडी गुडो वर्तिस्तथोच्यते॥ लेहवत्साध्यते वह्नौ गुडो वा शर्करापि वा॥ गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी॥ कुर्यादवह्निसिद्धेन क्वचिद्गुग्गुलुना वटी॥ द्रवेण मधुना वापि गुटिकां कारयेद्बुधः॥ सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः॥ चूर्णाच्चूर्णसमः कार्यो गुग्गुलुर्मधु तत्समं॥ द्रवं च द्विगुणं देयं मोदकेषु भिषग्वरैः॥ कर्षप्रमाणा तन्मात्रा बलं दृष्ट्वा प्रयुज्यते॥ सयपा

भस्मलोह
सुगंधकोकिलो ५
अफि म ह
र्नि

इंद्रारुन १ सेर ३।२।३ तेजवल १

इंद्रवारुणिकामुस्तंशुंठी दंतीहरीतकी ॥ त्वक्सटीविडंगानिगोक्षुरश्चित्रकस्तथा ॥ तेजोव्हा
चविकषीणिपयस्याणिकारयेत् ॥ स्वरणस्य पलान्यष्टौ वद्धतारुश्चतुष्पलं ॥ चतुष्पलंस्या
(साधानेलीरु ३) न्मल्लातंक्वाथयेत्सर्वमेकतः ॥ जलद्रोणे चतुर्थांशं गृहीयात्क्वाथमुत्तमं ॥ क्वाथद्रव्यात्रिगु
णितं गुडं क्षिप्त्वा पुनः पचेत् ॥ सम्यक्पक्वं च तं ज्ञात्वा चूर्णान्येतानि दापयेत् ॥ चित्रकस्त्वव
ताहंतीतेजोव्हा पेप्पलिकाष्टपं वक ॥ पृथक् त्रिपलिका कार्याव्योषैलामरिचं त्वचः ॥ निःक्षिपेन्म
(तेजवल ५) धुशीते च तस्मिन्प्रस्थप्रमाणके ॥ एवं सिद्धो भवेत्श्रीमान्वाहुशालगुडः शुभः ॥ जयेदर्शां
सि सर्वाणि गुल्मान्वातोदरं तथा ॥ आमवातप्रतिश्यायग्रहणीन्हायपीनसान्व ॥ हलीम
कं पांडुरोगं प्रमेहं च रसायनं ॥ श्रीबाहुशालगुडः ॥ मरिचं कर्षमात्रं स्यात्पिप्पली कर्षसंमि
ता ॥ अर्धकर्षो यवक्षारः कर्षयुग्मं च दाडिमं ॥ एतच्चूर्णीकृतं युंज्यात् अष्टकर्षगुडेन हि ॥ शा
(चारिमासेर्ध) णप्रमाणां गुटिकां कृत्वा वक्त्रे च धारयेत् ॥ अस्याः प्रभावात्सर्वेपि कासा यांति लयं क्षयं ॥ मरिचा
दिगुटिका ॥ गुडं धृत्वा शिवा मुस्ता [illegible] रयेद्गुटिकां मुखे ॥ तृष्णां प्रवृद्धां हंत्येषा मुखशोषं च दा
रुणं ॥ आमलकादिगुटिका ॥ विडंगं नागरं कृष्णा पथ्यामलविभीतकौ ॥ वचामृतागुडूची भल्ला
तं सं दि पंचात्र योजयेत् ॥ एतानि समभागानि गोमूत्रेणैव पेषयेत् ॥ गुंजाभागुटिकाका

साधा विंध १

त्रि फ दा ५

द्यादार्द्रकजैरसैः ॥ एकामजीर्णयुक्तस्य द्वे विसूच्यां च दापयेत् ॥ तिस्रः सर्पदष्टस्य चतस्रः स
न्निपातिनः ॥ गुटिका जीवनी नाम्ना संजीवयति मानवं ॥ इति जीवनीगुटिका ॥ व्योषाम्लवेतसं
चव्यं तालीसं चित्रकं तथा ॥ जीरकं तिंतिडीकं च प्रत्येकं कर्षभागिकं ॥ त्रिसुगंधि त्रिशाणं स्याद्गुडस्या
त्कर्षविंशतिः ॥ व्योषादिगुटिका सद्यः पीनसंश्वासकासजित् ॥ रुचिस्वरकरी ख्याता प्रतिश्यायप्र
णाशिनी ॥ व्योषादिगुटिका ॥ आमेषु सगुडां शुंठीमजीर्णे गुडपिप्पलीं ॥ कृच्छ्रे जीरगुडं दद्यादर्शः
सु सगुडाभया ॥ गुडचतुष्कयगुटिका ॥ वृद्धदारुकभल्लातशुंठीचूर्णेन योजितः ॥ मोदकः सगुडो
हन्यात्त्रिविधार्शःकृतां रुजं ॥ वृद्धदारुकमोदकः ॥ शुद्धसूरणचूर्णस्य भागान् द्वात्रिंशदाहरेत् ॥
भागान् षोडश चित्रस्य शुंठ्या भागं चतुष्टयं ॥ द्वौ भागौ मरिचस्यापि सर्वाण्येकत्र चूर्णयेत् ॥ गु
डेन पिंडिकां कुर्यादर्शसां नाशिनी परा ॥ सूरणपिंडी ॥ सूरणो वृद्धदारुश्च भागैः षोडशभिः पृथ
क् ॥ मुशली चित्रकौ स्यातामष्टभागमितौ पृथक् ॥ शिवाबिभीतकौ धात्री विडंगं नागरं कणा ॥ भ
ल्लातः पिप्पलीमूलं तालीसं च पृथक् पृथक् ॥ चतुर्भागप्रमाणानि त्वगेला मरिचं तथा ॥ द्विभा
गमात्राणि पृथगेतत्सर्वमेकत्र चूर्णयेत् ॥ द्विगुणेन गुडेनाथ वटकान्कारयेद्बुधः ॥ प्रबलाग्नि
करा ह्येते त्वर्शोनाशनाः पराः ॥ ग्रहणीवातकफजं श्वासंकासक्षयापहं ॥ प्लीहानं श्लीपदं शो
फं हिक्कां मेहं भगंदरं ॥ निहन्युः पलितं व्याधिस्तथा मेध्या रसायनाः ॥ सूरणवटकं ॥ त्रिफ

केशा१

त्रिकु २।१ लोरचूर्ण२ सोनामारवी १ हरदै १

प

लांकूषणं च व्योषं पिप्पलीमूलचित्रकौ ॥ दारुमाक्षिकधातुस्त्वक् हावीभिस्तं विडंगकं ॥ प्रत्येकं
कर्षमात्राणि सर्वाणि त्रिगुणितं तथा ॥ मंडूरं चूर्णितं सर्वं गोमूत्रे षड्गुणे न्हि पचेत् ॥ पक्त्वा च वटकान्
कृत्वा हरेद् घात्रक्वाथानुपानतः ॥ कामलापांडुमेहार्शः शोफः कुष्ठकफामयान् ॥ ऊरुस्तंभमजी
र्णं चल्लीहानं नाशयंति च ॥ मंडूरवटकः ॥ चंद्रप्रभा वचा मुस्तं भूनिंबामरदारु च ॥ हरिद्राति
विषादार्वीपिप्पलीमूलचित्रकाः ॥ धान्यकं त्रिफलं चव्यं विडंगं जोपिप्पली ॥ व्योषं माक्षिकधातुश्च
द्वौ क्षारौ लवणत्रयं ॥ एतानि शाणमात्राणि प्रत्येकं कारयेद्बुधः ॥ तवद्दंती पत्रकं च त्वगेला वंशलो
चना ॥ प्रत्येकं कर्षमात्राणि कुर्यादेतानि बुद्धिमान् ॥ द्विकर्षं हतलोहं स्याच्चतुःकर्षा सिता
भवेत् ॥ शिलाजित्वष्टकर्षं स्याद् ष्ठौ कर्षश्च गुग्गुलुः ॥ एभिरेकत्र संक्षुण्णैः कर्तव्या गुटि
का शुभा ॥ चंद्रप्रभा इति विख्याता सर्वरोगप्रनाशिनी ॥ प्रमेहान्विंशतिं कृच्छ्रं मूत्राघातं तथा
श्मरी ॥ विबंधानाहशूलानि प्रहरंत्यपि मर्बुदं ॥ अंडवृद्धिं तथा पांडुं कामलां च हलीमकं ॥ अं
त्रवृद्धिं कटीशूलं श्वासं कासं विचर्चिका ॥ कुष्ठान्यर्शांसि कंडू च प्लीहोदरभगंदरं ॥ वातपित्तकफं
हन्याद्बल्या वृष्या रसायनी ॥ चंद्रप्रभायाः कर्षस्तु चतुःशाणो विधीयते ॥ चंद्रप्रभा गुटिका
॥ यवानीजीरकं धान्यं मरिचं गिरिकर्णिका ॥ अजमोदा यकुंचीच चतुःशाणाः पृथक् पृथक् ॥

अतिस ५

कुशावट २
देवदारु ४
कचूर ४
त्रिकुट २।४

गजपिपरी १ कृष्णजीरा १ भगरैया १

श्रीराम०
शा० ध०
८१

हिंगु षट्शाणिकं कार्यं न्त्यारोलवणपंचकं ॥ त्रयक्षाराष्टभिस्तैः शाणैः प्रत्येकं कल्पयेत्सुधीः ॥ दंती
सटी पौष्करं च विडंगं दाडिमं शिवा ॥ चित्रोऽम्लवेतसः शुंठी शाणैः षोडशभिः पृथक् ॥ बीजपूररसेने
षां गुटिकां कारयेद्बुधः ॥ घृतेन पयसा मद्येनाम्लेनोष्णोदकेन वा ॥ पिबेत्कांकायनप्रोक्तां गुटिकां गु
टिकां गुल्मनाशिनीं ॥ मद्येन वातिकं गुल्मं गोमूत्रेण च पैत्तिकं ॥ मूत्रेण कफगुल्मं च दशमूलैस्त्रि
दोषजं ॥ उष्ट्रीदुग्धेन नारीणां रक्तगुल्मं निवारयेत् ॥ हृद्रोगं ग्रहणीं शूलं कृमीनर्शांसि नाशयेत् ॥
कांकायनगुटिका ॥ नागरं पिप्पली चव्यं पिप्पलीमूलचित्रकौ ॥ भृष्टहिंग्वजमोदा च सर्षपा जी
रकद्वयं ॥ रेणुकेंद्रयवाः पाठा विडंग गजपिप्पली ॥ कटुकातिविषा भार्गी वचा मूर्वेति भागतः ॥
प्रत्येकं शाणिकानि स्युर्द्रव्याणीमानि विंशतिः ॥ द्रव्येभ्यः सकलेभ्यश्च त्रिफला द्विगुणा भवेत् ॥
एभिश्चूर्णीकृतैः सर्वैः समो देयश्च गुग्गुलः ॥ एकपिंडं ततः कृत्वा धारयेद्घृतभाजने ॥ गुटिकाः
शाणमात्रास्तु कृत्वा ग्राह्या यथोचिताः ॥ गुग्गुलुर्योगराजोऽयं त्रिदोषघ्नो रसायनः ॥ मैथुनाहा
रपानानां त्यागो नैवात्र विद्यते ॥ सर्वान् वातामयान् कुष्ठमर्शांसि ग्रहणीगदं ॥ प्रमेहं वातर
क्तं च नाभिशूलं भगंदरं ॥ उदावर्तं क्षयं गुल्ममपस्मारमुरोग्रहं ॥ मंदाग्निं श्वासकासांश्च नाश
येदरुचिं तथा ॥ रेतोदोषहरः पुंसां रजोदोषहरः स्त्रियाः ॥ पुंसामपत्यजनको वंध्यागर्भप्रदस्तथा ॥
रास्नादिक्वाथसंयुक्तो विविधं हंति मारुतं ॥ काकोल्यादिशृतात्पित्तं कफमारग्वधादिना ॥ दार्वीशृतेन

रेउवीज

हे लि ३

मेहांश्च गोमूत्रेणैव पांडुतां ॥ मेदो वृद्धिं च मधुना कुष्ठं निम्बरसेन च ॥ छिन्नाक्काथेन वातास्त्र
शोफं प्रशूलं कणारसेन तु ॥ पाटलाक्काथसहितो विषं मूषकजं जयेत् ॥ त्रिफलाक्काथसहितो जयेन्नेत्रा
र्त्तिं दारुणं ॥ पुनर्नवादिक्काथेन हन्यात्सर्वोदराण्यपि ॥ योगराजगुग्गुलुः ॥ त्रिफलायास्त्रयः प्रस्था
प्रस्थैकममृता भवेत् ॥ संक्षुद्य लोहपात्रेण सार्द्धद्रोणाम्बुना पचेत् ॥ जलमर्द्धशृतं ज्ञात्वा गृह्णीया
द्वस्त्रगालितं ॥ ततः क्वाथेन्वितं शुद्धं गुग्गुलं प्रस्थसंमितं ॥ पुनः पचेदयःपात्रे दर्व्या संघट्टयेन्मुहुः ॥
सान्द्रीभूतं च तं ज्ञात्वा गुडपाकसमाकृतिं ॥ चूर्णीकृत्य ततस्तत्र द्रव्याणीमानि निक्षिपेत् ॥ त्रिफला द्वि
पला ज्ञेया गुडूची पलिका मता ॥ षडुन्नत्र्यूषणं प्रोक्तं विडंगानां पलार्द्धकं ॥ दंतीकर्षमिता ग्राह्या त्रि
वृत्कर्षमिता स्मृता ॥ ततः पिंडीकृतं सर्वं घृतपात्रे विनिःक्षिपेत् ॥ गुटिकाः शाणिकाः कृत्वा युंज्याद्दो
षाद्यपेक्षया ॥ अनुपाने भिषक् दद्यात्कोष्णं नीरं पयोऽथवा ॥ मंजिष्ठादिशृतं वापि युक्त्या युक्त्याप
प्यापरा ॥ जयेत्सर्वाणि कुष्ठानि वातरक्तं त्रिदोषजं ॥ सर्वव्रणान्गुल्मांश्च प्रमेहपिडकास्तथा ॥
प्रमेहोदरमंदाग्निं कासश्वासं च पांडुतां ॥ हंति सर्वामयान्नित्यमुपयुक्तो रसायनः ॥ कैशोरका
भिधानो यं गुग्गुलुः कांतिकारकः ॥ वासादिनां नेत्रगदान्गुल्मादीन्व्रणादिना ॥ क्वाथेन खदि
ररस्यापि व्रणान्कुष्ठांश्च नाशयेत् ॥ अम्लं तीक्ष्णमजीर्णं च व्यायामश्रममातपं ॥ मघंरो

७३ पाकस्य लक्षणमाह ॥ तोयपूर्णे यदा पात्रे क्षिप्तो न प्लवते गुडः ॥ क्षिप्त
गुडनिश्चलस्तिष्ठेत् सलिले तु न शीर्यते ॥ २ एष पाको गुडादीनां सर्वेषां परि
कीर्तितः ६

षं त्यजेत्सम्यक्गुणार्थी रसेवकः॥ कैशोरकगुग्गुलुः॥ त्रिपलं त्रिफलाचूर्णं कृष्णाचूर्णं प-
लोन्मितं॥ गुग्गुलुः पंचपलिकः शोधयेत्सर्वमेकतः॥ ततस्तु गुटिका कृत्वा प्रयुज्या वह्न्यपेक्षया॥
भगंदरं गुल्मशोफावर्शांसि च निवारयेत्॥ त्रिफलागुग्गुलुः॥ अष्टाविंशतिर् २८ संख्यानि पला-
न्यानीय गोक्षुरः॥ विपचेत्षड्गुणे नीरे क्वाथो ग्राह्योऽर्द्धशेषितः॥ ततः पुनः पचेत्तत्र पुरस
सप्तपलं क्षिपेत्॥ गुडपाकसमाकारं ज्ञात्वा तत्र विनिक्षिपेत्॥ त्रिकटु त्रिफलामुस्तं चूर्णितं च
पलसप्तकं॥ ततः पिंडीकृतस्यास्य गुटिकामुपयोजयेत्॥ हन्यात्प्रमेहकृच्छ्रं च प्रदरं मूत्रघातकं॥ वा-
तास्रं वातरोगांश्च शुक्रदोषं तथाश्मरी॥ गोक्षुरकादिगुग्गुलुः॥ त्रिफलाष्टपला ८ क्वा-
र्याभल्लातानां चतुःपलं॥ वाकुचीपंचपलिका विडंगानां चतुष्पलं॥ हृतं लोहं त्रिवृच्चैव
गुग्गुलुश्च शिलाजतु॥ एकैकं पलमात्रं स्यात्पलार्द्धं पौष्करं भवेत्॥ चित्रकश्च पलार्द्धं स्या-
द्विशाणं मरिचं भवेत्॥ नागरं पिप्पलीमुस्तं त्वगेला पत्रकं कुंभः॥ शाणोन्मितं तदेकैकं
चूर्णयेत्सर्वमेकतः॥ ततस्तत्र क्षिपेच्चूर्णं पक्वखंडं च तत्समं॥ मोदकान्पालिकान्कृ-
त्वा प्रयुंजीत यथोचितं॥ हन्युः सर्वाणि कुष्ठानि त्रिदोषप्रभवामयान्॥ भगंदरश्लीतगु-
ल्मान्जिव्हातालुगलामयान्॥ शिरोक्षिभ्रूगतान्रोगान्हन्यात्पक्षगतानपि॥ प्राग्भो

गुग्गुलुः ५

गढस्यावै१

जीर्णस्मरेपंस्याहृधः कार्यास्थिते॥भेषजंभुक्तमध्येचयोगेजठरसंस्थिते॥भोजनस्योप
रिग्राह्यमूर्द्धजत्रुगदेषुच॥त्रिफलामोदकः॥ कांचनारत्वचोग्राह्यंपलानांदशकंबुधैः
॥त्रिफलाषट्पलाकार्यात्रिकटुस्यात्पलत्रयं॥पलैकंवरुणःकार्यस्एलात्वक्पत्रकंतथा॥
एकैकंकर्षमात्रंस्यात्सर्वाण्येकत्रकारयेत्॥ यावच्चूर्णमिदंसर्वंतावन्मात्रस्तुगुग्गुलुः॥सं
कुट्यसर्वमेकत्रपिंडंकृत्वाचधारयेत्॥गुटिकाःशाणिकाःकृत्वाप्रातर्ग्राह्याःप्रयोजिताः॥
गंडमालांजयेदत्युग्रामपचीमर्बुदानिच॥ ग्रंथीनव्रणानिगुल्मांश्चकुष्ठानिचभगंदरं॥प्रयो
यश्चानुपानार्थंक्वाथोमुंडतिकाभवः॥क्वाथःखदिरसारस्यपथ्याक्वाथोयवोऽथवा॥कांचना
रगुग्गुलुः॥निस्तुषंमाषचूर्णंस्यात्तत्पादोगोधूमसंभवं॥निस्तुषंयवचूर्णंचशालितंडुलजंत
था॥तन्मानंचपिप्पलीचूर्णंपलिकान्भृष्टकव्ययेत्॥ततएकीकृतंसर्वंभर्जयेत्सोद्धेनच॥अ
र्द्धमात्रेणसर्वेभ्यस्ततखंडसमन्वितं॥जलंचद्विगुणंदत्वापाचयेच्छनैःशनैः॥ततःप
क्वंसमुद्धृत्यचतानकुर्वीतमोदकान्॥कुर्यात्सायंचतंभुक्त्वापिबेत्क्षीरंचतुर्गुणं॥वर्जनी
योविशेषेणक्षाराम्लोदोरसानपि॥लत्वेवंरमयेन्नारीर्वैक्षीणैर्न्नीयतेनरः॥माषादिमोदकः॥

मोदकंचपलोन्मितंर

गोरखमुंडी
धुत्रासकचूर्ण

पश्चिकोग्राह्यः

५१३

९२५६

श्रीराम०
शा०ध०
६३

७२

इतिश्रीदामोदरसूनोःशार्ङ्गधरस्यविरचितायांसंहितायांचिकित्स्यानेवटकल्पनाध्यायः॥क्काथादे
र्यन्नः पाकाद्घनत्वंसारसंक्रिया॥सोवलेहश्चलेहश्चतन्मात्रात्स्यात्पलोन्मिता॥सिताचतुर्गुणाकार्या
चूर्णाच्चद्विगुणोगुडः॥द्रवंचतुर्गुणंदद्यादितिसर्वत्रनिश्चयः॥सुपक्वेतंतुमत्त्वंस्यादवलेहोप्सुम
ज्जनं॥स्थिरत्वंपीडितेमुद्रागंधवर्णरसोभ्दवः॥दुग्धमिक्षुरसंयूषंपंचमूलकषायकं॥वा
साक्काथंयथायोग्यमनुपानंप्रशस्यते॥सयथा॥कंटकारीतुलांनीरद्रोणेपक्त्वाकषायकं॥पा
दशेषंगृहीत्वाचतस्मिन्चूर्णानिदापयेत्॥पृथक्पलांशान्येतानिगुडूचीचव्यचित्रकः॥मुस्तं
कर्कटशृंगीचत्र्यूषणंधन्वयासकः॥भार्गीरास्नाशठीचैवशर्करापलविंशतिः॥प्रत्येकंप
लान्यष्टौप्रदद्याद्घृततैलयोः॥पक्वालेहत्वमानीयशीतेमधुपलाष्टकं॥चतुःपलंतुगाक्षीर्याः
पिप्पलीनांचतुःपलं॥क्षिप्त्वानिदध्यात्सुदृढेमृन्मयेभाजनेशुभे॥लेहोयंहंतिहिक्कार्त्ति
कासश्वासानशेषतः॥कंटकार्य्यवलेहः॥पाटलारणिकाश्मर्यविल्वारलुकगोक्षुरैः॥परोर्पी
वहत्यौपिप्पल्यःशृंगीद्राक्षामृताभयाः॥वलाभूम्यामलीवासाऋद्धिर्जीवंतिका
शटी॥जीवकर्षभकौमुस्तंपौष्करंकाकनासिका॥मुद्गपर्णीमाषपर्णीविदारीचपुनर्न
वा॥काकोलीकमलंमेदासूक्ष्मैलागुरुचंदनं॥एकैकंपलसंमानंस्थूलचूर्णितमोषधं॥

धन्वयासफः६

नंशलोचन

वनतं उ०धोर

पर्णीद्वोध

ग दि१ पात्रे लाचि१ पाउर४ टेकारी४ गंभारी४ सोनपथ४

६३

भ ग्प्रर राछयो ३

ग्रवना

सकीलकस्य महत्पात्रे पंचामलसतानि च॥ पचेद्द्रोणजले न्यस्य ग्राह्यमष्टावशेषितं॥
ततस्तुतान्यामलानि निष्कुलीकृत्य वाससा॥ दृढेन रस्तत्संमर्दयेन्ति ख्यातत्रततो घृतं॥ प
लसप्तमितं तानि किंचिद्भृष्ट्वाल्पवह्निना॥ ततस्तत्रान्हिपेत्काथं खंडं वा द्वितुलोन्मितं॥ लेहव
त्साधयित्वा च चूर्णानीमानि निःक्षिपेत्॥ पिप्पली द्विपला देया त्वगाक्षीरी चतुःपला॥ प्रत्येकं
च त्रिशाणाः स्युः त्वगेला पत्रकेसरं॥ ततस्त्वेकीकृते तस्मिन् क्षिपेत्क्षौद्रं च षट्पलं॥ इत्येतच्च्यव
नप्रोक्तं च्यवनप्राश संज्ञिकं॥ लेहं वह्निबलं दृष्ट्वा खादेत्क्षीणे रसायनं॥ बालावृद्धान्क्षतान्क्षीणा
नारीक्षीणाश्च शोषिणः॥ हृद्रोगिणः स्वरक्षीणा ये नरास्तेषु युज्यते॥ कासं श्वासं पिपासां
च वातास्रमुरसोग्रहं॥ वातं पित्तं शुक्रदोषं मूत्रदोषं च नाशयेत्॥ मेधां स्मृतिं स्त्रीषु हर्षं कां
तिवर्णप्रसन्नतां॥ अस्य प्रयोगाद्धामोति नरो जीर्णविवर्जितः॥ च्यवनप्राशावलेहः॥ नि
ष्कुलीकृतकुष्मांडखंडा पलशतं पचेत्॥ निक्षिप्य द्वितुलां नीरमर्द्धशिष्टं च गृह्यते॥ तानि कू
ष्मांडखंडानि पीडयेद्दृढवाससा॥ आतपे शोषयेत्तं च शूलाग्रैर्बहुशो पचेत्॥ क्षिप्त्वा तां
म्रकडाहे च हघाद्दृष्टपलं घृतं॥ तेन किंचिद्भर्जयित्वा पूर्वोक्तं तज्जलं क्षिपेत्॥ खंडात्पलशतं द
त्वा सर्वमेकत्र पाचयेत्॥ रुपक्वे पिप्पली शुंठी जीराणां द्विपलं पृथक्॥ पंचपक्ष पलार्द्धं धान्या

स

फरहिया

कंपत्रैला मरिचत्वचं॥ चूर्णीकृत्य क्षिपेत्तत्र घृतार्द्धं क्षौद्रमांचेत्॥ खादेद्दग्निबलं दृष्ट्वा रक्त
पित्तीज्वरीन्क्षयी॥ शोषतृष्णानमोहछर्दिकासश्वासक्षयातुरः॥ कुष्मांडकावलेहोयं बाल
वृद्धेषु युज्यते॥ उरःसंधानकृद्वृष्यो बृंहणो बलकृन्मतः॥ कुष्मांडकावलेहः॥ प्रत्नेपा कु
कुष्मांडखंडस्यस्वरसेन विपचेत्सुधीः॥ अर्शसां मूढवातानां मंदाग्नीनां च युज्यते॥ खंडसू
रणावलेहः॥ हरीतकीशतं भद्रयवानामाढकं तथा॥ पलानि दशमूलस्य विंशतिश्च नि
योजयेत्॥ चित्रकः पिप्पलीमूलमपामार्गसटी तथा॥ कपिकच्छूः शंखपुष्पी भार्ङ्गी च गज
पिप्पली॥ बलापुष्करमूलं च पृथक्पंचपलमात्रया॥ पचेत्यं चाढके नीरे यवैः स्विन्नैः स्रुतं
नयेत्॥ तत्राभयाशतं दत्वा क्वाथे तस्मिन्विचक्षणः॥ सर्पिस्तैलाष्टपलकं क्षिपेद्गुडतुलां
तथा॥ पक्त्वा लेहत्वमानीय सिद्धे शीते पपकृपपक्व॥ क्षौद्रं च पिप्पलीचूर्णं दद्यात्कुडव
मात्रया॥ हरीतकीद्वयं खादेत्तेन लेहेन नित्यशः॥ क्षयं कासं ज्वरं श्वासं हिध्मार्शोरुचिपी
नसान्॥ ग्रहणीं नाशयेत्येष वलीपलितनाशनः॥ बलवर्णकरः पुंसामवलेहो रसायनं॥ वि
हितोगस्त्यमुनिना सर्वरोगप्रनाशनः॥ अगस्त्यहरीतक्यावलेहः॥ कुटजत्वक्तुलां
द्रोणे जलस्य विपचेत्सुधीः॥ कषायं पादशेषं च गृह्णीयाद्वस्त्रगालितं॥ त्रिंशत्पलं गुड

कच्छूः

केवांचबीजं

कटेउना

स्यात्रहलाचवि पचेल्लघुनः॥ सांद्रत्वमागतं दद्याच्चूर्णानीमानि दापयेत्॥ रसांजनं मोचरसं त्रिक
टु त्रिफलां तथा॥ लजालु चित्रकं पाठां बिल्वमिंद्रयवान्त्वचां॥ भल्लातकं प्रतिविषां विडंगानि चु
वाकुकं॥ प्रत्येकं पलसन्मानं घृतस्य कुडवं तथा॥ सिद्धे शीते ततो दद्यान्मधुनः कुडवं तथा॥ जये
द्देषोवलेहोयं सर्वाशांसि वेगतः॥ दुर्नामप्रभवान् रोगान्नतीसारमरोचकं॥ ग्रहणीं पांडुरो
गं च रक्तपित्तं च कामलां॥ आम्लपित्तं तथा शोफं कार्श्यं चैव प्रवाहिकां॥ अनुपाने प्रयोक्तव्य
माज्यं तक्रं पयो दधि॥ घृतं जलं वा जीर्णे च पथ्यभोजी भवेन्नरः॥ कुटजाद्यावलेहः॥ कुटजत्व
क्तुलामात्रं द्रोणनीरे विपाचयेत॥ पादशेषं सृतं नीत्वा चूर्णान्येतानि दापयेत्॥ लजालुधात
की बिल्वं पाठा मोचरसस्तथा॥ मुस्तं प्रतिविषा चैव प्रत्येकं स्यात्पलं पलं॥ ततस्तु विपचेद्भूयो याव
द्दर्वीप्रलेपनं॥ जलेन छागदुग्धेन पीतो मंडेन वा जयेत्॥ सर्वातीसारान्घोरांस्तुन्नानावर्णान्सवे
दनात्॥ असृग्दरं समस्तं च सर्वाशांसि प्रवाहिकां॥ कुटजाष्टकावलेहः॥ इति श्री॰ चिकित्सास्थाने
अवलेहकल्पनाध्यायः॥ कल्कात्चतुर्गुणीकृत्य घृतं वा तैलमेव च॥ चतुर्गुणे द्रवे साध्यं तस्य मात्रा
पलोन्मिता॥ निर्दिष्टं क्काथयेत्तोयं क्काथ्यद्रव्याच्चतुर्गुणं॥ पादशिष्टं गृहीत्वा च स्नेहं तेनैव
साधयेत्॥ चतुर्गुणं मृदुद्रव्ये कठिने ष्टगुणं जलं॥ तथा च मध्यमद्रव्ये दद्यादष्टगुणं पयः॥ अ

त्यंतकठिनद्रव्येनीरंषोडशिकंमतं ॥ कर्षादितःपलंयावत्क्षिपेत्षोडशकंजलं ॥ तदूर्ध्वंकुडवंयावद्देवह
ष्टगुणंपयः ॥ प्रस्थादितःक्षिपेन्नीरंखारीयावच्चतुर्गुणं ॥ अंबुक्वाथरसैर्यत्रपृथक्स्नेहस्यसा
धनं ॥ कल्कस्यांशंतत्रदद्याच्चतुर्थषष्ठमष्टमं ॥ दुग्धेदध्निरसेतक्रेकल्कोदेयोऽष्टमांशकैः ॥ कल्कस्यस
म्यक्पाकार्थंतोयमत्रचतुर्गुणं ॥ द्रवाणिपत्रस्नेहेषुपंचादीनिभवंतिहि ॥ तत्रस्नेहसमान्याहुर्यथापू
र्वंचतुर्गुणं ॥ द्रव्येणकेवलेनैवस्नेहपाकोभवेद्यदि ॥ तत्राम्बुपिष्टःकल्कःस्याज्जलंचात्रचतुर्गु
णं ॥ क्वाथेनकेवलेनैवपाकोयत्रेरितःक्वचित ॥ क्वाथद्रव्यस्यकल्कोपितत्रस्नेहेप्रयोज्यते ॥ कल्कही
नस्तुयःस्नेहःससाध्यःकेवलेद्रवे ॥ पुष्पकल्कस्तुयःस्नेहस्तत्रतोयंचतुर्गुणं ॥ स्नेहात्स्नेहाष्टमांश
श्चपुष्पकल्कंप्रयुज्यते ॥ वर्तिवत्स्नेहकल्कःस्याद्यदांगुल्याविवर्तितः ॥ शब्दहीनोग्निनिक्षिप्तःस्नेह
सिद्धोभवेत्तदा ॥ यदाफेनोद्गमस्तैलेफेनशांतिश्चसर्पिषी ॥ वर्णगंधरसोत्पत्तिःस्नेहसिद्धिस्तदाभवेत् ॥
स्नेहपाकस्त्रिधाप्रोक्तोमृदुर्मध्यःखरस्तथा ॥ ईषत्सरसःकल्कस्तुस्नेहपाकोभवेन्मृदुः ॥ मध्यपाक
स्यसिद्धिस्तुकल्केनीरसकोमले ॥ ईषत्कठिनकल्कश्चस्नेहपाकोभवेत्खरः ॥ तदूर्ध्वंदग्धपाकःस्याद्दा
हकृन्निःप्रयोजनं ॥ आमपाकश्चनिर्वीर्योवन्हिमांद्यकरोगुरुः ॥ नस्यार्थंस्यान्मृदुःपाकोमध्य
मःसर्वकर्मसु ॥ अभ्यंगार्थंखरःप्रोक्तोयुंज्यादेवंयथोचितं ॥ घृततैलगुडादींश्चसाधयेन्नैववासरे ॥ प्र
कुर्वंत्युषितास्तेतुविशेषाद्गुणसंचयं ॥ सयप्पा ॥ पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरैः ॥

गोखरु २

ससैंधवश्च पलिकैर्घृतप्रस्थं विपाचयेत्॥ क्षीरं चतुर्गुणं दत्वा तद्घृतं प्लीहनाशनं॥ विषमज्व
रमंदाग्निहरं रुचिकरं परं॥ क्षीरषट्पलं घृतं॥ पिप्पली पिप्पलीमूलं चित्रको हस्तिपिप्पली॥
स्वर्दंष्ट्रा नागरं धान्यं पाठा विल्वं यवानिका॥ द्रव्यैश्च पलिकैरेतैः स्वतुः षष्टिपलं घृतं॥ दध्
ना चतुर्गुणे देयं चांगेरीस्वरसं बुधैः॥ तथा चतुर्गुणं दत्वा दधि सर्पिर्विपाचयेत्॥ शनैः श
नैर्विपक्वं च चांगेरीघृतमुत्तमं॥ तद्धृतं कफवातघ्नं ग्रहण्यर्शोविकारनुत्॥ हंत्यानाहं गु
दभ्रंशं मूत्रकृच्छ्रं प्रवाहिकां॥ चांगेरीघृतं॥ मसूराणां पलशतं नीरद्रोणे विपाचयेत्॥
पादशेषं स्रुतं नीलादत्वा विल्वपलाष्टकं॥ घृतप्रस्थं पचेत्तेन सर्वातीसारनाशनं॥ ग्र
हणीं भिन्नविट्कं च नाशयेच्च प्रवाहिकां॥ मसूराद्यं घृतं॥ अश्वगंधानुलेका स्यात्तद्धर्धो गो

पातालकोहडा २

क्षुरस्मृतः॥ वलामृता शालिपर्णी विदारी च शतावरी॥ पुनर्नवाश्वत्थशुंगकाश्मर्याः

कमलगट्टा २

स्तु फलान्यपि॥ पद्मवीजं माषवीजं दद्याद्दशपलं पृथक्॥ चतुर्द्रोणेंभसः पक्त्वा पादशे

उरिद २

षं स्रुतं नयेत्॥ जीवनीयगणः कुष्ठं पद्मकं रक्तचंदनं॥ पत्रकं पिप्पली द्राक्षा कपिकच्छुफ
लं तथा॥ नीलोत्पलं नागपुष्पं सारिवे द्वे तथा वला॥ पृथक्पर्षसमाभागाः शर्करायाः

कुड्काजर १ नागकेशरि १

मीपरकाछुनगी

गंभारीकाफल

तेजपत्र २

योगकारस१

पलद्वयं ॥ रसस्य पौंड्रकेक्षूणां आढकैकं समाहरेत् ॥ घृतस्य चाढकं दत्वा पाचयेन्मृदुनाग्नि
ना ॥ घृतमेतन्निहंत्याशु रक्तपित्तमुरःक्षतं ॥ हलीमकं पांडुरोगं वर्णभेदं स्वरक्षयं ॥ वातरक्तं
मूत्रकृछ्रं पार्श्वशूलं च कामलां ॥ शुक्रक्षयमरोचकं कार्श्यमोजःक्षयं तथा ॥ स्त्रीणां चैवाप्रजातानां गर्भदं शुक्र
हन्नृणां ॥ कामदेवघृतं नाम हृद्यं वृष्यं रसायनं ॥ कामदेवघृतं ॥ त्रिफलाद्वेनिशेकौंती सारिवे च प्रियंगु
का ॥ शालिपर्णी पृष्ठिपर्णी देवदार्वेलवालकं ॥ नतं विशाला दंती च दाडिमं नागकेसरं ॥ नीलोत्पलैला मंजिष्ठा
विडंगं कुष्ठपद्मकं ॥ जातीपुष्पं चंदनं च तालीसं बृहती तथा ॥ एतैः कर्षसमैः कल्कैर्जलं दत्वा चतुर्गुणं ॥
घृतप्रस्थं पचेद्धीमानपस्मारे ज्वरे क्षये ॥ उन्मादे वातरक्ते च कासे मंदानले तथा ॥ प्रतिश्याये कटीशूले
तृतीयकचतुर्थिके ॥ मूत्रकृछ्रे विसर्पे च कंडूपांड्वामये तथा ॥ विषघ्ने प्रमेहे च सर्वथैवोपयुज्यते ॥ वंध्या
नां पुत्रदं भूतयक्षरक्षोहरं स्मृतं ॥ पानीयकल्याणकं घृतं ॥ अमृताक्काथकल्काभ्यां सक्षीरं विपचेद्घृतं ॥
वातरक्तं जयत्याशु कुष्ठं जयति दुस्तरं ॥ अमृताद्यं घृतं ॥ सप्तछदः प्रतिविषा सम्पाकः कटुरोहिणी ॥ पा
ठा मुस्तमुशीरं च त्रिफला पर्पटस्तथा ॥ पटोलनिंब मंजिष्ठा पिप्पली पद्मकं शठी ॥ चंदनं धन्व
यासश्च विशाला द्वे निशे तथा ॥ गुडूची सारिवे द्वे च मूर्वा वासा शतावरी ॥ त्रायंती इंद्रयवा ष
ष्टी भूनिंबश्चाग्निभार्गिका ॥ घृतं चतुर्गुणं द्राक्षा धात्री आमलकीरसः ॥ द्विगुणैः सर्पिषः
त्रायमाणा २

रेणुकाबीज
तज५ तगर ५ इदारु
न ५ चमेलीपुष्प
६

इदारूनर २

सारिवन४ पद्म
का ४४

ऊ६

छतिवन४ गिरि
माला४ कटुकी
४

कवीला२ कालाखयर४ गंजाविनोजा४

८

स्चात्रजलमष्ठगुणंभवेत॰ तस्मिंद्धपाययेत्सर्पिर्वातरक्तेषुसर्वदा॰ कुष्टानिरक्तपित्तंचरक्तार्शांशिच
पांडुतां॰ हृद्रोगंगुल्मवीसर्पप्रदरंगंडमालिकं॥ न्वुद्नेगुल्मज्वरंचैवमतानिक्रमिस्जयेत॰ मरीचि
कंघृतं॰ कासीसंद्वेनिशेमुस्तंहरितालंमनःशिला॰ कंपिल्लकंगंधकंचविल्वंगुग्गुलुकं तथा॰ सिक्थ
कंमरिचेकुष्ठंतुत्थकंगोरसर्षपान्॥ रसांजनंचसिंदूरंश्रीवासंरक्तचंदनं॰ ह्रिमेदंनिंवपत्रंकरंजंशा
रिवावचा॰ मंजिष्ठामधुकंमांसीशिरीषंलोधपद्मकं॰ हरीतकीप्रपुन्नाडंचूर्णयेत्कार्षिकान्यपृथक॰ तत
स्तुचूर्णमालोड्यत्रिंशत्पलमितेघृते॥ स्थापयेत्ताम्रपात्रेणघर्मेसप्तदिनानिच॰ अस्याभ्यंगेनकु
ष्टानिदद्रुपामाविचर्चिका॰ शूकदोषाविसर्पाश्चविस्फोटावातरक्तजाः॥ शिरःस्फोटोपदंशश्चनाडीदु
ष्टव्रणानिच॰ शोथोभगंदरश्चैवलूताःशाम्यंतिदेहिनां॰ शोधनंरोपणंचैववलवर्णकरंपरं॰ कासीस
घृतं॰ जातीनिंवपटोलंचद्वेनिशेकटुकीतथा॰ मंजिष्ठामधुकंसिक्थंकरंजोशीरसारिवा॰ तुत्थंच
विपचेत्तस्यकल्कैरेभिर्घृतंवुधः॥ अस्यलेपाद्विरोहंतिसूक्ष्मनाडीव्रणाअपि॰ मर्मास्रितास्क्ले
दिनश्चगंभीराःसरुजोव्रणाः॥ जात्याद्यंघृतं॰ चित्रकंखरखिनीपथ्याकंपिल्लस्त्रिवृत्तागुगं॰ वद्धदार
श्वशाम्याकोदंतीचत्रिफलातथा॰ कोशातकीदेवदालीनीलिनीगिरिकर्णिका॰ सातलापिप्पलीमू

Marginal annotations (left): तुतीया४, ज्येष्ठीमधु:५, चमेलीपत्र४

Marginal annotations (right): मोम२, चकवड५ हाल४, कचेडना२, कवीला२

Interlinear additions: मोम (above कंसिक्थं), निसोत (above त्रिवृत्ता)

गिरिमाला१ वनतरोई१ वंदाल१ अपराजिता१ छिमियासेहुड१

यावत्तैलस्य निर्विंदू निषिच्येत्तावन्मात्रं यएखरि स्यतऽति ३

चोक १ सेकुं ३१

लं विडंगं कटुकी तथा ॰ हेमक्षीरी च विपचेत्कल्कैरेभिः पिचून्मितैः ॥ घृतप्रस्थं स्नुहीक्षीरे षट्पलं तु पलद्व
यं ॰ अर्कक्षीरस्य मतिमान् स्नुक्सिद्धं कुष्ठगुल्मनुत् ॰ हंति शूलं गुदावर्त्तं शोफाध्मानभगंदरान् ॰ नाशयेत्तु द
राण्यष्टौ निपीतं विडसंज्ञकं ॰ गोदुग्धेनोष्णदुग्धेन कोलस्पेन शतेन वा ॰ उष्णोदकेन वा पीत्वा विडंवं गो विरि
च्यते ॰ एतद्धि विडघृतं नाम नाभिलेपाद्विरिच्यते ॰ विडघृतं ॰ त्रिफलापारसप्रस्थं प्रस्थं वा सारसोभवं
भृंगराजरसप्रस्थं प्रस्थमाज्यं पयः स्मृतं ॰ द्वात्त्र घृतप्रस्थं कल्कैः कर्षमितैः पृथक् ॰ त्रिफला पि
प्पली द्राक्षा चंदनं सैंधवं बला ॰ काकोली क्षीरकाकोली मेदा मरिचनागरं ॰ शर्करा पुंडरीकं च कम
लं च पुनर्नवा ॰ निशायुग्मं च मधुकं सर्वैरेभिर्विपाचयेत् ॰ नक्तांध्यं नकुलांध्यं च कंडूपिल्लं तथैव च
॰ नेत्रस्रावं च पटलं तिमिरं काचकं जयेत् ॰ अन्येपि प्रशमं याति नेत्ररोगाः सुदारुणाः ॥ त्रैफलं
घृतमेतद्धि पानेन स्यादिह सूच्यते ॰ त्रैफलं घृतं ॰ द्वे हरिद्रे स्थिरा मूर्वा सारिवा चंदनद्वयेः ॥
मधुपर्णी च मधुकं पद्मकेशरपत्रकैः ॥ उत्पलोशीरमेदाभिस्त्रिफलापंचवल्कलैः ॥ कल्कैः
कर्षमितैरेतैर्घृतप्रस्थं विपाचयेत् ॰ विसर्पलूताविस्फोटविषकीटव्रणापहं ॰ गौराद्यमि
ति विख्यातं सर्पिर्विषहरं स्मृतं ॰ गौराद्यघृतं ॰ वला मधूकरास्नाभिर्द्राम्लफलत्रिकैः ॥ पप

रक्तनीलं वा ७

ज्येष्ठीमधुमेहः २

श्वेतकमलं ६

सालपर्णी ५

जीवद्वत्सा स्त्रकवर्णायागोतस्या घृतमिति जीवद्वत्सा ग्रहणमतिमंगलत्वात्

क्वाथे पलिके रेभिर्द्रोणेनीरेण पाचयेत् ॥ मयूरं पक्षपित्तांत्रशकृत्पादास्यवर्जितं ॥ पादशेषं शृतं
नीत्वा क्षीरं दत्वा च तत्समं ॥ घृतप्रस्थं पचेत्सम्यक् जीवनीयैः पिचून्मितैः ॥ तत्सिद्धं शिरसः पी
डामन्यापक्षाग्रहस्तथा ॥ अर्दितं कर्णनाशान्ति जिह्वागलरुजो जयेत् ॥ पानेनस्येन तथाभ्यंगे कर्ण
पूरे प्रयुज्यते ॥ हेमंतकाले शिशिरे वसंते प्रुच सेव्यते ॥ मयूरघृतं ॥ त्रिफलं मधुकं कुष्ठं द्वे निशे
कटुरोहिणी ॥ विडंगं पिप्पली मुस्तं विशाला कट्फलं वचा ॥ द्वे मेदे द्वे च काकोल्यौ सारिवे द्वे प्रियंगु
का ॥ शतपुष्पा हिंगुरास्ना चंदनं रक्तचंदनं ॥ जाती पुष्पं तुगाक्षीरी कमलं शर्करा तथा ॥ अजमो
दा च हंती च कल्कैरेतैश्च कार्षिकैः ॥ जीवद्वत्सैकवर्णाया घृतं प्रस्थं च गोः पचेत् ॥ चतुर्गुणेन पयसा
पचेद्धाररापगामये ॥ सुतिथौ पुष्यनक्षत्रे मृद्भांडे तानि जे पवी तेतं ॥ पिवेत्कुभदिने नारी च पुरुषोप
वा ॥ एतत्सर्पिर्नरः पीत्वा स्त्रीषु नित्यं वृषायते ॥ पुत्रान्जनयते धीरान् वंध्यापि लभते सुतं ॥ अल्पायुषं
वा जनयेद्या च स्त्री या पुनः स्त्रियं ता ॥ पुत्रं प्राप्नोति सा नारी बुद्धिमंतं शतायुषं ॥ एतत्फलघृतं नाम भा
रद्वाजेन भाषितं ॥ अनुक्तं लक्षणं मूलं स्निपेत्तत्र चिकित्सकः ॥ फलघृतं ॥ वृषनिम्बामृता व्या
घ्रीपटोलानां शृतेन च ॥ कल्केन पक्वं सर्पिस्तु निहन्याद्विषमज्वरान् ॥ पांडुकुष्ठविसर्पिश्च हलीमी

धृं८ कारी१

अरुष१ कुरभीरास्ना१

नर्शांसि नाशयेत्॰ पंचतिक्तकं घृतं॰ सलचरे देत्रिफलांगुडूची सप्तनर्णवां॰ श्रुकेना सा हरिद्रे द्वे रास्ना
मेदां शतावरीन्॰ कल्कीकृत्य घृतप्रस्थं पचेत् क्षीरे चतुर्गुणे॰ तत्सिद्धं पाययेन्नारीं योनिशूलनि
पीडितं॰ पलिताश्चलिता याश्च निःस्रुता विवृताश्च याः॰ पित्तयोनिश्च विभ्रांता षंडयोनिश्च याः स्मृताः॰ प्रप
द्यंते हिताः स्यान्नंगर्भं गृह्णाति चाशु सः॰ रतत्फलघृतं नाम योनिदोषहरं परं॰ फलघृतं॰ इति शार्ङ्ग
धरे घृतकल्पनाध्यायः॥ अथ तैलानि॰ लाक्षाढकं घृता पपीत्वा जलस्य चतुराढके॥ चतुर्थांशं
शृतं नीत्वा तैलप्रस्थं विपाचयेत्॰ मस्त्वाढकं च गोदध्नस्तत्रैव विनियोजयेत्॰ शतपुष्पाम स्व
गंधा हरिद्रे द्वे दारु च॰ कटुकं रेणुकां मूर्वा कुष्ठं मधुकयष्टिकं॰ चंदनं मुस्तकं रास्नां पृथक्कर्ष
प्रमाणतः॥ चूर्णयेत्तत्र निःक्षिप्य साधयेन्मृदुवह्निना॰ अस्याभ्यंगात्प्रशाम्यंति सर्वेपि वि
षमज्वराः॥ कासश्वास प्रतिश्यायत्रिकपृष्ठग्रहास्तथा॰ वातपित्तमपस्मारमुन्मादं यक्ष्म
राक्षसान्॰ कंडूशूलं च दौर्गंध्यं गात्राणां स्फुटनं च यत्॰ पुष्टगर्भा भवेद्यस्य गर्भिण्यभ्यंग
तो भृशं॰ लाक्षादितैलं॰ चंदनं कुंदुरखवारमष्टं शैलेयपद्मकं॰ मंजिष्ठा शरलं दारु सद्ये
लाम्ब्रतिकेशरं॰ पत्रं तैलं मुरामांसी कंकोलं वनितामृदं॰ हरिद्रे सारिवे तिक्ते लवंगागुरुकुंकुमं॰

जटामांसी ६ छडीला ६ गोखुरू २ ककडीकाबीज २ अरलु २ गंधपसारन २ टेकारी २

त्वग्रेगुनासिकाश्चैव तैलान्यस्य चतुर्गुणं गलान्नारसस्तमंस्तिक दुग्धं च बलवर्णितं ० अपस्मा
रज्वरोन्मादकुष्ठालक्ष्मीर्ज्वरापहं ० आयुःपुष्टिकरं चैव वशीकरणमुत्तमम् ० चंद्रनाघृतैलं ० अ
श्वगंधाबला बिल्वं पाटली बृहती द्वयं ० स्वदंष्ट्रातिबलानिम्ब श्योनाकं च पुनर्नवां ० प्रसारणीमग्नि
मंथं कुर्याद्दशपलं पृथक् ० चतुर्द्रोणे जले पक्त्वा पादशेषं शृतं नयेत् ० तैलाढकेन संयोज्य शताव
र्यारसाढकं ० न्निपेत्तत्र च गोक्षीरं तैलात्तस्माच्चतुर्गुणं ० शनैर्विपाचयेदेभिः कल्कैर्द्विपलि
कैः पृथक् ० कुष्ठैलाचंदनं वालं मांसी शैलेय सैंधवैः । अश्वगंधाबलारास्नाशतपुष्पैं द्वारुभिः
पर्णी चतुष्टयेनैव तगरेण च साधयेत् ॥ तत्तैलं नावनेभ्यंगे पाने वस्तौ च योजयेत् ० पक्षाघातं हनु
इंद्रियविध. यनाशः
स्तंभं मन्यास्तंभं शिरोग्रहं ॥ कुब्जत्वं बधिरत्वं च गतिभंगं कटिग्रहं ० गात्रशोषेंद्रियध्वंसान्न
ष्टशुक्रज्वरक्षयान् ० अंत्रवृद्धिं कुरंगं च दंतरोगं शिरोग्रहं ० पार्श्वशूलं च पांगुल्यं बुद्धिहानिं च
गृध्रसीं ॥ अन्यांश्च विविधान्वातान्जयेत्सर्वांगसंश्रयान् ॥ अस्य प्रभावाद्वंध्यापि नारी पुत्रं
प्रसूयते ० मर्त्यो गजो वा तुरगस्तैलादस्मात्सुखी भवेत् ० यथा नारायणो देवो दुष्टदैत्यविना
शनः ॥ तथैव वातरोगाणां नाशनं तैलमुत्तमं ॥ इति नारायणं तैलं ॥ मूलमुत्तरवारुणपाः कु

सालिवन पिठवन मुगउनै सोनी ६

कुहारुन ६

वलाक्वाथस्याष्टौ भागाः तैलभागापेक्षया ४ एवं सर्वत्र मष्टौ अष्टौ भागा ज्ञेया तैलापेक्षया ४
छुडिलार्थ

भागयुक्तेन ४

दितं तु पलत्रयं॰ पलं दद्यात् दशांकं तैलं न्हणं वन्हौ विपाचितं॰ जिह्वत्रयं भक्तयुक्तं सेवनात्तु स्तम्भप्रपातिः॰ ह
स्तकंपशिरःकंपः कंपो मन्याशिरोभवः॥ कुंपतारितैलं॰ वलामूलकषायेण दशमूलशृतेन च॰ कु
वदरी
लत्थयवकोलीनां क्वाथेन पयसा तु पा॰ अष्टांशभागमेकं च तैलतः॥ क्वाथेन जीवनीयेन शतावर्यैन्द्रवा
रुणीं॥ मंजिष्ठाकुष्ठशैलेयतगरागुरुसैंधवैः॥ वचापुनर्नवामांसीसारिवाह्वयपत्रकैः॥ शतपुष्पा
श्वगंधाभ्यां मेलयित्वा विपाचयेत्॰ पादशिष्टं शृतो ग्राह्यस्तैलं दधि च तत्समं॰ कांजिकं च समं तेन
क्षीरं तैलाच्चतुर्गुणं॥ गर्भार्थिनीनां नारीणां पुंसां च क्षीणरेतसां॰ व्यायामक्षीणगात्राणां सूति
कानां च प्रजल्पतः॰ राज्ञां योग्यमिदं तैलं सुखिनां च विशेषतः॥ वलातैलमिदं ख्यातं सर्ववातो
गंधपसा से॰ ८॰ १६
मयापहं॰ वलातैलं॰ प्रसारणी पलशतं जलद्रोणेन पाचयेत्॰ पादशिष्टः शृतो ग्राह्यस्तै
लं दधि च तत्समं॰ कांजिकं च समं तेन क्षीरं तैलाच्चतुर्गुणं॰ तैलात्त पादमांसेन सर्वकल्का
गंधपसारने
निकारयेत्॰ मधुकं पिप्पलीमूलं चित्रकं सैंधवं वचा॰ प्रसारणी देवदारु रास्ना च गज
पिप्पली॰ भल्लातः शतपुष्पा च मांसी चेतैर्विपाचयेत्॰ एतत्तैलवरं पक्वं वातश्लेष्माम
यान्जयेत्॰ कौब्जं खंजत्वपंगुत्वं गृध्रसी मर्दितं तथा॰ हनुपृष्ठशिरोग्रीवाकटिस्तंभं च नाशयेत्

कोसरैयीपरफूल२गोखुरू२अरलू२

जरिही तीसी१ कटकारि१ कवाचवीज१

अन्यांश्चविषमान्वातान्सर्वानाशुव्यपोहति॥ प्रसारणीतैलं॰ माषायवातसीन्कुष्ठमर्कटीच
कुरंटकः॥ गोकंटकश्चुंडुकश्चैषांकुर्यात्सप्तपलंपृथक्॰ चतुर्गुणेनमधुनापक्त्वापादशेषंशृतंन
येत्॰ कर्पासकास्थिवदरंसनबीजंकुलत्थकं॰ पृथक्तुदशपलंचतुर्गुणजलेपचेत्॰ चतुर्भा
गावशिष्टंचगृह्णीयात्क्वाथमुत्तमं॰ प्रस्थैकंछागमांसस्यचतुःषष्टिपलेजले॰ निःक्षिप्यपा
चयेद्धीमान्पादशेषंशृतंनयेत्॰ तैलप्रस्थंततःक्वाथान्सर्वान्येतान्विनिःक्षिपेत्॰ कल्कैरेभिश्चवि
पचेदमृताकुष्ठनागरैः॥ रास्नापुनर्नवैरंडैःपिप्पल्याशतपुष्पया॰ वलाप्रसारणीभ्यांच
मांसीकटुकयातथा॰ पृथगर्द्धपलैरेतैःसाधयेन्मृदुनाग्निना॰ हन्यात्तैलमिदंशीघ्रंमन्या
स्तंभावबाहुकं॰ अर्द्धांगशोषमान्द्येपमूरुस्तंभावतानकौ॰ शाखाकंपंशिरःकंपंविश्वाची
मर्दितंतथा॰ माषादिकमिदंतैलंसर्ववातविकारनुत्॰ माषाद्यतैलं॰ शतावरीवलायुग्मंपरोपी

एरंडमूल४

गंधर्वहस्तकः॥ अश्वगंधास्वदंष्ट्राचविल्वःकासःकुरंटकः॥ एषांसार्द्धपलान्भागान्कल्पयेच्च
विपाचयेत्॰ चतुर्गुणेननीरेणपादशेषंशृतंनयेत्॰ वियोज्यतैलप्रस्थेनक्षीरप्रस्थंविनिःक्षि
पेत्॰ शतावरीरसप्रस्थंजलप्रस्थंचयोजयेत्॰ शतावरीदेवदारुमांसीतगरचंदनं॰ शत
पुष्पोवलाकुष्ठमेलाशैलेयमुत्पलं॰ ऋद्धिर्मेधावमधुकंकाकोलीजीवकस्तथा॰ एषांकर्ष

श्रीराम०
शा०ध०५०

अमृतेन१ लभमाप्नोति१

समैः कल्कैस्तैलं गोमयवन्हिना० पचेत्तन्मूर्द्ध्नि तैलेन नरः स्त्रीषु वृषायते० नारी च लभते पुत्रं
योनिशूलं च नश्यति० अंगशूलं शिरःशूलं कामला पांडुनागरं० गृध्रसीं प्लीहशोफांश्च मेलाहं
पतानकं० सदाहं वातरक्तं च वातपित्तं महार्द्दितं० अशृंग्जरं तथाध्मानं रक्तपित्तं नियच्छति०
शतावरीतैलमिदं हस्तमात्रेयेण भाषितं० ॐ नारायण्यै तैलस्वाहा० उत्तराभिमुखो भूत्वा खने
त्खदिरशंकुना० ॐ सर्वव्याधिसाधनीये स्वाहा० इत्युत्पाटनमंत्रः॥ ॐ कुमारीजीवनीये स्वाहा०
इति पाचनमंत्रः॥ शतावरी दिव्यौषधी० शतावरीतैलं० कासीसं लांगली कुष्ठं शुंठी हलसा च
सैंधवं॥ मनःशिलाश्वमारश्च विडंगं चित्रकद्रुमः॥ दंती कोशातकीबीजं हेमाव्हा हरिता
लकं॥ कल्कैः कर्षमितैस्तैलैरेतैः प्रस्थं विपाचयेत्० स्नुह्यर्कपयसा रघोत्रिये गद्विप
लसंमितं॥ चतुर्गुणं गवां मूत्रं दत्वा सम्यक्प्रसाधयेत्० कथितं खरनादेन तैलमर्शो
विनाशनं॥ क्षारवत्पातयेदेतदर्शांस्यभ्यंगतो भृशं० वलीं न दूषयेत्यैतत् क्षारकर्मकरं स्मृतं
कासीसाद्यं तैलं॥ मंजिष्ठा सारिवा सर्जी पथ्याशिक्थकेशैः प[illegible]लोन्मितैः॥ पिंडाख्यं साधये
त्तैलमभ्यंगाद्वातरक्तनुत्० पिंडतैलं॥ अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतं॥ नाशये

रालर मोमर

अ२३ल६

करियारी६
कुब्जद

दुग्धोद्दलं १

इद्दारुन २

निसोथ १

त्वार्षपं तैलं पामा कच्छु विचर्चिकां॰ अर्कतैलं॥ मरिचं हरितालं च त्वचं तारं रक्तचंदनम्॥ मुस्तं मनःशिला
मांसी द्वे निशे देवदारु च॰ विशाला करवीजं च कुष्ठमर्कपयस्तथा॰ तथैव गोमयरसं कुर्यात्कर्षमितं पृथ
क्॥ विषं चार्द्धपलं देयं प्रस्थं च कटु तैलकं॰ गोमूत्रं द्विगुणं दद्यात् जलं चाद्विगुणं भवेत्॥ मरिचाद्यमिदं तै
लं सर्वकुष्ठविनाशनं॥ जयेच्छित्राणि सर्वाणि पुंडरीकं विचर्चिकां॰ पामां सिध्मां च रेकसां कंडूं कच्छुं प्र
णाशयेत्॥ मरिचाद्यं तैलं॥ त्रिफलातिरिष्टभल्लातनिम्बं हनिशोरक्तचंदनं॰ रतैः सिद्धं मत्स्यार्णां तैलमभ्यं
जने हितं॰ त्रैफलं तैलं॰ भावयेन्निम्बवीजानि भृंगराजरसेनहि॰ तथासनस्य तोयेन तत्तैलं हंति नस्य
तः॥ अकालपलितं सद्यः दुग्धान्न सेविनां॰ यष्टीमधूकसाराभ्यां नवधात्रीफलैः शृतं॰ तैलेन
स्येल तं कुर्यात्केशान् श्मश्रूणि सर्वशः॥ यष्टीमधुकतैलं॰ करंजश्चित्रकौ जाती करवीरश्च पाचि
तं॰ तैलमेभिर्हुतं हन्याद्भ्यंगाद्धि द्रुलुस्तकं॰ करंजाद्यं तैलं॰ नीलिका केतकीकंदं भृंगराजः कुरंटकः॥ तथा
र्जुनस्य पुष्पाणि वीजकः सुमनापि च॰ कस्मातिलाश्च तगरं सम्मूलं कमलं तथा॰ अयोरजः प्रियंगु
श्च दाडिमत्वग्गुडूचिका॰ त्रिफला पद्मपंकश्च कल्कैरेभिः पृथक्पृथक्॰ कर्षमानैः पचेत्तैलं त्रिफलाक्वा
थसंयुतं॥ भृंगराजरसेनैव स्निग्धं केशस्थिरीकरं॰ अकालपलिते हंति दारुणं चोपजिह्विकाम्॥ नीलि
काद्यतैलं॥ भृंगराजरसेनैव लोहकिट्टं पलत्रिकं॥ सारिवां च पचेत्कल्कैस्तैलं दारुणनाशनं॥ अका

लोहचूर्ण १

असनस्यसार

कमलमूलस्यघ्रतिरो ३

नूतन

सुमना जातीतस्या पत्राणि ४

वालमूलकं लशुनं मूलं तस्य शुंगा नालविशोषस्तजातं क्षारं ८

लपलितं कंडूमिंद्रलुप्तं च नाशयेत्० भृंगराजतैलं॥ इरिमेदत्वचं क्षुण्णां पचेच्छतपलोन्मितं० जलद्रोणेन
तत्क्वाथं गृह्णीयात् पादशेषितं० तैलस्यार्धाढकं दत्वा कल्कैः कर्षमितैः पृथक्० इरिमेदलवंगाभ्यां गैरिका
गुरुपद्मकैः॥ मंजिष्ठालोध्रमधुकैर्लाक्षान्यग्रोधमुस्तकैः। त्वग्जातीफलकर्पूरकंकोलखदिरैस्तथा
पतंगधातकीपुष्पसूक्ष्मैलानागकेसरैः॥ कट्फलेन च संसिद्धं तैलं मुखरुजं जयेत्० प्रदुष्टमांसं च
लितं शीर्णदंतं च शोषिरं० शीतादं दंतहर्षं च विद्रधिं कृमिदंतकं० दंतस्फुटनदौर्गंध्यं जिह्वातात्वोष्ठ
जां रुजां० इरिमेदाघं तैलं० हिंगुतुंबरुशुंठीभिः कटुतैलं विपाचयेत्० तेन पूरणमात्रेण कर्णशूलं
नियच्छति० बिल्वमूत्रजटाकल्कं पचेत्तैलं तिलोद्भवं० साजक्षीरं सनीरं च बाधिर्ये कर्णपूरणं०
बिल्वघं तैलं० वालमूलकशुंठीनां क्षारं क्षारपुगं तथा० लवणानि च पंचैव हिंगुशिग्रुमहौषधं० देव
दारुवचाकुष्ठं शतपुष्पारसांजनं० ग्रंथिकं भद्रमुस्तं च कल्कैः कर्षमितैः पृथक्० तैलप्रस्थस्य वि
पचेत् कदलीबीजपूरयोः॥ रसाभ्यां मधुशुक्तेन चतुर्गुणमितेन च० पूयस्रावं कर्णनादं शूलं बाधिर्यतां
कृमीन्० अन्यांश्च कर्णजान् रोगान् मुखरोगं च नाशयेत्० जंबीराणां फलरसः प्रस्थैकः कुडवोन्मितं
माक्षिकं तत्र दातव्यं पलैकां पिप्पलीस्तथा० एतदेकीकृतं सर्वं मधुभांडे निधापयेत्० धान्यराशौ स्थि
तं मासं मधुशुक्तमुदाहृतं० मधुशुक्तविधानं० क्षारतैलं० पाठा द्वे च निशे मूर्वा पिप्पली जातिपल्लवैः॥

बालबिल्वानि मूत्रेण पिष्ट्वा तैलं विपाचयेत् २

२।।८६

धौरगणशाकवाक्यं २ यवक्षारं २ करंजः २ अपामार्गवीजं २

धत्तूरचित्रकयोः द्वंस्वरसः ४

कंटकारिः १ सहिजनके सोठि १

ह्यत्याच्च तैलं संसिद्धं नस्यं स्यात् दुष्टपीनसे। पाठाद्यं तैलं॥ व्याघ्रीदन्तीवचाशिग्रुतुलसीव्योषसैन्धवैः॥ कल्कैश्च पाचितं तैलं पूतिनासागदापहं। व्याघ्रीतैलं। कुष्ठबिल्वकरगुण्ठीद्राक्षाकल्ककषाययुक्। साधितं तैलमाजंवा न स्यात् क्षवथुनाशनं। कुष्ठतैलं। गृहधूमकणादारुक्षारनक्ताह्वसैन्धवैः॥ सिद्धं शिखरिवीजैश्च तैलं नासार्शसां हितं। गृहधूमतैलं। वज्रीक्षीरं रविक्षीरं द्वे वंधत्तूरचित्रकं॥ माहिषीविड्रसं सर्वैः शंतिलतैलकं। पचेत्तैलावशिष्टं तु गोमूत्रे पचेत् तुरगणे। तैलावशेषं पल्लं चेत् तत्तैलं प्रस्थमात्रकं। गंधकाग्निशिलातालं विडंगातिविषाविषं। तिक्तकोशातकीकुष्ठंवचा मांसी कटुत्रयं। पीतदारु सर्जरसं ध्यारं स्वर्जिकास्थूलहीरकं। देवदारु च कंपिल्लं चूर्णं तैले विमिश्रयेत्। वज्रतैलमिदं स्यात्तमभ्यंगात्सर्वकुष्ठनुत्। वज्रतैलं। करवीरशिखा इत्तीत्रिवत्स्नाशातकीफलं। रंभा हारीतद्रव्ये तैलं प्रशस्तं लोमशातनं॥ करवीरादितैलं। इति सार्ङ्गधरे तैलकल्पनाध्यायः॥ द्रवेषु चिरकालस्थं द्रव्यं यत्साधितं भवेत्। आसवारिष्टभेदैस्तु प्रोच्यते भेषजोचितं। यदपक्वौषधांबुभ्यां सिद्धमासवं उच्यते। अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं पलोन्मितं। अनुक्तमानारिष्टेषु द्रवद्रोणे गुडं तुलं। क्षौद्रं क्षिपेत् गुडादर्धं प्रक्षेपादंशमांसिकं। ज्ञेयः शीतरसः सीधुरपक्वमधुरद्रवैः॥ सिद्धः पक्वरसः सीधुः संपक्वमधुरद्रवैः॥ परिपक्वान्नसंधानसमुत्पन्नां सुरां जगुः॥ सुरामंडः प्रसन्ना स्यात्ततः कादम्बरी घना। तदधो जगलो ज्ञेयो मेदको जगलाद्घनः॥ वक्कसो हृतसारः स्यात्सुरावीजं च किण्वकं॥

हरितालमनःशिला
भल्लातकः ५
चित्रकजटा
हारजीरकं ६

कुल्माषा कुत्सितमाषा ४ मंडं शालिभेदप्रसिद्धं ४ आदिशब्दाद्यवचूर्णादिकृतमपि योज्यं ४

यत्रालवखर्जूररसैः संसिद्धा सापि वारुणी॰ कंदमूलफलादीनि सस्नेहलवणानि च॰ पत्रद्रवे विषूयंते तत्सुक्तमभि धीयते॰ गुडांबुना सतैलेन कंदशाकफलैस्तथा॰ संधितं चाम्लतां यातं गुडशुक्तं तदुच्यते॰ एवमेवेक्षुशुक्तं स्यान्मृद्वीकासंभवं तथा॰ तुषांबु संधितं ज्ञेयमामैर्विदलितैर्यवैः॥ यवैस्तु निस्तुषैः पक्वैः सौवीरं संधितं भवेत्॰ कुल्माषधान्यमंडादि संधितं कांजिकं विदुः॥ शंडाकी संधिता ज्ञेया मूलकैः सर्षपादिभिः॥

अपासवः॥ उशीरं वालकं पद्मं काश्मरीं नीलमुत्पलं॰ प्रियंगुपद्मकं लोध्रं मंजिष्ठा धन्वयासकं॰ पाठां किराततिक्तं च न्यग्रोधोडुम्बरं शठी॰ पर्पटं पुंडरीकं च पटोलं काचनारकं॰ जंबूशाल्मलिनिर्यासं प्रत्येकं पलसम्मितं॰ भागान्सुचूर्णितान्कृत्वा द्राक्षाया पलविंशतिं॰ धातक्याः षोडशपलं जलद्रोणद्वये क्षिपेत्॰ शर्करायास्तुलां दत्वा क्षौद्रस्यैकतुलां तथा॰ मासैकं स्थापयेद्भांडे मांसी मरिच धूपिते॰ उशीरासव इत्येष रक्तपित्तनिवारणः॥ पांडुकुष्ठप्रमेहार्शः कृमिशोफज्वरापहः॥ उशीरासवः॥ पिप्पली मरिचं चव्यं हरिद्रा चित्रको घनः॥ विडंगं क्रमुको लोध्रः पाठा धात्र्येलवालुकं॰ उशीरं चंदनं कुष्ठं लवंगं तगरं तथा॰ मांसी त्वगेला पत्रं च प्रियंगुर्नागकेशरं॰ एषामर्द्धपलान्भागान्सुक्ष्मचूर्णीकृतान्शुभान्॥ जलद्रोणद्वये न्हिप्त्वा दद्याद्गुडतुलात्रयं॰ पलानि दश धातक्या द्राक्षा षष्टिपला भवेत्॰ एतान्येकत्र संयोज्य मृद्भांडे विनिक्षिपेत्॰ शालागतेरसैतस्य पाययेदम्यपेक्षया॰ न्यायंगु आगत्तरसंज्ञाला दृढं देनहलता घर्षयेत् पश्चाद्दगालितापायेते

मांसी मरिच धूपि तै भांडे ६

अथवा धनंजयमग्नितीव्रतां पाचकशक्तिसामर्थ्यं यथा स्यात्तथा कुर्यात् ८

ल्मोदरं कार्श्यग्रहणीं पांडुतां तथा॰ अर्शांसि नाशयेच्छीघ्रं पिप्पल्याद्यासवस्त्वयं॰ पिप्पल्याद्यासवः॥ लोह
चूर्णं त्रिकटुकं त्रिफला च यवानिका॰ विडंगमुस्तकं चित्रं चतुःसंख्याः पलं पृथक्॰ चूर्णीकृत्य ततः क्षौद्रं चतुःषष्टि
पलं क्षिपेत्॰ दद्याद्गुडतुलां चैव जलद्रोणद्वयं तथा॰ घृतभांडे विनिःक्षिप्य निदध्यान्मासमात्रकं॰ लोहासवमि
दं मर्त्यः पिबेद्वह्निकरं परं॰ पांडुश्वयथुगुल्मानि जठराण्यर्शसां रुजं॰ कुष्ठं प्लीहामयं कंडूकासं श्वासं भगंद
रं॰ अरोचकं च ग्रहणीं हृद्रोगं च विनाशयेत्॰ लोहासवः॰ अथारिष्टः॰ तुलां कुटजमूलस्य मृद्वीकार्द्धतु
लां तथा॰ मधूकपुष्पकाश्मर्यभागान्दश पलोन्मितान्॰ चतुर्द्रोणेंऽभसः पक्त्वा द्रोणशेषे विशेषिते॰ धात
क्या विंशतिपलं गुडस्य च तुलां क्षिपेत्॰ मासमात्रं स्थितं भांडे कुटजारिष्टसंज्ञकः॥ ज्वरान्प्रशमयेत्स
र्वान्कुर्यात्तीव्रं धनंजयं॰ कुटजारिष्टः॥ विडंगग्रंथिकं रास्ना कुटजत्वक्फलानि च॰ पाठेलावालुकं
धात्रीभागान्पंचपलान्पृथक्॰ अष्टद्रोणेंऽभसः पक्त्वा कुर्याद्द्रोणावशेषितं॰ पूते शीते क्षिपेत्तत्र क्षौद्रं पलश
तत्रयं॰ धातकीविंशतिपलं त्रिजातं द्विपलं तथा॰ प्रियंगुकांचनाराणां सलोध्राणां पलं पलं॰ व्योषस्य च प
लान्यष्टौ चूर्णीकृत्य प्रदापयेत्॰ घृतभांडे विनिःक्षिप्य मासमेकं विधारयेत्॰ ततः पिबेद्यथावह्नि जयेद्विद्रधि
मुद्धृतं (?)॰ ऊरुस्तंभाश्मरीमेहान्प्रत्यष्ठीलाभगंदरान्॰ गंडमालां हनुस्तंभं विडंगारिष्टसंज्ञितः॥ विडंगा
रिष्टः॥ तुलार्द्धं देवदारुः स्याद्वासायाः पलविंशतिः॥ मंजिष्ठेंद्रयवा दंती तगरं रजनीद्वयं॰ रास्ना कृमिघ्नमुस्तं

कोरइया   पित्त पापड़ा

चशिरीषंखदिरार्जुनौ॰ भागान्दशपलान्दद्याद्यवान्यावत्सकस्यच॰ चंदनस्यगुडूच्याश्चरोहिण्याश्चित्रकस्य
च॰ भागानष्टपलानेतानष्टद्रोणेंभसःपचेत्॰ द्रोणशेषेकषायेचपूतेशीतेप्रदापयेत्॰ धातक्याःषोडशपलंमा
क्षिकस्यपलत्रयं॰ व्योषस्यद्विपलंदद्यात्त्रिजातेकचतुःपलं॰ चतुष्पलंप्रियंगोश्चद्विपलंनागकेसरं॰ सर्वा
ण्येतानिसंचूर्ण्यघृतभांडेविधारयेत्॰ मासादूर्ध्वंपिबेदेनंप्रमेहंहंतिदुर्जयं॰ वातरोगान्ग्रहण्यर्शोमूत्रकृ
च्छ्राणिनाशयेत्॰ देवदार्व्यादिकोरिष्टःदद्रुकुष्ठविनाशनः॥ देवदार्व्यरिष्टः॥ खदिरस्यतुलार्द्धंतुदेवदारु
चतत्समं॰ वाकुचीद्वादशपलादार्वीस्यात्पलविंशतिः॥ त्रिफलाविंशतिपलमष्टद्रोणेंभसःपचेत्॰ कषाये
द्रोणशेषेचपूतेशीतेविनिक्षिपेत्॰ तुलाद्वयंमाक्षिकस्यतुलैकाशर्करामता॰ धातक्याविंशतिपलंकंको
लंनागकेशरं॰ जातीफललवंगैलात्वक्पत्राणिपृथक्पृथक्॰ पलोन्मितानिकृष्णायाद्द्यात्पलचतुष्ट
यं॰ घृतभांडेविनिक्षिप्यमासादूर्ध्वंपिबेत्ततः॥ महाकुष्ठानिहृद्रोगंपांडुरोगार्बुदंतथा॰ गुल्मग्रंथीन्
कृमीन्कासंतथाप्लीहोदरंजयेत्॰ एषोवैखदिरारिष्टःसर्वकुष्ठनिवारणः॥ खदिरारिष्टः॰ तुलाद्वयं
तुबब्बूल्याश्चतुर्द्रोणेजलेपचेत्॰ द्रोणशेषेजलेशीतेगुडस्यात्रितुलांक्षिपेत्॰ धातकीषोडशपलांत्रिफ
लांचद्विपलांशिकां॰ जातीफलानिकंकोलमेलात्वक्पत्रकेशरं॰ लवंगंमरिचंचैवपलिकान्युपकल्पयेत्
मासंभांडेस्थितस्त्वेषबब्बूल्यारिष्टकोजयेत्॰ क्षयंकुष्ठमतीसारंप्रमेहंश्वासकासान्॰ बब्बूल्यारिष्टः॥

दन्त्यातुलार्द्धं द्विद्रोणे जलस्य विपचेत्सुधीः ॥ पादशेषे कषाये च पूते शीते विनिक्षिपेत्। गुडस्य द्वितुलां तत्र त्व
गेलापत्रकेशरं। प्रियंगुमरिचं तथा विडंगं चेति चूर्णयेत्। पृथक्पलोन्मितैर्भागैस्ततो भांडे निधापयेत्। समंततो
मर्द्दयित्वा पिबेज्जातरसं ततः ॥ उरःक्षतं क्षयं हन्ति कासश्वासगलामयान्। दन्त्यारिष्टाह्वयः प्रोक्तो बलकृन्मल
शोधनः ॥ दन्त्यारिष्टः ॥ रोहितकात्तुलामेकां चतुर्द्रोणे जले पचेत्। पादशेषे रसे शीते पूते पलशतद्वयं द्द्या
द्गुडस्य धातक्याः पलषोडशिका मता। पंचकोलं त्रिजातं च त्रिफलां च विनिक्षिपेत्। चूर्णयित्वा पलांशेन ततो
भांडे निधापयेत्। मासादूर्ध्वं च पिबतां गुदजा यांति संक्षयं। ग्रहणी पांडुगुल्मोदराणि च। कुष्ठशोफारुचितनो
रोहितारिष्टसंज्ञिताः ॥ रोहितारिष्टः ॥ परोपीवहत्योगोनाकं ठविल्वाग्निमंथश्योनाकरलुः ॥ पाटलाकाश्मरी चेति दश
मूलमिहोच्यते। दशमूलानि कुर्वीत भागैः पंचपलैः पृथक्। पंचविंशत्पलं कुर्याच्चित्रकं पौष्करं तथा। कुर्या
द्विंशत्पलं लोध्रं गुडूची तत्समा भवेत्। पलैः षोडशभिर्धात्री रविसंख्यैर्दुरालभा। खदिरो बीजसारश्च पथ्या
चेति पृथक्पलैः ॥ अष्टभिर्गुणितं कुष्ठं मंजिष्ठा देवदारु च। विडंगमधुकं भार्गी कपित्थं त्वक्पुनर्नवा चव्यं मांसी
प्रियंगुश्च सारिवा कृष्णजीरकं ॥ त्रिवृत्ता रेणुका रास्ना पिप्पली क्रमुकः शटी। हरिद्रा शतपुष्पा च पद्मकं
नागकेशरं। मुस्तमिंद्रयवं शृंगी जीवकर्षभकौ तथा। मेदा चान्या महामेदा काकोल्यौ क्रमऋद्धिवृद्धिके। कुर्यात्पृथ
क्द्विपलिकानेतदष्टगुणे जले। चतुर्थांशं शृतं नीत्वा भांडे सन्निधापयेत्। ततः षष्टिपलां द्राक्षां पचेन्नीरे
चतुर्गुणे। त्रिपादशेषं शीतं च पूर्वक्वाथे शृतं क्षिपेत्। द्वात्रिंशत्पलिकं क्षौद्रं गुडस्य च तुलाशतं ॥ त्रिंशत्

श्रीराम॰
शा॰ ध॰ ५४

लानि घातक्याः कंकोलं जलचंदनं ॥ जातीफलं लवंगं च त्वगेलापत्रकेशरं ॥ पिप्पलीचेति संचूर्ण्य भागैर्द्विपलि
कैः पृथक् ॥ शाणमात्रं च कस्तूरीं सर्वमेकत्र निक्षिपेत् ॥ भूमौ निखातये भांडे ततो जातरसं पिबेत् ॥ कतक
स्य फलं क्षिप्त्वा रसं निर्मलतां नयेत् ॥ ग्रहणीमरुचिं शूलं श्वासं कासं भगंदरं ॥ वातव्याधिं क्षयं पांडुं त्वो गच
कामलां ॥ कुष्ठान्यर्शांसि मेहांश्च मंदाग्निमुदराणि च ॥ शर्कराश्मरिमूत्रकृच्छ्रं धातुक्षयं जयेत् ॥ कृशानां
पुष्टिजननो वंध्यानां पुत्रदः परः ॥ अरिष्टो द्राक्षामूलाख्यस्तेजः शुक्रबलप्रदः ॥ द्राक्षामूलारिष्टः ॥ इति श्रीशार्ङ्गध
रे आसवारिष्टकल्पनाध्यायः ॥ अथ धातुशोधनं ॥ स्वर्णं तारं ताम्ररीतिं नागं वंगं च तीक्ष्णकं ॥ धातवः स
प्त विज्ञेयास्ततस्तान् शोधयेद्बुधः ॥ स्वर्णतारारताम्राणां पत्राण्यग्नौ प्रतापयेत् ॥ निषिंचेत्तप्ततप्तानि तैले
तैले तक्रे च कांजिके ॥ गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा ॥ एवं स्वर्णादिलोहानां विशुद्धिः संप्रजायते ॥
नागवंगौ प्रतप्तौ च गलितौ तौ निषेचयेत् ॥ त्रिधा त्रिधा विशुद्धिः स्याद्रविदुग्धेन च त्रिधा ॥ अथ धातुवेधस्व
र्णमारणं ॥ स्वर्णाच्चद्विगुणं सूतमम्लेन सह मर्दयेत् ॥ तद्गोलकसमं गंधं विदध्यादधरोत्तरं ॥ गोलकं च त
तो रुध्वा सरावदृढसंपुटे ॥ त्रिंशद्वनोपलैर्दद्यात्पुटान्येवं चतुर्दश ॥ निरुत्थं जायते भस्म गंधो देयः पुनः पुनः
अथापरो विधिः ॥ कांचने गालिते नागं षोडशांशेन निक्षिपेत् ॥ चूर्णयित्वा तथाम्लेन घृष्ट्वा कृत्वा च गो
लकं ॥ गोलकेन समं गंधं दत्वा चैवाधरोत्तरं ॥ सरावसंपुटे धृत्वा पुटे त्रिंशद्वनोपलैः ॥ एवं सप्तपुटैर्हेम नि

निर्मली

तेल
तक्र
कांजी
गोमत्र
कुलत्था

लाल
महार्क दुग्धः
५
मुद्दिनास्वर्णमृतिः

फं ३१३ निं ३५ फं ४
सोनागलाईवर
फं ३१

घरियार

कोकिलैरिति छ्छ गोमयसंज्ञैरंगारैरित्यर्थः ३

काज रु १
घरियासंपुट २

घिउ वं ध २

रूप्यं भस्म जायते॥ अन्यच्च॥ कांचनारस्य रसेन घृष्ट्वा समसूतकगंधयोः॥ वज्रलीं हेमपत्राणि लेपयेत्सम्यगात्मया॥
कांचनारत्वचः कल्कं मूषायुग्मं प्रकल्पयेत्॥ धृत्वा तत्संपुटे गोलं मल्लरामूषां संपुटे च तत्॥ निधाय संधिरोधं च कृत्वा
संशोष्य कोकिलैः॥ गर्ति खरतरं कुर्यात् एवं दद्यात् पुटत्रयं॥ निरुत्थं जायते भस्म सर्वकार्येषु योजयेत्॥ कांचना
रप्रकारेण लांगली हन्ति कांचनं॥ ज्वालामुखी तथा हन्यात् तथा हन्ति मनःशिला॥ शिलासिंदूरयोश्चूर्णं सम
योरर्कदुग्धके॥ सप्तैव भावना दद्यात् शोषयेच्च पुनः पुनः॥ ततस्तु गलिते हेम्नि कल्कोयं दीयते समः॥ पुनर्धमेद
तितरां यथा कल्को विलीयते॥ एवं वेलात्रयं दद्यात् कल्कं हेम मृतिं भवेत्॥ तथा चान्यप्रकारः॥ पारावतमलै
र्लिंपेद्रपवा कुक्कुटोद्भवैः॥ हेमपत्राणि तेषां च प्रदद्यात् तदनंतरं॥ गंधचूर्णं समं कृत्वा सरावयुग
संपुटे॥ प्रदद्यात् कुक्कुटपुटे पंचभिर्गोमयोपलैः॥ एवं नवपुटं दद्यात् श्रामं च महापुटं॥ त्रिंशद्वनोपलैर्द्वि
यं जायते हेमभस्म तां॥ अथ तारमारणं॥ भोगेकं तालकं मर्द्यं पामे अम्लेन के न चित्॥ तेन भागत्रये
तारपत्राणि परिलेपयेत्॥ धृत्वा मूषापुटे रुध्वा पुटे त्रिंशद्वनोपलैः॥ समुध्धृत्य पुनस्तालं दत्वा
रुध्वा पुटे पचेत्॥ एवं चतुर्दशपुटैस्तारं भस्म प्रजायते॥ स्नुहीक्षीरेण संपिष्टं माक्षिकं तेन लेपयेत्॥
तालकस्य प्रकारेण तारपत्राणि बुद्धिमान्॥ पुटेच्च चतुर्दशपुटैस्तारं भस्म प्रजायते॥ अथ ताम्रमार
णं॥ सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः॥ वासरत्रयमम्लेन ततः खल्वे विनिःक्षिपेत्॥

जयंती ५

लांगलि
जडि ४

फु[illegible] मल

पुरुषमल

हरताल ५

पारिना १ [illegible] पुनर ३ शोनामाखि रु ३

श्रीराम०
शा० ध० ५५

निं७३क्री

मध्यखंडे चांगेरी अम्लपत्रिकार

६

पादांशं सूतकं दत्वा यामेमम्लेन मर्दयेत्० ततउद्धृत्य पत्राणि लेपयेद्द्विगुणेन च० गंधकेनाम्लघृष्टेन तस्य कु
र्याच्च गोलकं० ततः पिष्ट्वा च मीनाक्षीं चांगेरीं च पुनर्न्नवा० तत्कल्केन वहिर्गोलं लेपयेदंगुलोन्मितं० धृत्वा तं गोल
कं भांडे सरावेण च रोधयेत्० वालुकाभिः प्रपूर्याथ विभूतिलवणांबुभिः० दत्वा भांडमुखे मुद्रां ततश्चुल्यां वि
पाचयेत्० क्रमवृद्ध्याग्निना सम्यक् यावद्यामचतुष्टयं० स्वांगशीतं समुद्धृत्य मर्दयेत्सूरणद्रवैः॥ दिनैकं गोल
कं कुर्याद्दद्याद्गंधेन लेपयेत्० सद्यस्तेन ततो मूषापुटे गजपुटे पचेत्० स्वांगशीतं समुद्धृत्य मृतं ताम्रं शुभं भ
वेत्० वांतिभ्रांतिक्लमैमेरेवं न करोति कदाचन॥ अथारमारणं० अर्कक्षीरेण संपिष्टो गंधकस्तेन लेपयेत्०
समेनारस्य पत्राणि शुद्धान्यम्लद्रवैर्मुहुः॥ ततो मूषापुटे धृत्वा पचेद्गजपुटेन च० एवं पुटद्वयेनैवं भस्मा
रं भवति ध्रुवं० आरवत्कांस्यमप्येवं भस्मतां याति निश्चितं० अर्कक्षीरवटाजं स्नुक्षीरं निर्गुंडिकातपा० ताम्र
शीतिध्वनिवधं समं गंधकयोगतः॥ अथ नागमारणं० तांबूलीरससंपिष्टशिलालेपात्पुनःपुनः॥ द्वात्रिंशद्भिः
पुटैर्नागो निरुत्थो याति भस्मतां० अश्वत्थचिंचात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत्० मृत्पात्रे द्राविते नागे लोहदर्व्या
प्रचालयेत्० यामैकेनैव भवेन्मृतं तुल्या च मनःशिला० कांजिकेन द्वयं पिष्ट्वा पचेद्गजपुटेन च० स्वांगशीतं पुन
र्न्नित्वा शिलया कांजिकेन च० पुनः पचेत्सरावाभ्यामेवं षष्टिपुटैर्मृतिः॥ अथ वंगमारणं० मृत्पात्रे द्राविते वं
गे चिंचाश्वत्थत्वचो रजः॥ क्षिप्त्वा क्षिप्त्वा चतुर्थांशमयोदर्व्या प्रचालयेत्० ततो द्वियाममात्रेण एवं भस्म प्रजाय
ते० अथ भस्मसमं तालं क्षिप्त्वाम्लेन प्रमर्दयेत्० ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत्० तालेन दशमांशेन

जस्ता८
निं७३क्री

अजाक्षीरेण गंध
कल्केकार्यं
निर्गुंडि

पिपर छाल मिलि छाल ५

एवं दशपुटैः पक्वो वंगस्तु म्रियते ध्रुवं० अथ लोहमारणं० शुद्धं लोहभवं चूर्णं पातालगरुडीरसैः १

८१ शिवलिंगिया २

याममेकं ततः पुटेत्० मर्दयित्वा पुटे दद्यात् घोरवंडपटत्रयं० पुनस्त्रयं कुमार्यास्तु कुठारच्छिन्निकारसैः॥ पुटत्रयं कृत
तो दद्यादेवं तीक्ष्णस्य मृतिर्भवेत्० अन्यच्च० क्षिपेद्वा दशमांशेन दरदं तीक्ष्णचूर्णतः॥ पातालगरुडीरसैः॥ स्त
न्येन चार्कदुग्धेन तीक्ष्णस्यैवं मृतिर्भवेत्० सूतकाद्द्विगुणं गंधं दत्वा कुर्याच्च कज्जलीं० द्वयोः समं लोहचूर्णं मर्द
येत्कन्यकाद्रवैः॥ यामयुग्मं ततः पिंडं कृत्वा ताम्रस्य पात्रके० घर्मे धृत्वोरुबूकस्य पत्रैराच्छादयेद्बुधः॥ यामार्द्धे
नोष्णता भूयाद्धान्यराशौ न्यसेत्ततः॥ दत्वोपरि शरावं च त्रिदिनांते समुद्धरेत्० पिष्ट्वा च गालयेद्वस्त्राद्देवं
वारितरं भवेत्० एवं सर्वाणि लोहानि स्वर्णादीन्यपि मारयेत्॥ शिलागंधार्कदुग्धाक्ताः स्वर्णाद्याः सर्वधात
वः॥ म्रियंते द्वादशपुटैः सत्यं गुरुवचो यथा० स्वयमग्निरसः॥ अथोपधातुशोधनमारणं० माक्षिकं तु
त्थकाभ्रौ च नीलांजनशिलालकाः॥ रसकश्चेति विज्ञेया एते सप्तोपधातवः॥ अथ स्वर्णमाक्षिकशोधनं०
माक्षिकस्य त्रयो भागा भागैकं सैंधवस्य च० मातुलुंगद्रवैर्वापि जंबीरोत्थद्रवैः पचेत्० चालयेल्लोहपात्रे ए
यावत्पात्रं सुलोहितं० भवेत्ततस्तु संशुद्धिं स्वर्णमाक्षिकमृच्छति० अन्यच्च० कुलत्थस्य कषायेण घृष्ट्वा तै
लेन वा पुटेत्० तक्रेण वाजमूत्रेण म्रियते स्वर्णमाक्षिकं० अथ तारमाक्षिकशोधनं० किंकोलमेषशृंग्युत्थैर्द्र
वैर्जंबीरजैर्दिनं० भावयेदातपे तीव्रे विमलो शुध्यति ध्रुवं० अथ तुत्थकशोधनं० विष्ठया मर्दयेत्तुत्थं मार्जारक
कपोतयोः॥ दशांशं टंकणं दत्वा पचेल्लघुपुटे ततः॥ पुटं दध्ना पुटं क्षौद्रैर्देयं तुत्थविशुद्धये० अथाभ्रकशोध

आलंहरतालेद्ध

रसे: २

धामर्ग
नाम्र

बिजौरे १५
जंबिर १५

सोहागा
स्वनागलै १

शेषआदिकर

श्री राम०
शा०धा०५६

नमारणं० कृष्णाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिक्षिपेत्० भिन्नपत्रं तु तत्कृत्वा तंदुलीयाम्लयोर्द्रवैः ॥ भावयेदष्ट
यामं तु एवं शुध्यति चाभ्रकं ॥ अथ धान्याभ्रकस्य भागो द्वौ मुस्तात्रैवं जलैः सह ॥ त्रिदिनं स्थापयेत्पात्रे ततः स्वल्पं
प्रपेषयेत् ॥ बध्वा धान्ययुतं वस्त्रे मर्दितं कांजिकैः सह० आहायतन्मृतं शुद्धं शुद्धं धान्याभ्रकं भवेत्० कृत्वा धा
न्याभ्रकं तत्तु शोषयित्वा तु मर्दयेत्० अर्कक्षीरे दिनं मर्द्यं चक्राकारं चकारयेत्० वेष्टयेदर्कपत्रैश्च सम्य
ग्गजपुटे पचेत्० पुनर्मर्द्यं पुनः पाच्यं सप्तवारं प्रयत्नतः ॥ ततो वटजटाक्वाथे स्तद्वद्देयं पुटत्रयं० मृतं तेना
त्र संदेहः सर्वरोगेषु योजयेत्० तुल्यं घृतं मृताभ्रेण लोहपात्रे विपाचयेत्० घृते जीर्णे तदुद्धृत्य तु सर्वरो
गेषु योजयेत्० मृतं त्वभ्रं हरेन्मृत्युं जरापलितनाशनं० अनुपानैश्च संयुक्तं तत्तद्रोगहरं स्मृतं० अ
थान्यप्रकारः ॥ शुद्धधान्याभ्रकं मुस्तं शुंठी घट्टागयोजितं० मर्दयेत्कांजिकेनैवं दिनं चित्रकजैः रसैः ॥ त
तो गजपुटं दद्यात्तस्मादुद्धृत्य मर्दयेत्० त्रिफलावारिणा तद्वत्पुटेदेवं पुटैस्त्रिभिः ॥ वालागो मूत्र मुशली
तुलसी सूरणद्रवैः ॥ मर्दितं पुटितं वह्नौ त्रिस्त्रिरेव व्रजेन्मृतिं० अथ नीलांजनशोधनं० नीलांजनं चू
र्णयित्वा जंबीरद्रवभावितं० दिनैकमातपे शुद्धं तत्कार्येषु योजयेत० एवं गैरिक कासीस टंकणानि व
राटिका० शंखतौरी च कंकुष्ठं शुद्धिमायांति निश्चितं० अथ मनःशिलाशोधनं ॥ पचेत्त्र्यहमजामूत्रे दो
लायंत्रे मनःशिलां० भावयेत्सप्तधा पित्तैरजायाः शुद्धिमृच्छति० अथ तालशुद्धिः ॥ तालकं कणशः कृ
त्वा तच्चूर्णं कांजिके क्षिपेत्० दोलायंत्रेण यामैकं ततः कूष्मांडजैर्द्रवैः ॥ तिलतैले पचेद्यामं यामं चत्रि

फिटकरी ३ चोके

गेरु १ कोसिस २ सोहागा ३ कौडि ४ सं ५

पिशाचकं तिलकल्कसंभवं ३ मेषरोमाणि ३ यवतिक्तासर्पाक्षी ३

खरगोमूत्रैः १

फलाजलैः॥ दोलायंत्रे ~~शुद्धिः स्यात्~~ चतुर्यामं पाच्यं शुद्धतितालकं॰ अथ रसकशुद्धिः॥ नरमूत्रैर्मस्ता
तं रसकं पचेत्॰ दोलायंत्रेण शुद्धिः स्यात्ततः कार्येषु योजयेत्॰ अथ सत्वनिर्गमः॥ लाक्षामीनापयः छागटं
कणोमगशं गकं॰ पिशाचाकं सर्षपं शिगुगुंजोर्णा गुडसैंधवैः॥ यवतिक्ताद्य तन्त्वोद्वं यथालाभं विचूर्णये
त्॰ एभिर्विमिश्रिताः सर्वे धातवो गाढवह्निना॰ मूखाध्माता प्रजायंते मुक्तसत्वा न संशयः॥ अथ रत्न
मारणशोधनं॰ तेषु वज्रमारणमाह॰ कुलत्थक्वाथ कोद्रवक्वाथे दोलायंत्रे विपाचयेत्॰ व्याघ्रीकंदगतं वज्रं त्रि
दिनं शुद्धिमृच्छति॰ ततस्तत्प्रतप्तं तु तद्वज्रं खरमूत्रे त्रि सेचयेत्॰ पुनस्तापपुनः सेक्यमेवं कुर्यात्त्रिसप्तधा॰
मत्कुणैस्तालकं पिष्ट्वा यावद्भवति गोलकं॰ तद्गोलेनिहितं वज्रं तद्गोलं बाधिकं धमेत्॰ सेचयेदश्वमूत्रे
ण तद्गोलं चाग्निप्तेपुनः॥ रुद्धाध्मानं पुनः सेक्यमेवं कुर्यात्त्रिसप्तधा॰ एवं च म्रियते वज्रं चूर्णं सर्वत्र यो
जयेत्॰ अन्यदपि॰ हिंगुसैंधवसंयुक्ते क्षिपेत्क्वाथे कुलत्थजे॰ तप्तं तप्तं पुनर्वज्रं भवेद्भस्म त्रिसप्तधा॰
अन्यच्च॰ मंडूकं कांस्यजे पात्रे निगृह्य स्थापयेत्सुधीः॥ सभीतो मूत्रयेत्तत्र तन्मूत्रे वज्रमावपेत्॰ तप्तं तप्तं च
वहुधा वज्रस्यैवं मृतिर्भवेत्॰ वैक्रांत मारणं॰ वैक्रांतं वज्रवद्बोध्यं नीलं वा लोहितं तथा॰ हयमूत्रेण तत्सेच्यं
तप्तं तप्तं त्रिसप्तधा॰ ततश्च मेषशृंगधान्यस्तु पंचांगे गोलके क्षिपेत्॰ पुटेन्मूषा पुटे रुद्धा कुर्यादेवं च सप्त
धा॰ वैक्रांतं भस्मतां याति वज्रस्थाने नियोजयेत्॰ अथ परोपरत्नशोधनमारणं॰ स्वेदयेद्दोलिकायंत्रे जयंत्या
स्वरसेन वा॰ मणिमुक्ताप्रवालानां यामैकं शोधनं भवेत्॰ कुमार्या तंदुलीयेन स्तन्येन च निषेचनात्॰ प्र

म

खट कि.र वालोके

मेघा ५

पानचूरा ५

मै १

सोधा गर

शतोत्पुटानमं किट्टं मण्डूरं चाशीतिवार्षिकं० अथ धमं षष्ठिवार्षीयं ततो हीनं विषोपमं १०

५५धा

त्येवं समबलं च तत्तत्स्थानि निःक्षिप्तश्च ॥ मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः ॥ द्रावणादिविधानेन
निष्क्रियन्ते नात्र संशयः ॥ उक्तं माक्षिकवन्मुक्ताप्रवालादीनि मारयेत्० वज्रवत्सर्वरत्नानि शोधयेन्मार
येत्तथा० अथ शिलाजतुशोधनं० शिलाजतु समानीय पञ्चीभूतं शिलाच्युतं ॥ गोदुग्धैस्त्रिफलाक्वा
थैर्भृंगद्रावैश्च मर्दयेत्० आतपे दिनमेकैकं शुद्धं तद्व्रजेत्० अथान्यः शिलाजतुप्रकारः ॥ गुरुत्वाच्छिला
जतु शिलां सूक्ष्मखण्डं प्रकल्पयेत्० निक्षिप्यात्युष्णपानीये यामैकं स्थापयेत्सुधीः ॥ मर्दयित्वा ततो नीरं गृही
याद्वस्त्रगालितं० स्थापयित्वा मृत्पात्रे धारयेदातपे खरे० उपरिस्पन्दनं यत्स्यात्तन्निक्षिपेदन्यपात्रके०
धारयेदातपे तस्मादुपरिस्पन्दनं नयेत्० एवं च नः पुनर्नीत्वा क्षिपेन्मासाभ्यां शिलाजतु० भवेल्लाक्षासमं
वह्नौ क्षिप्तं लिंगोपमं भवेत्० निर्धूमं च ततः शुद्धं सर्वकर्मसु योजयेत्० अधःस्थितं च यद्धंसं तस्मिन्नी
रं विनिक्षिपेत्० विमर्द्य धारयेद्धर्मे पूर्ववच्चैव तन्नयेत्० अथ मंडूरमारणं० अक्षांगारैर्धमेत्
किट्टं लोहजं तद्गवां जलैः ॥ आलोड्य मधुना पश्चादग्नौ मंडूरं जायते वरं० अथ क्षारकल्पना० क्षारवृ
क्षस्य काष्ठानि शुष्काण्यग्नौ प्रदीपयेत्० नीत्वा तद्भस्म मृत्पात्रे क्षिप्त्वा नीरे चतुर्गुणे० विमर्द्य धारये
द्रात्रौ प्रातरच्छजलं नयेत्० तन्नीरं क्वाथयेद्वह्नौ यावत्सर्वं विशुष्यति० ततः पात्रात्समुल्लिख्य क्षारो ग्रा
ह्यः सितप्रभः ॥ इति साधिः स्यात्प्रयः स्याद्गाप्यवस्थितः ॥ इति क्षारद्वयं धीमान्युक्तकार्येषु योजयेत्०
इति धातुशोधनमारणकल्पनाध्यायः ॥ पारदः सर्वरोगाणां जेता पुष्टिकरः स्मृतः ॥ शुद्धेन साधितः

मुख्या पूर्वं हर्षिता स तज्जाति शुभ्रे षड् शिलाजतुः ४

अन्यो विभीतकैः

ताम्रमादित्यस्य॰ तारं तु चंद्रस्य॰ आरं पित्तलं मंगलसंज्ञं॰ नागं सीसकं बुधसंज्ञं॰ हेमं सुवर्णं बृहस्पतेः। वंगं शुक्रसंज्ञं॰ तीक्ष्णं लोहं शनेः॰ कांस्यं राहोः॰ वृत्तलोहं केतोः संज्ञं २

कुर्यात्सर्वसिद्धिं देहलोहयोः। रसेंद्रः पारदः सूतो हरजः सूतकोरसः॥ बुधैस्तस्येति नामानि ज्ञेयानि र
सकर्मसु॰ ताम्रतारारनागाश्च हेम वंगौ च तीक्ष्णकं॰ कांस्यकं वृत्तलोहं च धातवो नव संस्मृताः॥ तैर्धातुभि
र्नो ग्रहाणां वै कथिता नामभिः क्रमात्॰ अथ रसशोधनं॰ राजी रसोनमूषायां रसं क्षिप्त्वा विबंधयेत्। व
स्त्रेण दोलिकायंत्रे शोधयेत्कांजिके त्र्यहं॰ दिनैकं मर्दयेत्सूतं कुमारीसंभवैः द्रवैः॥ तथा चित्रकजैः
क्वाथैर्मर्दयेदेकवासरं॰ काकमाचीरसैस्तद्वद्दिनमेकं च मर्दयेत्॰ त्रिफलायास्तथा क्वाथैः रसो मर्द्यः
प्रयत्नतः॥ ततस्तेभ्यः पृथक्कुर्यात्सूतं प्रक्षाल्य कांजिकैः॥ ततः क्षिप्त्वा रसं खल्वे रसार्धं च सैंध
वं॥ मर्दयेन्निंबुकरसैर्दिनमेकमनंतरं॰ ततो राजीरसोनश्च मुख्यश्च नवसादरः॥ एतै रससमै
स्तद्वल्लोमघृष्टस्तथाम्लना॰ ततः संशोध्य चक्राभं कृत्वा लिप्त्वा च हिंगुभिः॥ विस्पालीसंपुटे धृत्वा
पूरयेल्लवणेन च॰ अथ स्थालीं ततो मुद्रां दद्याद्दृढतरां बुधः॥ विशोष्य वह्निं विधायाधो निषिंचे
दम्बुनोपरि॰ ततस्तु कुर्यात्तीव्राग्निं तदधः प्रहरत्रयं॰ एवं निपातयेत्सूतं रसो दोषविवर्जितः॥ अ
धोर्ध्वपिठरीमध्ये लग्नो ग्राह्यो रसोत्तमः॥ अथ गंधकशोधनं॰ लोहपात्रे विनिक्षिप्य घृतं त
दग्नौ प्रतापयेत्॰ तप्ते घृते तत्समानं क्षिपेद्गंधकजं रजः॥ विद्रुतं गंधकं ज्ञात्वा दुग्धमध्ये विनिक्षिपेत्॰

मक्रोय ५

रा ३

नागन ३

नागन ५

नवसादर २६

पात्रे ५

श्रीराम०
शा० ध० ५८

सप्तनि थं ४

मेदि १

जंबीरमातुलुंगाघैरम्लवर्गगणोमतः १

सिगिरिफ १

एवं गंधकशुद्धिः स्यात्सर्वकार्य्येषु योजयेत्० अथ हरतालशोधनं० मेषीक्षीरेण हरतालं अम्लवर्गे एवं भावितं०
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितं० अथ हरतालसत्वशुद्धिः॥ निंबूरसे निम्बपत्ररसे वा यामं मात्रकं०
पिष्टा हरतालं मूर्द्धं च पातयेत्सत्त्वमुद्धितः॥ ततः शुद्धिरसं तत्समान्नीलाकार्य्येषु योजयेत्० अथ शुद्ध रससत्त्व
करणम्० कालकूटो वत्सनाभः शृंगकश्च प्रदीपनः॥ हालाहलो ब्रह्मपुत्रो हारिद्रः सक्तुकस्तथा० सौराष्ट्रिक इ
ति प्रोक्ता विषभेदा अमी नव० अर्कसेहुंडधत्तूरलांगली करवीरकाः० गुंजाहिफेनमित्येताः सप्तोपविषजा
तयः॥ एतैर्विमर्द्दितः सूतः छिन्नपक्षः प्रजायते० मुखं तु जायते तस्य धातूंश्च ग्रसते त्वरा० अन्यदपि० अथ
वा त्रिकटुकक्षारे राजी लवणपंचकं० रसोनो नवसारश्च शिग्रुश्चैकत्र चूर्णितैः॥ समांशैः पारदादेतैः
जंबीरेण द्रवेण वा० निंबूतोयैः कांजिकेर्वा शास्तखल्वे विमर्द्दयेत्० अहोरात्रत्रयेणस्यात् शोधा
तु चरं मुखं० अन्यच्च० अथवा विंडलीकीटैः रसो मर्दितत्रिवासरं० लवणाम्लेश्च मुखं तस्य जायते धा
तु घस्मरं० अथ गंधकजारणं० अथ पक्व पत्रेण गंधमारणमुच्यते० मातुलुंगे निर्निक्षिप्तेन्नी
रं तन्मध्ये च सरावकं० मातुलुंगपिधानाभं मध्ये मेखलया युतं० निहिता च मेखला मध्ये चूर्णं तत्र रसं क्षि
पेत्० रसस्योपरि गंधस्य रजो दद्यात्समांशकं० दत्वोपरि सरावं च भस्ममुद्रां प्रदापयेत्० तस्योपरि पु
टं दद्यात् चतुर्भिर्गोमयोपलैः॥ एवं पुनः पुनर्गंधं षड्गुणं जारयेद्बुधः। गंधे जीर्णे भवेत्सूतं तीक्ष्णाग्निः स

गिरवी ५

गृहधूम१ फिटिकरी१

वेक्रमेण कृतः॥ अथ रससमारणं॥ धूमसारं रसं तोरीं गंधकं नवसादरं॥ यामैकं मर्द्दयेद्‌म्लेर्भागं कृत्वा समं
समं॥ काचकूप्यां विनिक्षिप्य तां च मृद्वस्त्रमुद्रया॥ विलिप्य परितो वक्त्रे मुद्रां दत्वा च शोषयेत्॥ अथः सछिद्र
पिठरीमध्ये कूपीं निवेशयेत्॥ पिठरीं वालुकापूरैर्भृत्वा वा कूपिकागलं॥ निवेश्य चुल्ल्यां तदधः कुर्याद्वह्निं
शनैः शनैः॥ तस्माद्धप्यधिकं चित्वा वह्निं ज्वालयेत्क्रमात्॥ एवं द्वादशभिर्य्यामैर्म्रियते सूतकोत्तमः॥ स्फोट
येत्स्वांगशीतं तामूर्ध्वगं गंधकं त्यजेत्॥ अथ स्वयं म्रियते सूतं सर्वकर्मसु योजयेत्॥ तत्पान्यः॥ अथ पामा
गस्य बीजानां मूषायुग्मं प्रकल्पयेत्॥ तत्संपुटे न्यसेत्सूतं मलपङ्कधमिश्रितं॥ शरावसंपुट्यो प्रसू
ना निविडं गभिरिभिस्तकं॥ एतच्चूर्ण्य मधश्चोर्ध्वं दत्वा मुद्रां प्रदीयते॥ तं गोलं संधयेत्सम्यक् मूषा
संपुटे सुधीः॥ मुद्रां दत्वा शोषयित्वा ततो गजपुटे पचेत्॥ एवमेकपुटेनैव जायते भस्म सूतकं॥ रसे
न गंधं त्रिगुणं विजूलघ्रनर्नेवाबन्हिरसेर्विमर्द्य॥ पक्वार्कपत्रोत्थरसेन पत्राद्विपाचयेत्षट्गुणा
मयश्चात् रसाद्भागेन विपंच दत्वाद्विपाचयेद्वह्निजलेद्रागुणं च॥ शीतारिसंज्ञो लिरसोपमस्य वल्लं
तदर्द्धयाद्विवाक्रमेण॥ मरीचके वा पिघुनेनयुक्तः सेवेत मासं सयतं च पथ्यं॥ शीतारिरसः॥ अन्य
दपि॥ काष्ठोडुंबरिकादुग्धे रसं किंचिद्विमर्द्दयेत्॥ तद्दुग्धबहुलिंगोश्च मूषायुग्मं प्रकल्पयेत्॥
धत्वा तत्संपुटे सूतं तत्र मुद्रां प्रदापयेत्॥ धत्वा तं गोलकं माज्ञो मरामूषासंपुटे धिके॥ पचेन्नरु

श्रीराम०
शा० ध० ५९

हरिणस्य देहहारिणं २

हुसं २

पुटेनैव सूतको याति भस्मतां० अन्यच्च० नागवल्लीरसैर्घृष्टः कर्कोटीकंदगर्भितः० मृत्
संपुटे पक्वः सूतो यात्येव भस्मतां० अथ ज्वरांकुशो रसः॥ खंडितं हारिणं शृंगं ज्वालामुख्या रसैः स
ममं० रुध्वा भांडे पचेच्चुल्ल्यां यामयुग्मं ततो नयेत्० अष्टांशं त्रिकटुं दद्यान्निष्कमात्रं च भक्षयेत्० नागव
ल्या रसैः सार्द्धं वातपित्तज्वरापहं० अयं ज्वरांकुशो नाम रसः सर्वज्वरापहः॥ अथ ज्वरारिरसः॥ पा
रदं रसकं तालं तुल्यं गंधकटंकणं० सर्वमेतत्समं शुद्धं कारवेल्या रसैर्दिनं० मर्दयेल्लेपयेत्तेन ताम्र
पात्रोदरं भिषक्० अंगुलार्द्धप्रमाणेन ततो रुध्वा च तन्मुखं० पचेत्तं वालुकायंत्रे न्यस्ता धान्यानि त
त्र खे० यदा स्फुटंति धान्यानि तदा सिद्धं विनिर्दिशेत्० ततो नयेत्स्वांगशीतं ताम्रपात्रोदराद्भि
षक्० रसं ज्वरारिनामायं विचूर्ण्य मरिचैः समम्० माषैकं पर्णखंडेन भक्षयेद्धन्ति नाशयेज्ज्वरं०
त्रिदिनैर्विषमं तीव्रमेकद्वित्रिचतुर्थकं० अथ शीतज्वरारिरसः॥ तालकं तुल्यकं ताम्रं रसं गंधं
मनःशिला० कर्षकर्षप्रमाणं तु व्योम मर्दयेत्त्रिफलांबुभिः॥ गोलं न्यसेत्संपुटके पुटं दद्यात्त्रयं ततः
ततो नीत्वा अर्कदुग्धेन वज्रीदुग्धेन सप्तधा० धत्तूरस्य दलानां स्वरसेनापि भावयेत्सप्तधा पुनः॥ माषमा
त्रं रसो ह्ययं पंचाशन्मरिचैर्युतं० गुडं गद्याणकं चैव तुलसीदलयुग्मकं० भक्षयेत्त्रिदिनं भक्त्या
शीतारिः दुर्लभं परं० पथ्यं दुग्धोदनं देयं विषमे शीतपूर्वके० दाहपूर्वे [illegible] हरसाद्गुत्ततो यंच

खपरियाप

जइतार

कहैला रसैमर्द ५

५।न६

55

से ५५३

पिपरावज्रदंती

तुर्यकौ॰ घ्यातिकं सततं चैवव्वैवरं पिचनियच्छति॰ अथ ज्वरघ्नीगुटिका॰ भागैकं स्याद्रसात्कृष्णा देलीयः पिप्पली शि
वा॰ अकारकरभोगंधः कटुतैलेन शोधितः॥ फलानि चेंद्रवारुण्याः स्वतुल्यांशमिता अमी॰ एकत्र मर्दयेच्चूर्णैर्मिंद्र
वारुणिकारसैः॥ माषोन्मितां वटीं कुर्य्याद्दद्यात्सद्योज्वरे बुधः॥ छिन्नारसानुपानेन ज्वरघ्नीगुटिकाम
ताः॥ अथ लोकनाथरसः॥ शुद्धो बुभुक्षितः सूतो भागद्वयमितो बुधः॥ तत्पादं गंधस्य भागौ द्वौ कुर्यात्कज्ज
लिकां द्वयोः॥ सूताच्चतुर्गुणे खेवके पर्दे विनिक्षिपेत्॰ भागैकं टंकणं दत्वा गोक्षीरेण विमर्दयेत्॰ तथा शं
खस्य खंडानां भागानष्टौ प्रकल्पयेत्॰ क्षिपेत्सर्वं मूषायां तं चूर्णैर्लिप्त सरावयोः॥ गर्भे हस्तोन्मिते हृ
त्वा पाच्यं गजपुटेन तु॰ स्वांगशीतं समुद्धृत्य पिष्ट्वा तत्सर्वमेकतः॥ गुंजासमितं चूर्णमेकोनत्रिंशदूषणैः॥ घृ
तेन वातजे दद्यान्नवनीतेन पित्तजे॰ क्षौद्रेण श्लेष्मजे दद्यादतीसारे क्षये तथा॰ अरुचौ ग्रहणीरोगे कार्श्य
मंदानले तथा॰ कासे श्वासे च गुल्मे च लोकनाथरसं भिषक्॰ तस्योपरि घृतान्नं च गुंजा कवलत्रयं॰ मंचे
न्नैके कृतानां शयीतानुपधानके॰ अनम्लमन्नं सघृतं भुंजीत मधुरं दधि॰ प्रायेण जांगलं मांसं प्रदे
यं घृतपाचितं॰ सद्य धम ? दद्याद्भोज्यं नेतो सांध्यभोजने॰ सघृतान्मुद्गवटकान्व्यंजने ष्ववचारयेत्
तिलामलककल्केन स्नापयेत्सर्पिषाप्यथ वा॰ अभ्यंजयेत्सर्पिषा च स्नानं कोष्णोदकेन च॰ कुचित्ते लंघनं गु
र्वीयान्नं बिल्वं कारवेल्लकं॰ वार्त्ताकं सरीचीं चा त्यजेद्व्यायाम मैथुने॰ मद्यं संधानकं हिंगु शुंठी माषा
न्मसूरकं॰ कूष्मांडं राजिकां कोलं कांजिकं चैव वर्जयेत्॰ त्यजेद्दुष्कृतनिद्रां च कांस्यपात्रे च भोजनं॰ कु

अम्लं मातुलुंगप्र भृतिकं ५

रुकारादिशाकफलादिकंत्यजेत् १

कांरादियुतं सर्वं त्यक्त्वा कफलादिकं॰ ग्राह्यो यंलोकनाथस्तु भ्रमन हात्र वासरे॰ हरिणी तिम्योघ्नुल्कफेस्व जाते चंद्रवलेतथा॰ पूजयित्वा लोकनाथं कुमारीं भोजयेत्ततः॥ शानं दत्वा धि वटिका मध्ये ग्राह्यो रसोत्तमः॥ रसाच्चजायते ताप स्ततःशर्करयायुतं॰ सतंगुडूच्या ग्रहीया दंशरोचनयायुतं॰ खर्जूरं दाडिमं द्राक्षामिक्षुखंडांश्चधारयेत्॥ अरूचौ निस्तुषं धान्यं घृतभृष्टं सशर्करं॥ दधान्नपाज्वरधान्यगडूचीक्काथमाहरेत्॰ उशीरंवा सकक्काथं दद्यात्समधुशर्करं। रक्तपित्ते कफे स्वासेकासे च स्वरसंक्षये॰ अग्निमंथजयाचूर्णं मधुना लिहयेत्॰ निद्रानाशेति सारश्च ग्रहरायां मंदपावके॰ सौवर्चलाभयाह्वस्याचूर्णमुष्णजलैः पिवेत्॰ शूले जीर्णे तथा ह्रस्या मधुयुक्ता ज्वरेहिता॰ श्रीहरे वात रक्ते छर्दाचे वमुसंकुरे॰ नाशिका श्रवे रक्ते च रसं दाडिमपुष्पजं॰ दूर्वायाः स्वरसं नस्ये प्रदद्याच्छर्करान्वितं॰ कोलमज्जाकणावर्हिपत्रभस्म सशर्करं॰ मधुना लेहयेच्छर्दिहिक्काकोपस्य शांतये॰ विधिरेषः प्रयोज्यस्तु सर्वस्मिन्पोटलीरसे॰ मृगांकेहेमगर्भेच मौक्तिकाख्ये परेषु च॰ इत्यंलोकनाथोक्तो रसः सर्वत्र योजयेत्॰ अथ मृगांकपोटलीरसः॥ भस्मीवर्तमपत्रालिते मनःसूक्ष्माणिकारयेत्॰ तुल्यानि तानि सूतेन खल्वे क्षिप्त्वा विमर्दयेत्॰ कांचनाररसे नैव ज्वालामुख्या रसेन वा॰ लांगल्या वा रसे स्नाव घा वेभ्र वर्तिपिष्टिका॰ ततो लेमन स्वतुर्थांशटंकणं तत्र नि[illegible]क्षिपेत्॰

पिष्ट्वा मौक्तिकचूर्णं च हेम द्विगुणमावहेत् । तेषु सर्वसमं गंधं निक्षिप्य चैकत्र मर्दयेत् । तेषां कृत्वा ततो
गोलं वाससोभिः परिवेष्टयेत् । पश्चान्मृदा वेष्टयित्वा शोषयित्वा च धारयेत् । सरावसंपुटे स्थाप्य तत्र मुद्रां प्रदा
पयेत् । लवणैः पूरिते भाण्डे धारयेत्तं च संपुटं । मुद्रां दत्वा शोषयित्वा वह्निभिर्गोमयैः पुटेत् । ततः शीते समा
कृष्य गंधरूपं तत्समं निक्षिपेत् । घृष्ट्वा च पूर्ववत्खल्वे पुटेद्गजपुटेन च । स्वांगशीतं ततो नीत्वा गुंजायुग्मं प्र
योजयेत् । अष्टभिर्मरिचैर्युक्तो ह्यस्मात्त्रययुतोप्यवा । विलोक्य देयाहोषादिद्यैकैकारसरक्तिका । सर्पि
षा मधुना वापि दद्याद्दोषाद्यपेक्षया । लोकनाथसमं पथ्यं कुर्यात्स्वस्थमनाः शुचिः ॥ श्लेष्माणं ग्रह
णीं कासं श्वासं संन्यमरोचकं । अग्निं च कुरुते दीसिकफवातं नियच्छति । मृगांकोयं रसो लभ्यात्लक्ष्मीशाले
वललानितं । अथ हेमगर्भपोटलीरसः । सूतात्पादप्रमाणेन हेम्नः पिष्टं प्रकल्पयेत् । तयोः स्याद्द्विगुणो
गंधो मर्दयेत्कांचनारिणा । कृत्वा गोलं क्षिपेन्मूषां संपुटे रोधयेत्ततः ॥ पचेद्भूधरयंत्रेण वासरत्रितयं बु
धः ॥ तत उद्धृत्य ततः सर्वं दद्यादर्धं च तत्समं । मर्दयेद्दार्द्रकरसैश्चित्रकस्य रसेन च । स्थूलपीतवराटीं
श्च पूरयेत्तेन युक्तितः । तत्स्याद्रोषधा कुर्यात् दशमांसेन टंकणं । टंकेणार्द्धविषं दत्वा पिष्ट्वा सेहुंडदुग्धके :
मुद्रयेत्तेन कल्केन वराटीनां मुखानि च । भांडे चूर्णप्रलिप्ते च धृत्वा मुद्रां प्रदापयेत् । गर्त्ते हस्तोन्मिते धृत्वा
पुटे गजपुटेन च । स्वांगशीतं रसं नीत्वा मर्दयेल्लोकनाथवत् । पथ्यं मृगांकवत्कुर्यात्त्रिदिनं लवणं त्यजेत् ।

मर्दितेनापि तद्द्रव्ये
नवराटिकान्पूर
येत् ४

श्रीराम०
शा० ध० ६१

रसं० १

यदा छर्द्दिर्भवेत्तस्य दद्याच्छिन्नाघृतं तदा । मधुयुक्तं तदा श्लेष्मकोपे दद्याद्गुडार्द्रकं । विरेको भर्जिता
भंगा प्रदेया दधिसंयुता ॥ जयेत्कासं क्षयं श्वासं ग्रहणीमरुचिं तथा । अग्निं च कुरुते दीप्तं कफवातं नियच्छ
ति । हेमगर्भः परो ज्ञेयो रसः पोट्टलिकाभिधः ॥ अथ द्वितीयो हेमपोट्टलीरसः ॥ रसस्य भागाश्चत्वारस्तावंतः
कनकस्य च । तयोश्च पिष्टिकां कृत्वा गंधो द्वादशभागिकः ॥ कुर्यात्कज्जलिकां तेषां मुक्ताभागाश्च षोडश ।
चतुर्विंशश्च शंखस्य भागैकं टंकणस्य च । एकत्र मर्दयेत्सर्वं पक्वनिंबुकजैः रसैः ॥ कृत्वा तेषां ततो
गोलं मूषासंपुटके न्यसेत् । ~~कृत्वा तेषां ततो गोलं~~ मुद्रां दत्वा ततो हस्तमात्रे गर्भे च गोमये ॥ पुटेग
जपुटे नैव स्वांगशीतं समुद्धरेत् । पिष्ट्वा गुंजा चतुर्मानं दद्यादाज्यसंयुतं । एकोनत्रिंशदुन्मानमरि
चैः सह दीयते । मृन्मये पात्रके वा च जले वा पिलोहजे । लोकनाथसमं पथ्यं कुर्यात्तत्र यत्नमानसः ॥ कासे
श्वासे न्क्षये वाते कफे च ग्रहणीकागदे । अतीसारे प्रयोक्तव्या पोट्टली हेमगर्भिका । अथ महाज्वरांकुशो रसः ॥
शुद्धसूतं विषं गंधं प्रत्येकं शाणसंमितं । धूर्त्तबीजं त्रिशाणं स्यात्सर्वेभ्यो द्विगुणं भवेत् । हेमाह्वा कारयेदेषां चू
र्णं सूक्ष्मं प्रयत्नतः ॥ देयं जंबीरमज्जाभिः चूर्णं गुंजाद्वयोन्मितं । आर्द्रकस्य रसे वापि ज्वरं हंति त्रिदोषजम् ।
एकाहिकं द्व्याहिकं वा त्र्याहिकं वा चतुर्थिकं । विषमं च ज्वरं हन्यात् विख्यातोयं ज्वरांकुशः ॥ अथातीसारे आनं
दभैरवो रसः ॥ हिंगुलं च वत्सनाभं च मरिचं टंकणं कणा । चूर्णयेत्सम भागेन रसो ह्यानंदभैरवः ॥ गुंजैकं वा
द्विगुंजं वा बलं ज्ञात्वा भयो जयेत् । मधुना लेहयेच्चानु कुटजस्य फलं त्वचं । चूर्णितं कर्षमात्रं तु त्रिदोषा

हिंगुलं २

कुटजस्य फलं इंद्रयवं त्वक् छाली १

स्यातिसारजित्॰ दध्यन्नं दापयेत्पथ्यं गव्याजं तक्रमेव वा॥ पिपासायां जलं शीतं विजया च हिता निशि॰ अथ लघु
सूचिकाभरणो रसः॥ विषं पलमितं सूतं शाणिकं चूर्णयेद्द्वयं॰ तच्चूर्णं संपुटे धृत्वा काचलिप्तशरावयोः॥ मुद्रां द
त्वा वसंशोष्य स्ततश्चुल्ल्यां निवेशयेत्॰ वह्निं शनैः शनैः कुर्यात्प्रहरद्वयसंख्यया॰ ततउद्धाट्य तन्मु
द्रामुपरिस्थ सरावके॰ संलग्नो यो भवेत्सूतस्तं गृह्णीयाच्छनैः शनैः॥ वायुः स्पर्शो यथा न स्यात्ततः कूप्यां नि
वेशयेत्॰ रसः सूचीमुखे लग्नं कूप्यां निर्यातिभेषजं॰ तावन्मात्रो रसो देयो मूर्छिते सन्निपातिनि॰ क्षुरेण
प्रच्छिते मूर्ध्नि तत्राङ्गुल्या च घर्षयेत्॰ रक्तभेषजसंपर्कान्मूर्छितो पि हि जीवति॰ तथैव सर्पदष्टस्तु मृताव
स्थापि जीवति॰ यदा तापो भवेत्तस्य मधुरं तत्र दीयते॰ अथ जलबुद्दजो रसः॥ भस्मसूतसमं गंधं धात्र्यार्द्
त्या मनःशिला॰ व्योषं विषपलमिता प्रत्येकं शिलया समं॰ चूर्णायेत्भावयेत्पित्ते मत्स्य मायूर संभवे॥ सप्त
धा भावयेत्कृष्णं देयं गुंजाद्वयं हितं॰ शालिपर्णीरसं वानुपं चकोलशृतोपि वा॰ जलबुद्दो रसो नाम सन्निपाते
नियच्छति॰ जलयोगश्च कर्तव्यस्तेन वीर्यं भवेद्रसे॰ अथ पंचवक्त्रो रसः॥ शुद्धं सूतं विषं गंधं मरिचं टंक
णं कणा॰ मर्दयेद्धूर्तजैर्द्रावैर्दिनमेकं च शोषयेत्॰ पंचवक्त्रो रसो नाम द्विगुंजः सन्निपातहा॰ अर्कमूल
कषायं तु सत्र्यूषमनुपाययेत्॰ भुक्तं दध्योदनं पथ्यं जलयोगं च कारयेत्॰ रसेनानेन शाम्यंति सहोद्रे
णक्षोभवाः॥ मध्वार्द्रकरसं चानु पिबेदग्निविवृद्धये॰ यथेष्टं घृतमांसाशी शक्तो भवति पावकः॥ अ

नीलकंठः॰

सेन्नतिर

श्रीराम॰
शा॰ ध॰ ६२

थ उन्मत्तरसः ॥ रसगंधकतुल्यांशं धत्तूरफलजैर्द्रवैः । मर्दयेद्दिनमेकं तु तत्तुल्यं त्रिकटु क्षिपेत्॰
उन्मत्ताख्यो रसो नाम नस्ये स्यात्सन्निपातजित्॰ अथांजनभैरवः । निस्तुषं जेपालवीजं च दश नि
ष्कं प्रकल्पयेत्॰ मरिचं पिप्पली शुंठी प्रतिनिष्कं विमिश्रयेत्॰ भाव्यो जंवीरजैर्द्रवैः सप्ताहं संशुष्य त
तः । रसोयमंजने दत्तः सन्निपातं विनाशयेत्॰ अथ नाराचः । सूतं टंकणं तुल्यं मरिचं सूततुल्य
कं॰ गंधकं पिप्पली शुंठी द्वौ द्वौ भागौ विचूर्णयेत्॰ सर्वतुल्यं क्षिपेद्दंतीवीजं निस्तुषितं भवेत्॰ गुंजै
कं रेचनं सिद्धं नाराचोयं महारसः । आध्मानं शूलविष्टंभ गुल्मावर्तं च नाशयेत्॰ अथेच्छाभेदीरसः ।
इरदं टंकणं शुंठी पिप्पली चैव कार्षिकाः । हेमाह्वा पलमात्रं स्याद्दंतीवीजं च तत्समं॰ विचूर्ण्य कृत्रसवी
पिंगो दुग्धेनैव साधयेत्॰ त्रिगुंजं रेचनं दद्यात् विष्टंभाध्मानरोगिषु॰ अथ राजमृगांको रसः । भ
स्म सूत त्रयो भागा भागैकं हेमभस्मकं॰ मृततास्रस्य भागैकं शिला गंधक तालकं॰ प्रतिभागद्वयं शुद्धमे
कीकृत्य विचूर्णयेत्॰ वराटीं पूरयेत्तेन छागीदुग्धेन टंकणं॰ पिष्ट्वा तेन मुखं रुध्वा मृद्भांडे स्थं निरो
धयेत्॰ शुष्कं गजपुटे पक्त्वा चूर्णयेत्स्वांगशीतलं॰ रसो राजमृगांकोयं चतुर्गुंजः [illegible] याप [illegible] । स
पिप्पलिभिः [illegible] रेकोनत्रिंशद्भूषणैः । सघृतं दापयेत्पथ्यं स्त्रीकोपाग्निश्रमांस्त्यजेत्॰ पंचपल
मांसाग्नि राजरोगमशांतये॰ अथ पाग्निरसः । शुद्धसूतं द्विधा गंधं कुर्यात्खल्वेन कज्जलीं॰

५

तयोः समं तीक्ष्णचूर्णं मर्दयेत्कन्यकाद्रवैः ॥ दिनयामं ततः कृत्वा गोलं ताम्रपात्रे विनिक्षिपेत्० आच्छाद्यैरंडपत्रे
ण यामार्द्धं उष्णतां भवेत्० धान्यराशौ न्यसेत्पश्चात् त्रिरात्रात्समुद्धरेत्० संपीड्य गालयेद्वस्त्रे सत्यं वारितरं भ
वेत्० त्रिकटुत्रिफलैलाभिर्जातीफललवंगकैः ॥ नवभागोन्मितैरेतैः समं पूर्वरसो भवेत्० संचूर्ण्य पालोड्येन्नहो
द्रैः भक्ष्यं निष्कद्वयं द्वयं० स्वयमग्निरसो नाम्ना क्षयकासनिकृन्तनः ॥ अथामृतार्णवो नाम रसः ॥ पारदं गंध
कं शुद्धं मृतलोहं च टंकणं० रास्नाविडंगत्रिफलादेवदारुकटुत्रयं० अमृता पद्मकं क्षौद्रं विश्वं तुल्यांशचूर्णि
तं० त्रिगुंजं सर्वकासार्त्तः सेवयेदमृतार्णवं० अथ सूर्यावर्त्तो रसः ॥ सूतार्द्धो गंधको मर्द्यो यामैकं कन्य
काद्रवैः ॥ द्वयोस्तुल्यं ताम्रपत्रं पूर्वकल्केन लेपयेत्० दिनैकं स्थालिकायंत्रे पक्त्वा मादाय चूर्णयेत्० सूर्याव
र्त्तो रसो नाम द्विगुंजः श्वासजिद्भवेत्० अथ स्वच्छंदभैरवरसः ॥ शुद्धसूतं मृतं लोहं ताप्यं गंधकतालकं०
पथ्याग्निमंथनिर्गुंडी त्र्यूषणं टंकणं विषं० तुल्यांशं मर्दयेत्खल्वे दिनं निर्गुंडिकारसैः ॥ मुंडीद्रावैर्दिनैकं
तु द्विगुंजं वटकीकृतं० भक्षयेद्वातरोगार्त्तो नाम्ना स्वच्छंदभैरवः ॥ रास्नामृतादेवदारुशुंठीवातारिजैः सृतं
समगुग्गुलु पिबेत्क्वाथं सम अनुपानं सुखावहं० अथ हंसपोटली रसः ॥ दग्धान्कपर्दिकान्पिष्ट्वा त्र्यूषणं
टंकणं विषं० गंधकं शुद्धसूतं च तुल्यं जंबीरजैर्द्रवैः ॥ मर्दयेद्भक्षयेन्माषं मरिचाज्यं लिहेदनु० निहंति ग्रह
णीरोगं पथ्यं तक्रोदनं हितं० अथ त्रिविक्रमो रसः ॥ मृतताम्रमजाक्षीरे पाच्यं भोज्यं द्विगुंजकं० बीज

अरणी ५

स्वर्णमाक्षिक

एरंड मूल ४

श्रीराम०
शा० ध० ६३

स्वर्णमाक्षी २ मनःशिला २

इरकमूलं च सजलं चानुपाययेत् । रसस्त्रिविक्रमो नाम मासैकेनाश्मरीं हरेत् । अथ मल्लतालेश्वरो रसः ॥
तालकं ताप्यं शिला सूतं शुद्धं सैंधवटंकणं । समं संचूर्णयेत्खल्वे सूताद्द्विगुणगंधकं । गंधतुल्यं मृतं ताम्रं जंबी
रैर्दिनपंचकं । मर्द्यं षड्भिः पुटैः पाच्यं भूधरे संपुटे पचेत् । पुटे पुटे द्रवैर्मर्द्यं सर्वमेतत्तु षट्पलं । द्विप
लं मारितं ताम्रं लोहभस्म चतुःपलं । जंबीराम्लेन तत्सर्वं दिनं मर्द्यं पुटेल्लघु । त्रिंशदंशं विषं चास्य न्हि
त्वा सर्वं विचूर्णयेत् । माहिषाज्येन संमिश्रं निष्कार्धं भक्षयेत्सदा । मध्वाज्यैर्वाकुचीचूर्णं कर्षमात्रं लिहेदनु
सर्वं कुष्ठं निहंत्याशु मल्लतालेश्वरो रसः ॥ अथ कुष्ठकुठारो रसः ॥ भस्मसूतसमं गंधं मृतायस्ताम्रगुग्गु
लु ॥ त्रिफला च महानिंबश्चित्रकश्च शिलाजतु । इत्येतच्चूर्णितं कुर्यात्प्रत्येकं शाणषोडशं । चतुःषष्टि
करंजस्य बीजचूर्णं प्रकल्पयेत् । चतुःषष्टिमृतं ताम्रं मध्वाज्याभ्यां विलोडयेत् । स्निग्धभांडे धृतं खादेद्द्वि
निष्कं सर्वकुष्ठनुत् । रसः कुष्ठकुठारोयं गलत्कुष्ठनिवारणः ॥ पथ्यं कार्यं समधुरैस्तद्भावे जलौदनं । पा
तालगरुडीमूलं मधुषष्ठ्येः सधान्यकं । सितया भक्षयेत्कर्षमितं ताप्योपशांतये । श्वेतकुष्ठं निहंत्याशु साध्या
साध्यं न संशयः ॥ अथोदयादित्यो रसः ॥ शुद्धसूतं द्विधा गंधं मर्द्यं कन्याद्रवैर्दिनं । तद्गोलं पिठरीमध्ये ता
म्रपात्रेण रोधयेत् । सूतकात्त्रिगुणेनैव शुद्धेनाधोमुखेन तु । पार्श्वे भस्म निधायाथ पात्रोर्ध्वे गोमयं ज
लं । किंचित्किंचित्प्रदातव्यं चुल्ल्यां यामद्वयं पचेत् । चंडाग्निना तत उद्धृत्य स्वांगशीतं विचूर्णयेत् । काष्ठो

चिता १ सर्वज्ञदेव रसं ४ नोनिया ४

गिरिमाला पत्रे २

श्वेत कुष्ट ४

डुंवरिकां वन्हिंत्रिफला राजवृक्षकं॰ विडंगं वाकुचीवीजं क्वाथयेत्तेन भावयेत्॰ दिनैकं तद्रयाद्धित्वोरसोदयो
द्विगुंजकः॥ विचर्च्चिकां दद्रुकुष्ठं श्वेतकुष्ठं च नाशयेत्॰ अनुपानं च कर्त्तव्यं वाकुचीफलचूर्णकं॰ खदिरस्य क
षायेण समेन परिपाचितं॰ त्रिशाणं तद्भवां न्हीदैः क्वाथपेवीत्रिफलोद्भवैः॥ त्रिदिनांते भवेत्स्फोटः सप्ता
हाद्वा विलाशकं॰ नीलीगुंजा च कासीसं ग्रंथनूरंतं सपादिकां॰ सूर्यावर्त्तीं च चांगेरी पिष्ट्वा तु स्सानिले पये
त्॰ स्फोटस्य न प्रशांत्यं घिस सप्तरात्रे पुनः पुनः। श्वेतकुष्ठं जितं त्वाशु साध्यासाध्यं न संशयः। अथ श्वि
त्रे लेपः॥ गुंजाफलाग्निचूर्णं चलेपनं श्वेतकुष्ठनुत्॰ शिलापामार्गभस्मापि लिप्त्वा श्वित्रं विनाश
येत्॰ अथ सर्वेश्वरो रसः॥ शुद्धं सूतं चतुर्गंधं पलं यामं विचूर्णयेत्॰ मृततास्राभ्रलोहानां हरं च पलं पलं॰
सुवर्णं रजतं चैव प्रत्येकं दशनिष्ककं॰ माषैकं मृतवज्रं च तालसत्वं पलद्वयं॰ जंवीरोन्मत्तवासाभिः स्नुहय
र्कविषष्ठ्यिभिः॥ मर्द्दितं यारिजैद्रावैः प्रत्येकेन दिनं दिनं॰ रुद्धं सप्तदिनं मर्दितं गोलं वस्त्रवेष्टितं॰ वालुका
यंत्रगं स्वेद्यं त्रिदिनं लघुवन्हिना॰ आदाय चूर्णयेत्स्लक्ष्णं पलैकं योजयेद्विषं॰ द्विपलं पिप्पलीचूर्णं मिश्रं स
र्वेश्वरो रसः॥ द्विगुंजो लिह्यते न्हौद्रैः सुप्तमंडलकुष्ठनुत्॰ वाकुचीदेवकाष्ठं च कर्षमात्रं सुचूर्णयेत्॰ लि
हेदेरंडतैलेन अनुपानं सुखावहं॰ अथ स्वर्णक्षीरी रसः॥ हेमाक्षां पंच पलिकां क्षिप्त्वा तत्र्वयेत्पचेत्॰

शालीन कुष्ट ३

पारा १ गंधक ४

हरिताल सत्वं ५

जमालगोटा १

श्रीराम॰
शा॰ध॰६४

लोह ३

तक्रे जीर्णे समुद्धृत्य पुनः क्षीरघटे पचेत् ॰ क्षीरे जीर्णे समुद्धृत्य क्षालयित्वा च शोषयेत् ॰ तच्चूर्णितं पंच पलिकं
मरिचानां पलद्वयं ॰ पलैकं मर्द्दितं सूतमेकीकृत्य तु भक्षयेत् ॰ निष्कैकं मतिकुष्ठार्त्तः स्वर्णभैरीरसो ह्ययं ॰ अ
थ महावह्निरसः ॥ भस्मसूतं मृतं कांतं मुंडभस्म शिलाजतु ॰ शुद्धं ताप्यं शिलाव्योषं त्रिफलांकोलबीजकं ॰
कपित्थं रजनीचूर्णं भृंगराजेन भावयेत् ॰ विंशद्वारं विशोष्याथ मधुयुक्तं लिहेत् सदा ॰ निष्कमात्रं हरेन्मे
हान्मेहवज्रो रसो महान् ॰ महानिंबस्य बीजानि पिष्ट्वा सह संमितानि च ॰ पलं तंदुलतोयेन घृतं निष्कद्व
येन ॰ एकीकृत्य पिबेच्चानु हंति मेहं चिरंतनं ॰ अथ वह्निरसः ॥ चतुः सूतस्य गंधाष्टौ रजनी त्रिफला शिला ॰
प्रत्येकं च द्विभागं स्यात् त्रिवृद्दंती पालचित्रकं ॰ प्रत्येकं च त्रिभागं स्यात् कटुबदंती च जीरकं ॰ प्रत्येकं सप्तभा
गं स्यादेकीकृत्य विचूर्णयेत् ॰ जयंती स्नुक्पयो भृंगवह्निर्वा तारितैलकैः । प्रत्येकेन क्रमाद्भाव्यं स
प्तधा च पृथक् पृथक् ॰ महावह्निरसो नाम निष्कमुष्णजलैः पिबेत् ॰ विरेचनं भवेत्तेन तत्र
भक्तं ससैंधवं ॰ दिनांते तत्पथ्यं वर्जयेच्छीतलं जलं ॰ सर्वोदरहरः श्रेष्ठो मूढवातहरः परः ॰ अ
थ विद्याधरो रसः ॥ गंधकं तालकं ताप्यं मृतताम्रं मनःशिलां ॰ शुद्धसूतं च तुल्यांशं मर्द्दयेद्भावयेद्दि
नं ॰ पिप्पल्याः स्नुक्कषायेण वज्रीक्षीरेण भावयेत् ॰ निष्कार्द्धं भक्षयेत् क्षौद्रैः गुल्मं प्लीहादिकं जयेत् ॰
रसो विद्याधरो नाम गोमूत्रं च पिबेदनु ॰ अथ पवित्रनेत्रो रसः ॥ टंकणं हारिणं शृंगं स्वर्णं तुल्यं मृतं रसे ॰

स्वर्णमाक्षि ३

सो ५५ ६
शाकमेरः६
जमालगोटा ८

दिनैकमार्द्रकद्रावैर्मर्दितं रुद्ध्वा भूधरे पचेत् ॰ त्रिनेत्राख्यो रसः सोयं माषं मध्वाज्यकैर्लिहेत् ॰ सैंधवं जीरकं
हिंगु मध्वाज्याभ्यां लिहेद्धनुः ॰ पक्तिशूलं हरत्याशु मासमात्रं न संशयः ॥ अथ शूलगजकेशरी रसः ॥ शुद्धसू-
तं द्विधा गंधं यामैकं मर्दयेद्दृढं ॰ द्वयोस्तुल्यं शुद्धताम्रं संपुटे तन्निरोधयेत् ॰ ऊर्ध्वाधो लवणं दत्वा मृद्भांडेऽध-
रयेद्दिनं पचेत् ॰ ततो गजपुटे पक्त्वा स्वांगशीतं समुद्धरेत् ॰ संपुटं चूर्णयेत्सूक्ष्मं पर्णखंडे द्विगुंजकं ॰ भक्षयेत्सर्व-
शूलार्त्तो हिंगु शुंठी च जीरकं ॰ वचा मरिचजं चूर्णं कर्षमुष्णजलैः पिबेत् ॰ असाध्यं नाशयेच्छूलं रसः स्याच्छू-
लकेसरी ॰ अथाग्निकुमारो रसः ॥ शुद्धसूतं विषं गंधं मजमोदा फलत्रयं ॰ स्वर्जिका च यवक्षारं वन्हि-
सैंधवजीरकं ॰ सौवर्चलं विडंगानि सामुद्रं त्र्यूषणं समं ॰ विषमुष्टि सर्वतुल्यं जंबीराम्लेन मर्दयेत् ॰ मरि-
चाभ्यां वटीं खादेद्वन्हिमांद्यप्रशांतये ॰ अथाजीर्णकंटको रसः ॥ शुद्धसूतं विषं गंधं समं सर्वं विचूर्णयेत् ॰
मरिचं सर्वतुल्यांशं कंटकार्याः फलद्रवैः ॥ मर्दयेद्भावयेत्सर्वमेकविंशतिवारकं ॰ वटीगुंजात्रयं खादेत्स-
र्वाजीर्णप्रशांतये ॰ अजीर्णकंटकः सोयं रसो हंति विषूचिकां ॰ अथ मंथानभैरवो रसः ॥ मृतं सूतं
मृतं ताम्रं हिंगु पुष्करमूलकं ॰ सैंधवं गंधकं तालकटुकी चूर्णयेत्समः ॥ पुनर्नवाद्रवैर्हालीनिर्गुंडीतं-
डुलीयकैः ॥ तिक्तकोशातकीशार्दिनैकं मर्दयेद्दृढं ॰ माषमात्रं लिहेद्धौद्रैः रसो मंथानभैरवः ॥ कफ

५।७४

पि५२

अपिरम

रोग प्रशांत्यर्थं निंवक्काथं पिवेदनु० अथ वातनाशनो रसः॥ सूत हाटक वज्राणि ताम्रं लोहं च माक्षिकं०
तालं नीलांजनं तुत्थमब्धिफेनं समांशकं० पंचानां लवणानां च भागमेकं विमर्द्दयेत्० वज्री क्षीरे दिनैकं तु रु
ध्वा लघुपुटे पचेत्० माषैकमार्द्रकद्रावैर्लिहेद्वातनाशनं० पिप्पली मूलजं क्वाथं सहलं समनुपाय
येत्० सर्वान्वातविकारांश्च निहन्यान्नेपकादिकान्० अथ कनकसुंदरो रसः॥ कनकस्याष्टभागाः सु
सूतो द्वादशभिर्मितः। गंधोपि द्वादश प्रोक्तस्ताम्रं शाणद्वयोन्मितं० अभ्रकं स्याच्चतुःशाणं माक्षिकं च द्विशा
णकं० वंगो द्विशाणः सौवीरस्त्रिशाणः सांलोलमष्ठकं० विषं द्विशाणिकं कुर्यात्लांगलीपलसम्मिता० म
र्द्दयेद्दिनमेकं तु रसेरम्लफलोद्भवैः॥ द्घान्मुडुपुटे वह्नौ ततः सूक्ष्मं विचूर्णयेत्० माषमात्रो रसो देयः
सन्निपाते सुदारुणे० आर्द्रकस्य रसेनैव रसोनस्वरसेन वा किलासं सर्वकुष्ठानि विसर्पं च भगंदरं० ज्व
रं गरमजीर्णं च जयेत्कुष्ठहनो रसः॥ अथ सन्निपातभैरवः॥ रसो गंधस्त्रिभिः कर्षैः कुर्यात्कज्जलि
कां तयोः। ताराभ्रताम्रवंगालिस्ताराश्चैकैककार्षिकाः। शिग्रुज्वालामुखी मुंडी विल्वेभ्यस्तंदुलीय
कान्० प्रत्येकं स्वरसैः कुर्याद्यामैकैकं विमर्द्दयेत्० कृत्वा गोलं च तं वस्त्रे लीवणैः पूरितेन्यसेत्० काचभां
डे ततः स्थाल्यां काचकूपीं निवेशयेत्० वालुकाभिः प्रपूर्याथ वह्निं यामद्वयं भवेत्० ततउद्धृत्य तं गोलं

वीरांजनद्ध

सीसकं ३

जासनप

चूर्णयित्वा विमिश्रयेत्॰ प्रवालचूर्णकर्षं स्याच्छाणमात्रं विषेण च॰ वालुकाभिः मधुच्छिष्टा पचविंश्मम
दर्म्भवेत्॰ नीलिनीपत्रकं चैला चित्रकस्य कुटेरकः॥ शतपुष्पा देवदाली धत्तूरागस्तिमुंडिका॰ कृष्ण
सर्पस्य गरलैर्द्विवेलं भावयेत्तरः॰ तगरं मुशली मांसी देमाक्कावेतसः कणा॰ मधूकजाती मरन्नार
सैरेयां विमर्द्दयेत्॰ प्रत्येकवेलं च ततः संशोष्य कारयेत्॰ वीजपूराद्रकद्रावैर्मरिचैः षोडशोन्मि
तैः॥ रसो द्विगुंजप्रमितः सन्निपाते प्रदीयते॰ श्रीसहायं रसो नाम्ना सन्निपातस्य भैरवः॥ अ
थ ग्रहणीकपाटः॥ तारमौक्तिकहेमानि सारश्चैकैकभागिकः। द्विभागो गंधकः सूतस्त्रिभागो म
र्द्दयेद्दिनं॰ कपित्थस्वरसे गाढं मृगशृंगे ततः क्षिपेत्॰ पुटेन्मध्यपुटेनैव तत उद्धृत्य विमर्द्दयेत्॰ व
लारसैः सप्तवेलमपामार्गरसैस्त्रिधा॰ लोध्रप्रतिविषामुस्ताधातकींद्रयवामृताः। प्रत्येकमेकं
स्वरसैर्भावना स्यात्त्रिधा त्रिधा॰ माषमात्रो रसो देयो मधुना मरिचैस्त्रिधा॰ हन्यात्सर्वानतीसा
रान्ग्रहणीः सर्वजामपि॰ कपाटो ग्रहणीरोगे रसोयं वह्निदीपनः॥ अथ ग्रहणीवज्रकपाटः॥ मृ
तं सूताभ्रकं गंधं यवक्षारं सटंकणं॰ अग्निमंथं वचा कुर्यात्सूततुल्यानि मानसुधीः॥ ततो जयंती
जंवीरभृंगद्रावैर्विमर्द्दयेत्॰ त्रिवारं ततो गोलं कृत्वा संशोष्य धारयेत्॰ लोहपात्रे सरावं च दत्वोपरि
विमुद्रयेत्॰ अधो वह्निं शनैः कुर्याद्यामार्द्धं तत उद्धरेत्॰ रसतुल्यां प्रतिविषां दद्यान्मोचरसं तथा॰

श्रीराम॰
शा॰ ध॰ ६६

कपित्थ विजयाशवैर्भावयेत्सप्तधा पृथक्॰ धातकींद्रयवाम्रस्ताद्यो धंविल्वं ग्रूचिका॰ रतद्रसैर्भावयित्वा वेले कैकं च शोषयेत॰ रसं वज्रकपोतमुं रवंशाणैकं मधुनालिहेत॰ वन्हिशुंठीविडं बिल्वं लवणं चूर्णयेत्समं॰ पिबेदु स्णांवुनाचानु सर्वजां ग्रहणीं जयेत॰ अपमहेनकामेश्वोर सः॥ तारं वज्रं सुवर्णं च ताम्रं सूतं च गंधकं॰ लोहं क्रमाद्विवृद्धानि कुर्यादेतानि मात्रया॰ विमर्ध कन्यकारसैर्न्यसेत्काचमये घटे॰ विमुद्रा पिउरीमध्ये धारयेत्सैंधवैर्भृते॰ पिठरीमुद्रयेत्सम्यक्ततस्चुल्ल्यां निवेशयेत॰ वह्निं शनैः शनैः कुर्याद्दिनैकं ततउद्धरेत॰ स्वांगशीतं च संचूर्ण्य भावयेत्सर्कदुग्धकैः अश्वगंधा च काकोली वानरी मुशली शुभा॰ त्रित्रिवेलं रसैरेषांशाताव र्याश्च भावयेत॰ पश्चकंदकसेरूणां रसैः कांस्य विभावयेत॰ कस्तूरी मोचकर्पूरं कंकोलैला लवंगकं॰ पूर्वचूर्णाद्दशमांसमेतच्चूर्णं विमिश्रयेत॰ सर्वैः समं शर्करा च दत्वा शाणोन्मितां पिबेत॰ गोदुग्धं द्विपलं नैव मधुरा हारसेवकः॥ अस्य प्रभावात्सौंदर्यं बलं तेजो विवर्द्धते॰ तरुणीरमये द्बह्वीश्च क्लानिर्न जायते॰ अपकंदर्पसुंदरो रसः॥ सूतं वज्रं महिः मुक्ता तारं हेम शिलाभ्रकं॰ रसैः कर्षोन्मिताने तान्मर्दयेद्दिनमेकजेः। प्रवालचूर्णं गंधश्च द्विद्विकर्षे विमिश्रयेत॰ ततो श्वगंधा स्वरसैर्विमर्द्य मृगशृंगके॰ न्निप्त्वामृद्वपुटे पक्त्वा भावयेत्पातकी रसैः॥ काकोली मधुकं मांसीवलीत्रयविशोधु ६०

बलातिबला नागबला १ मएणंल मक्षीं ३ १ गइरा जनवत्र्यं १

क्षे॰ पा॰ चं॰ ६

वि॰ रवीरिरर

माष·मुद्ग·शालि·पृश्नपर्णी चेति १

सहचरे = कपिकच्छु १

द्राक्षापिप्पलवंशाकवाणपर्णीचतुष्टयं० परूषकंकसेरुश्च मधुकंवानूरीतपाः भावयित्वा रसैरेषां
शोषयित्वाविचूर्णयेत्० एलात्वकपत्रकंवांशीलवंगागुरुकेसरं० मुस्तंमृगमदंहला साजलंचंद्रश्चविमिश्र — कस्तूरी २
येत्० एतच्चूर्णैः शारामितैः रसः कुंदष्यिंसु हरः॥ खादेत्क्षाणमितंरात्रौशिलाधात्रीविदारिकाः॥ एता
सांकेषचूर्णेनसर्पिः कर्षेण संयुतं० तस्यानुद्विपलंक्षीरंपिबेत्सुखितमानसः॥ रमणीरमयेद्धृष्टो
नहानिंकाप्निगच्छति० अपलोलहरसायनं० शुद्धंरसंत्रिभागेकंद्विभागंशुद्धगंधकं० क्षिपेत्कज्जलिकांकृ
षितत्रतीहत्राभवंरजेः॥ क्षिप्त्वाकज्जलिकातुल्यंमर्दयेत्कविमर्दयेत्० ततःकन्याद्रवेघर्मेत्रिदिनंपरि
मर्दयेत्० ततः संजायतेतस्यसोह्माधूमोऽमोभवेत्० अथतंपिंडितंकृत्वाताम्रपात्रेनिधायच०
मध्येधान्यकुशूलस्यत्रिदिनंधारयेद्बुधः॥ उद्धृत्यतत्समांतवल्वेचक्षिप्त्वाचघर्मेनिधायच० रसैः
कुमारिच्छिन्नायास्त्रिवेलंपरिभावयेत्० संशोष्यघर्मिकापेश्चभावयेत्रिकटोस्त्रिशः॥ वासामृ — त्रिपतिआ ५
ताचित्रकानांरसेभीक्ष्णपपकचपकं० लोहपात्रेततःहित्वाभावयेत्रिफलाजलैः॥ निर्गुंडीहाडि
मत्वग्भिर्वीशाभंगकुरंटकैः॥ पलाशाकदलीद्राववर्धीजकस्पष्टतैलचं० मौलिकालंबमांसद्रावेविद्ध — सहचरः ३ — विजयसार ३
लफलिकारसैः॥ भावयित्वात्रिवेलंचततोनागवलारसैः॥ शतावरीगोक्षुरकैः पाताललगरूडीरसैः॥
त्रित्रिवेलंयपालाभंभावयेदेभिरौषधेः॥ ततः प्रातर्लिहेत्क्षौद्रसर्पिर्भ्यांकोलमात्रकं० पल — छिरहटा २

मात्रंवाहरीतक्यापिबेदस्यानुपानकं॰मासत्रयंशीलितंस्याद्वलीपलितनाशनं॰मंदाग्निश्वासकासोच
पांडुतांकफमारुतौ॰पिप्पलीमधुसंयुक्तंहन्यादेतन्नसंशयः॥वातास्रमूत्रदोषांश्चग्रहणींचोदरव्यथां
अंत्रवृद्धिंजयेदेतच्छिन्नासत्वमधु~~संयुक्तं~~प्लुतं॰बलवर्णकरंवृष्यमायुष्यंपरमंस्मृतं॰जयेत्सर्वमा
यान्कालादिदंलोहरसायनं॰मन्तेव्योषधमेतस्मिन्नद्यात्कोलमात्रकं॰कुष्मांडंतिलतैलंच
माषान्नंराजिकांतथा॰मद्यमम्लरसंचैवत्यजेल्लोहस्यसेवकः॥इतिश्रीदामोदरसूनुशार्ङ्गध
रेणविरचितायांशार्ङ्गधराख्यचिकित्सायांमध्यमखंडः॥स्नेहश्चतुर्विधःप्रोक्तोघृतंतैलं

मस्तकमज्जा अस्थि
मज्जा चेद्

वसातथा॰मज्जाचतंपिबेन्मर्त्यःकिंचिदभ्युदितेरवौ॰स्थावरोजंगमश्चैवद्वियोनि
स्नेहउच्यते॰तिलंतैलंस्थावरेषुजंगमेषुघृतंवरं॰ताभ्यांत्रिभिश्चतुर्भिस्तैर्यमक
स्त्रिवृतोमहान्॰पिबेत्र्यहंचतुरहंपंचाहंषडहंतथा॰सप्तरात्रात्परंस्नेहःसात्मीभवति
सेवितः॥दोषकालाग्निवयसांबलंदृष्ट्वाप्रयोजयेत्॰हीनांचमध्यमांज्येष्ठांमात्रांस्नेह
स्यबुद्धिमान्॰अमात्रयातथाकालेमिथ्याहारविहारतः॥स्नेहःकरोतिशोफार्शस्तंद्रानिद्रावि
संज्ञिता॰हेयादीप्ताग्नयेमात्रास्नेहस्यपलसंमिता॰मध्यमांचत्रयःकर्षास्याज्जघन्याद्विका

षिकी० अथवा स्नेहमात्राः स्युस्तिस्रोऽन्याः सर्वसम्मताः० अहोरात्रेण महती जीर्यत्यन्हि तु मध्यमा० जी
र्यत्यल्पाद्दिनार्द्धेन सा विज्ञेया सुखावहा० अल्पा स्याद्दीपनी वृष्या स्वल्पदोषेषु पूजिता० मध्यमा स्नेहनी ज्ञेया
वृंहणीत्र महारिश्वी० ज्येष्ठा कुष्ठविषोन्मादग्रहापस्मारनाशिनी० केवलं पैत्तिके सर्पिर्वातिके लवणान्वितं०
पेयं बहुकफे चापि व्योषक्षारसमन्वितं० रुक्षक्षतविषार्त्तानां वातपित्तविकारिणां० हीनमेधास्मृतीनां च स
र्पिः पानं प्रशस्यते० क्रिमिकोष्ठानिलाविष्टाः प्रवृद्धकफमेदसः॥ पिबेयुस्तैलसात्म्याये तैलं दार्ढ्यार्थिनश्च ये०
व्यायामकर्षिताः शुष्करेतोरक्ता महारुजः॥ महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः॥ क्रूराशयाः क्ले
शसहा वातार्त्ता दीप्तवह्नयः॥ मज्जानमापिबेयुस्ते सर्पिर्वा सर्वतो हितं० शीतकाले दिवा स्नेहमुष्णकाले पिबे
न्निशि० वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा० नस्याभ्यंजनगंडूषमूर्द्धकर्णाक्षितर्प्पणं० तैलं घृतं वा यु
जीत दृष्ट्वा दोषबलाबलं० घृते कोष्णजलं पेयं तैले यूषः प्रशस्यते० वसामज्ज्ञोः पिबेन्मंडमनुपानं सुखावहं० स्नेह
द्विषः शिशून्वृद्धान्सुकुमारान्कृशानपि० तृष्णालुकानुष्णकाले सहभक्तेन पाययेत्० सर्पिष्मती बहुतिला
यवागूः स्वल्पतंडुला० सुखोष्णसेव्यमाना च सद्यः स्नेहनकारिणी० शर्कराचूर्णसंसृष्टे दोहनस्थे घृते तु गां
दुग्धान्क्षीरं पिबेत्तृष्णार्त्ताः सद्यः स्नेहनमुच्यते० मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्यति० विष्टभ्य
वापि जीर्येत वारिणोष्णेन वामयेत्० स्नेहस्याजीर्णशंकायां पिबेदुष्णोदकं नरः॥ ततो उद्गारो भवेच्छुद्धो

मक्तंप्रतिरुचिस्तृष्णा० स्नेहेनपैत्तिकस्याग्निर्दी॰ हत्वीह्वातरीकृतः॥ ततस्योदीरयेत्तृष्णां विषमांतस्य
यामयेत्० शीतंजलंपाययेच्च पिपासातेनशाम्यति० अजीर्णीवर्जयेत्स्नेहमुदरीतरुणज्वरी० दुर्बलोऽरोच
कीस्थूलीमूर्छार्त्तोमदपीडितः॥ दत्तवस्तिर्विरिक्तश्चवांतस्तृष्णाश्रमान्वितः॥ अकालप्रसवानारी
दिनेचविवर्जयेत्० स्वेदसंशोध्यमद्यस्त्रीव्यायामासक्तचिंतकाः॥ वृद्धावालाह्वलाकृशारूक्षाः क्षीणास्त्र
क्षीणरेतसः॥ वातार्त्तास्तिमिरार्त्ताश्चतेषांस्नेहनमुत्तमं० वातानुलोमंदीप्ताग्निर्वर्चः स्निग्धमसं
हतं० मृदुस्निग्धांगताग्लानिः स्नेहोद्वेगोऽथलाघवं० विमलेंद्रियतासम्यक्स्निग्धेरूक्षेविपर्ययः॥ भक्त
द्वेषोमुखस्रावोगुदेदाहःप्रवाहिका० तंद्रातिसारः पांडुत्वंभृशंस्निग्धस्यलक्षणं० रूक्षस्यस्नेहनंस्नेहे
रतिस्निग्धस्यरूक्षणं० श्यामाकचणकाद्येश्चतक्रपिण्याकशक्तुभिः॥ दीप्ताग्निःशुद्धकोष्ठश्चदृढधा
तुदृढेंद्रियः॥ निर्जरावलवर्णाढ्यः स्नेहसेवीभवेन्नरः॥ स्नेहेव्यायामसंशीतवेगाघातप्रजागरा
न्२० दिवास्वप्नमभिष्यंदिरूक्षान्नंचविवर्जयेत्० इतिश्रीशार्ङ्गधरेस्नेहपानविधिः॥ स्वेदश्च
तुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञिकौ० उपनाहोद्रवः स्वेदः सर्ववातार्तिहारिणः॥ स्वेदौतापोष्मजौ
प्रायः श्लेष्मघ्नौसमुदीरितौ० उपनाहस्तुवातघ्नः पित्तसंगेद्रवोहितः॥ महावलेमहाव्याधौशीतेस्वेदो

कोष्णंगेहमंगारादिभिः २

महास्थूलं ॥ दुर्व्वले दुर्व्वलः स्वेदो मध्ये मध्यतमो मतः ॥ वलासे रूक्ष उष्णः स्वेदो रूक्षः स्निग्धः कफानिले ॥ कफमेदो
वृत्ते वाते कोष्णंगेहंस्वेदः करान् ॥ नियुद्धं मार्गगमनं गुरु प्रावरणं ध्रुवं ॥ चिंताव्यायामभारांश्च सेवेतामयमु
क्तये ॥ येषां नस्यं विधातव्यं वस्तिश्चापि हि देहिनां ॥ शोधनीयाश्च ये केचित्सर्व्वे स्वेद्याश्च ते मता ॥ स्वेद्याः पूर्व्व
त्रयः स्त्रीलभं गे हर्षिशिल्पांतथा ॥ अस्मप्याश्चाशु नोजंतुः शाम्येकृच्छ्रकर्म्मणः ॥ पश्चात्स्वेद्यागते शल्ये मूढगर्भगेहे
तथा ॥ काले प्रजातकाले वा पश्चात्स्वेद्या नितंविनी ॥ सर्व्वान्स्वेदान्निवाते च जीर्णाहारे च कारयेत् ॥ स्वेदास्फो
तुगतादोषाः स्वेदाल्लिन्नस्य देहिनः ॥ द्रव्यत्वं प्राप्य कोष्ठांत गत्वा यांति विरेकतां ॥ स्वेद्यमानशरीरस्य हृद
यं शीतलैः स्पृशेत् ॥ स्नेहाभ्यक्तशरीरस्य शीतैराछाद्य चक्षुषी ॥ अजीर्णि दुर्व्वलो मेही क्षतक्षीणः पिपासितः
अतीसारी रक्तपित्ति पांडुरोगी तथोदरी ॥ महार्त्ता गर्भिणी चैव न हि स्वेद्या विजानता ॥ एतानपि मृदुस्वेदैः
स्वेद्यसाध्यानुपाचरेत् ॥ मृदुस्वेदं प्रयुंजीत तथा हृन्मुष्कदृष्टिषु ॥ अतिस्वेदात्संधिपीडा दाहस्तृष्णा क्लमो भ्र
मः ॥ पित्तास्र किं[illegible]उकाकोपस्तत्र शीतैरुपाचरेत् ॥ तेषु तापाभिधः स्वेदो वालुकावस्त्रपाणिभिः ॥ कपालकंडु
काङ्गारैर्यथायोग्यं प्रजायते ॥ उष्मा स्वेदः प्रयोक्तव्यो लोहपिंडेष्टकादिभिः ॥ अत्र सेरम्लसिक्तैः स्वकोय क[illegible]टवेष्टि
तैः ॥ अपवा वातनिर्ण्णाशि द्रव्यक्वाथ रसादिभिः ॥ उष्णैर्व्वटं पूरयित्वा पार्श्वछिद्रं विधाय च ॥ विन्यसेत्त्रि
खंडां च धातुजां काष्ठजां तथा ॥ षडंगुला स्यां गोपुछा नाडी प्रक्तो छिद्र स्ति कां ॥ सुखोपविष्टं स्वभ्यक्तं गुरु

स्नेहाभ्यक्तरूक्षस्य ६

स्फोटादीनां ४

दशमस्त्व प्रभृतौ निर २

घटमुखमुद्रयेत २

श्रीराम०
शा० ध० ६९

क्षीरादिभिरंगारंनिषिंच्य २ एरंडपत्रप्रभृतिकैः २ तच्छयानंभूगर्तेपरि २

प्रावरणावृतं० हस्तिशुंडिकयानाड्यास्वेदयेद्वातरोगिणं ०पुरुषायाममात्रांतुभूमिमुत्कीर्य खादिरैः॥काष्ठै
र्दग्धाभ्युक्ष्यक्षीरधान्याम्लवारिभिः॥वातघ्नपत्रैराच्छाद्यशयानंस्वेदयेन्नरं० एवंमाषादिभिःस्विन्नैःश
यानंस्वेदमाचरेत्०तथोपनाहस्वेदंचकुर्याद्वातहरौषधैः॥प्रदिह्यदेहंवातार्त्तंक्षीरमांसरसान्वितैः
अम्लपिष्टैःसलवणैःसुखोष्णैःस्नेहसंयुतैः॥ततोग्राम्यानूपमांसैर्जीवनीयेगणेनच० दधिसौवी
रकक्षीरैर्वीर[illegible]तर्वादिनायवकुलत्थमाषगोधूमैरतसीतिलसर्षपैः॥शतपुष्पादेवदारुशेफाली
स्थूलजीरकैः॥एरंडमूलबीजैश्चरास्नामूलकशिग्रुभिः॥मिशाकृष्णाकुठेरश्चलवणैरम्लसंयुतैः॥
प्रसारण्यास्वगंधाभ्यांबलाभिर्दशमूलकैः॥गुडूचीवानरीबीजैर्यथालाभंसमाहृतैः॥चुक्रैःस्विन्नैस्व
वस्त्रेणविवद्धैःस्वेदयेन्नरं० महाशाल्वणसंज्ञोयंयोगःसर्वानिलार्त्तिनुत्० द्रवस्वेदस्तुवातघ्नः द्रव्य
क्वाथेनपूरितं० कटाहंकोष्ठकंवापिसूपविष्टोवगाहयेत्० सोवर्णंराजतंवापिताम्रमायसदारुजं
म० कोष्ठकंतत्रकुर्वीतोच्छ्रायेषट्त्रिंशदंगुलम्० आयामेनतदस्याच्चतुष्कमसृणंतथा० नाभेःषडं
गुलंयावन्मग्नःक्वाथस्तुधारयेत्० कोष्ठकेस्कंधयोःसिक्तस्तिष्ठेद्विगतरुग्नरः॥एवंतैलेनदुग्धेनस
र्पिषास्वेदयेन्नरं० एकांततोथवांतुतनोवास्नेहोष्णकोवगाहेन० शिरामुखैर्लोमकूपैर्धमनीभिश्चतर्प्य
यते० शरीरेबलमाधत्तेयुक्तःस्नेहोवगाहने० जलसिक्तस्यवर्द्धंतेयथामूलेंकुरास्तरोः॥तथाधातु

दिनांतरःद्विदिनांतरेनावा २

सौवीरककांजिकभेद ५
सहचरदर्भवज्ञादि
ना ५

निर्गुंडी ५

विवृद्धिस्तु स्नेहसिक्तस्य जायते॰ मातः परतरः कश्चिदुपायो वातनाशनः॥ शीतशूलव्युपरमे स्तंभगौरव
निग्रहे॰ दीप्तेग्नौ मार्द्दवे जाते स्वेदनाद्विरतिर्मता॰ सम्यक् स्विन्नं विमृदितं स्नानमुष्णाम्बुभिः शनैः॥ भोजयेद्वा
नभिष्यंदि व्यायामं च न कारयेत्॰ इति श्रीशार्ङ्गधरविरचितायां चिकित्सायां स्वेदविधिरध्यायः॥ अथ वमनविधिः॥
शरत्कालेवसंते च प्रावृट्कालेच देहिनां॰ वमनं रेचनं चैव कारयेत्कुशलोभिषक्॰ बलवंतंकफव्याप्तंहृल्लासादि
निपीडितं॰ तथा वमनसात्म्यं च धीरचित्तं च वामयेत्॰ शीतशूलव्युपरमे स्तंभे गौरवनिग्रहे॰ दीप्तेग्नौ मार्द्दवेजा
ते स्वेदनाद्विरतिर्मतः॥ सम्यक् स्विन्नं विमृदितं स्नानमुष्णाम्बुभिः शनैः॥ भोजयेच्चानभिष्यंदि व्याया
मं च न कारयेत्॥ विषदोषे स्तन्यरोगे मंदेग्नौ श्लीपदेर्बुदे॰ हृद्रोगकुष्ठवीसर्पमेहाजीर्णभ्रमेषु च॰ विदारिकाप
चीकासश्वासपीनसवृद्धिषु॰ अपस्मारज्वरोन्मादे तथा रक्तातिसारिषु॰ नासाताल्वोष्ठपाके च कर्णस्रावेधिजि
ह्वके॰ गलशुंड्यामतीसारे पित्तश्लेष्मगदेषु॰ मेदोगदेरुचौ चैव वमनं कारयेद्भिषक्॰ न वामनीयस्तिमिरी
न च गुल्मोदरी कृशः॥ नातिवृद्धो गर्भिणी च न स्थूलो न क्षतातुरः॥ मदार्त्तो बालको रूक्षः क्षुधितश्च नि
रूहितः॥ उदावर्त्त्यूर्द्ध्वरक्ती च दुःछर्दिः केवलानिली॰ पांडुरोगी कृमिव्याप्तः पठनात्स्वरघातकः॥ एते
त्वजीर्णव्यथिता वाम्या ये विषपीडिताः॥ कफव्याप्ताश्च ते वाम्या मधुकक्वाथपानतः॥ सुकुमारं कृशं बा
लं वृद्धं भीरुं च वामयेत्॰ पीत्वा यवागूमाकंठं क्षीरतक्रदधीनि च॰ असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्ले
श्य देहिनः॥ स्निग्धस्विन्नाय वमनं दत्तं सम्यक् प्रवर्त्तते॰ वमनेषु च सर्वेषु सैंधवं मधु वा हितं॰ बीभ

त्संवमनंद्घाद्विपरीतंविरेचनं॰ क्वाथ्यद्रव्यस्यकुडवंश्रपयित्वाजलाढके॰ अर्द्धभागावशिष्टंतुवमने
ष्ववचारयेत॰ क्वाथपानेनवप्रस्थाज्येष्ठामात्राप्रकीर्तिता॰ मध्यमाषडमिताप्रोक्तात्रिप्रस्थाचकनी
यसी॰ कल्कचूर्णावलेहानांत्रिपलंश्रेष्ठमात्रया॰ मध्यमंद्विपलंविंद्यात्कनीयस्तुपलंभवेत॰ वमनेचापि
वेगाःस्युरष्टौपित्तांतउत्तमाः॥ षडेवामध्यमावेगाश्चत्वारस्त्ववरेमतः॥ वमनेचविरेकेचतथाशो
णितमोक्षणे॰ अर्द्धत्रयोदशपलंप्रस्थमाहुर्मनीषिणः॥ कफंकटुकतीक्ष्णोष्णैः पित्तंस्वादुहिमैर्जये
त॰ सस्वादुलवणाम्लोष्णैः संसृष्टंवायुनाकफं॰ कृष्णाराढफलंसिंधुकफेकोष्णजलैः पिबेत॰ प
टोलवासानिंबैश्चपित्तेशीतजलंपिबेत॰ सश्लेष्मवातपीडायांसक्षीरंमदनंपिबेत॰ अजीर्णि
कोष्णपानीयंसिंधुपीत्वावमेत्सुधी॰ वमनंपाययित्वाचजानुमात्रासनस्थितं॰ कंठमेरंडनालेनस्प
र्शातंवामयेद्भिषक॰ प्रसेकोहृद्ग्रहःकोठःकंडूःछर्दितिभवेत॰ अतिवांतेभवेत्तृष्णाहिक्कोद्गारौ
विसंज्ञिता॰ जिह्वानिःसर्पणंचाक्षोः व्यावर्तिर्हनुसंहतिः॥ रक्तछर्दिःष्ठीवनंचकंठपीडाचजाय
ते॰ वमनस्यातियोगेचमृदुकुर्याद्विरेचनं॰ वमनान्तःप्रविष्टायांजिह्वायांकवलग्रहः॥ स्निग्धाम्ल
लवणैर्हृद्यैर्घृतक्षीररसैर्हितः॥ फलान्यम्लानिखादेयुस्तस्यवांतेऽग्रतोनराः॥ निःसृतांतुतिलद्रा
क्षाकल्कलिप्तांप्रवेशयेत॰ व्यावृत्तेहनुनीधत्ताभ्यक्तेपीडयेच्छनैःशनैः॥ दत्तमोहेस्मृतःस्वेदोनस्यं

चश्लेष्मवातहृत॰ रक्तपित्तविधानेनरक्तछर्दिमुपाचरेत॰ धात्रीरसांजनोशीरलाजाचंदनवारिभिः॥ मंपं
कृत्वापाययेच्चसक्षौद्रं हौद्रशार्करं॰ शाम्यंत्यनेनतत्स्याघाः पीडाछर्दिसमुद्भवाः॥ छ्वलंकंठसिरसाशुद्धिदीप्ताग्नित्वं
वलाघवं॰ कफपित्तविनाशस्वसम्यग्वांतस्यचेष्टितं॰ ततोपरान्हेदीप्ताग्निंमुद्गषष्ठिकशालिभिः॥ ह्यूघेश्च
जांगलरसैःकृत्वायूषंचभोजयेत॰ तंद्रानिद्रास्यदौर्गंध्यकंडूच्यग्रहणीविषं॰ सुवांतस्यनपीडायैभवत्येतेक
दाचन॰ अजीर्णंशीतपानीयंव्यायाममैथुनंतथा॰ स्नेहाभ्यंगंप्रकोपंचदिनेकंवर्जयेत्सुधी॰ इतिश्रीशार्ङ्ग
धरेवमनविधिरध्यायः॥ अथवमनविरेचनं॰ स्निग्धस्विन्नस्यवांतस्यदघात्सम्यग्विरेचनं॰ अवांत
स्यत्वधःश्रक्तोग्रहणींछादयेत्कफः॥ मंदाग्निगौरवंकुर्याज्जनयेद्वाप्रवाहिकां॰ अथवापाचनैरामंश्लेष्मा
णंचविपाचयेत॰ स्निग्धस्यस्नेहनैःकार्यंस्वेदस्विन्नस्यरेचनं॰ शरद्तौवसंतेचदेहशुद्धौविरेचयेत॰ अ
न्यदात्यायिकेकार्येशोधनंशीलयेद्बुधः॥ पित्तेविरेचनंयुंज्यादामोद्भूतेगदेतथा॰ उदरेचतथाध्मानेकोष्ठशु
द्धौविशेषतः॥ शरीरजानांदोषाणांक्रमेणपरमौषधं॥ वस्तिर्विरेकोवमनंतथातैलंघृतंमधुः॥ दोषाःक
दाचित्कुप्यंतिजितालंघनपाचनैः॥ येतुसंशोधनैःशुद्धानतेषांपुनरुद्भवः॥ वालवृद्धावतिस्निग्धःक्षतक्षी
णोभयान्वितः॥ श्रान्तात्तृषार्त्तःस्थूलश्चगर्भिणीचनवज्वरी॰ नवप्रसूतानारीचमंदाग्निश्चमदात्य
यी॰ शल्यार्दितश्चरूक्षश्चनविरेच्याविजानता॰ जीर्णज्वरीगरव्याप्तोवातरक्तीभगंदरी॰ अर्शः

पांडूदरग्रंथिहृद्रोगारुचिपीडिताः॥ योनिरोगप्रमेहार्त्तगुल्मप्लीहव्रणार्दिताः॥ विद्रधिछर्दिविस्फोटवि-
शूचीकुष्ठसंयुताः॥ कर्णनासाशिरोवक्रगुदमेढ्रामयान्विताः। प्लीहशोफाक्षिरोगार्त्तकृमिक्षीणानिलार्दि-
ताः॥ शूलिनो मूत्रघातार्त्ता विरेच्यास्ते नरा मताः॥ बहुपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्यमः॥ बहुवातः
क्रूरकोष्ठो दुर्विरेच्यः स उच्यते। मृद्वी मात्रा मृदौ कोष्ठे मध्ये कोष्ठे च मध्यमा। क्रूरे तीक्ष्णा स्मृता द्रव्यैर्मृदु-
मध्यमतीक्ष्णकैः॥ मृदुर्द्राक्षापयश्चाम्बुतैलैरपि विरच्यते। मध्यमस्त्रिवृतातिक्तराजवृक्षैर्विरच्यते।
क्रूरः स्नुक्पयसा हेमक्षीरीदंतीफलादिभिः॥ मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफांतिका। वेगैर्विंशति-
भिर्मध्या हीनोक्ता दशवेगतः॥ द्विपलं श्रेष्ठमाख्यातं मध्यमं च पलं भवेत्। पलार्द्धं च कषायाणां कनी-
यस्तु विरेचनं। कल्कमोदकचूर्णानां कर्षं मध्वाज्यलेहतः॥ कर्षद्वयं पलं वापि वयोरोगाद्यपेक्षया। पि-
त्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत्। त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योषं कफार्दितः॥ त्रिवृत्सैंधवशुं-
ठीनां चूर्णमम्लैः पिबेन्नरः॥ वातार्दितो विरेकाय जांगलानां रसेन वा। एरंडतैलं त्रिफलाक्वाथेन द्विगु-
णेन च। युक्तं पीतं पयोभिर्वा न चिरेण विरच्यते। त्रिवृत्ता कौटजं बीजं पिप्पली विश्वभेषजं॥ समृद्वी-
कारसं क्षौद्रं वर्षाकाले विरेचनं। त्रिवृद्दुरालभामुस्ताशर्करोदीच्यचंदनैः॥ द्राक्षांबुना सयष्ट्याह्वं
शीतलं च घनात्यये। त्रिवृत्तां चित्रकं पाठामजाजीं सरलं वचां। हेमक्षीरीं समं चूर्णं मूत्रांबुना पिबेत्।पि॥

प्पलीनागरंसिंधुश्यामात्रवृत्तयासह॰लिहेत्क्षौद्रेणशिशिरेवसंतेचविरेचनं॰त्रवृच्छर्करातुल्याग्री
ष्मकालेविरेचनं॰अभयामरिचंशुंठीविडंगामलकानिच॰पिप्पलीपिप्पलीमूलंत्वक्पत्रंमुस्तमेवच॰ए
तानिसमभागानिदंतीचत्रिगुणाभवेत्॰त्रवृदष्टगुणाप्रोक्ताषड्गुणाचात्रशर्करा॰मधुनामोदकंकृत्वाक
र्षमात्रंप्रमाणतः॰एकैकंभक्षयेत्प्रातःशीतंचानुपिवेज्जलं॰तावद्विरिच्यतेजंतुर्यावदुष्णंनसेव्यते॰पा
नाहारविहारेषुभवेन्नियंत्रणः॰समानं॰विषमज्वरमंदाग्निपांडुकासभगंदरान्॰दुर्नामकुष्ठ
गुल्मार्शोगलगंडभ्रमोदरान्॰विदाहप्लीहमेहांश्चयक्ष्मानंनयनामयान्॰वातरोगांस्तथाध्मानंमूत्र
कृच्छ्राणिचाश्मरी॰पृष्ठिपार्श्वोरुजघनकुक्षिहृद्रुजांजयेत्॰सततंशीलमानानांपालितो
निप्रणाशयेत्॰अभयामोदकोह्येषरसायनवरंस्मृतः॥पीत्वाविरेचनंशीतजलैःसंसिच्य
चक्षुषी॰सुगंधंवाविचिह्राघ्रायताम्रूलंशीलयेद्वरं॰निवातस्थेनवेगांश्चधारयेत्रशयेतथा॰
शीताम्बुनस्पर्शःक्वापिकोष्णनीरंपिवेन्मुहुः॥बलासोषधपित्तानिवायुर्वातेयथाव्रजेत्॰
रेकांतथामलंपित्तंभेषजंचततोव्रजेत्॰दुर्विरक्तस्यनाभेस्तुस्तब्धत्वंकुक्षिशूलता॰पुरीषवा
तसंगश्चकंडूमंडलगौरवं॰विदाहोरुचिराध्मानंभ्रमःछर्दिश्चजायते॰तंपुनःपाचनैःस्नेहैःप
क्त्वासंस्नेह्यरेचयेत्॰तेनास्योपद्रवाःयांतिदीप्ताग्निर्लघुताभवेत्॰विरेकस्यातियोगेनमूर्छाभ्रं

शोगुदस्यच॰ शूलंकफातियोगःस्यान्मांसधावनसन्निभं॰ मेदोनिभंजलाभासंरक्तंवापिवि
रिच्यते॰ तस्यशीताम्बुभिःशिक्त्वाशरीरंतंडुलांबुना॰ मधुमिश्रैस्तथाशीतैःकारयेद्वमनंमृदु॰ स
हकारत्वचःकल्कोदध्नासौवीरकेणवा॰ पिष्ट्वानाभिप्रलेपेनहंत्यतीसारमुल्वणं॰ अजाक्षीरंरसं
वापिवेष्किरंहारिणंतथा॰ शालिभिःषष्टिकैस्तुल्यंमसूरैर्वापिभोजयेत्॰ शीतैःसंग्राहिभिर्द्रव्यैः
कुर्यात्संग्राहणंभिषक्॰ लाघवंमानसस्तुष्टमनुलोमंगतेनिले॰ अविरिक्तंनरंज्ञात्वापाच
नंपाचयेन्निशि॰ इंद्रियाणांवलंबुद्धेःप्रसादंवह्निदीपनं॰ धातुस्थैर्यंभवेद्रेचनसेवनात्॰ अवा
तसेवाशीतांवुस्नेहाभ्यंगमजीर्णता॰ व्यायाममैथुनंचैवनसेवेतविरेचितः॥ शालिषष्टिक
मुद्गाद्यैर्यवागूंभोजयेत्कृतं॰ जांगलंविष्किराणांवारसैःशाल्योदनंहितं॰ इतिशार्ङ्गधरेविरेच
नविधिरध्यायः॥ अथवस्तिविधिः॥ वस्तिर्द्विधानुवासाख्योनिरूहश्चततःपरं॰ यःस्नेहैर्दी
यतेसस्यादनुवासनसंज्ञितः॥ कषायैःक्षीरतैलैर्योनिरूहःसनिगद्यते॰ वस्तिभिर्दीयतेय
स्मात्तस्माद्वस्ति~~स्यादनुवासनाभिधाः॥ अ~~ रितिस्मृतः॥ तत्रानुवासनाख्योयोवस्तिःसोत्रानु
कीर्त्यते॰ पूर्वमेवततोवस्तिनिरूहाख्योभविष्यति॰ निरूहादुत्तरंचैववस्तिस्यादुत्तराभिधाः

अनुवासनमेहश्च मात्रावस्तिरुदीरितः ॥ पलद्वयं तस्य मात्रा तस्मादर्द्धापि भावयेत् ० अनुवासन
स्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली ० नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलतरोदरी ० नास्थाप्याना
नुवास्याः स्युर्जीर्णान्नारतउन्मादिताः ॥ शोषमूर्च्छारुचिभयश्वासकासक्षयातुराः ॥ नेत्रं कार्य्यं सुवर्णा
दिधातुभिर्वृक्षवेणुभिः ॥ नले दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते ० एकवर्षात्तु षड्वर्षं यावन्मानं ष
डंगुलं ० ततो द्वादशकं यावन्मानं स्याद्दष्टसंमितं ० ततः परं द्वादशभिरंगुलैर्नेत्रदीर्घता ० मुद्गच्छि
द्रं कलायाभं छिद्रं कोलास्थिरंध्रकं ० यथासंख्यं भवेन्नेत्रं श्लक्ष्णं गोपुच्छसन्निभं ० आतुरां
गुष्ठमानेन मूले स्थूलं विधीयते ० कनिष्ठिकापरीणाहमग्रे च गुटिकामुखं ० तन्मूले कर्णिके
द्वे च कार्य्ये भागेन्च तुर्थिकान् ० योजयेत्तत्र वस्तिं च बंधद्वयविधानतः ॥ मृगाजशूकरगवां
महिषस्यापि वा भवेत् · मूत्रकोशस्य वस्तिः स्यात्तदलाभे च चर्म्मजः ॥ कषायरक्तसुमृदुर्वस्ति
स्निग्धो दृढो हितः ॥ व्रणवस्तेस्तु नेत्रं स्यात् श्लक्ष्णमष्टांगुलोन्मितं ० मुद्गछिद्रं गृध्रपक्षनलि
कापरिणाहि च ० शरीरोपचयं वर्णबलमारोग्यमायुषः ॥ कुरुते परिवृद्धिं च वस्तिः सम्यगुपा
सितः ॥ दिवा शीते वसंते च स्नेहवस्तिः प्रदीयते ० ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनुवासनं ०

नचातिस्निग्धमशनंभोजयित्वानुवासयेत्० भ्रममूर्छांचजनयेद्द्विधास्नेहःप्रयोजिताः॥ हीनमा
त्रावुभौवस्तीनातिकार्यकरौस्मृतौ० अतिमात्रौतथानाहक्लमातीसारकारकौ० उत्तमस्यपलैः
षड्भिर्मध्यमस्यात्पलैस्त्रिभिः॥ पलंसार्द्धंनहीनस्युरुक्तामात्रानुवासने० शताह्वासैंधवाभ्यांच
देयंस्नेहेचचूर्णकं० तन्मात्रोत्तममध्यांताषट्चतुर्द्वयमाषकैः॥ विरेचनात्सप्तरात्रेगतेजातव
लायच० भुक्तान्नायानुवास्यायवस्तिर्देयोनुवासनः॥ अथानुवास्यंस्वभ्यक्तंउष्णांबुस्वेदितं
शनैः॥ भोजयित्वायथाशास्त्रंकृतचंक्रमणंततः॥ उत्सृष्टानिलविण्मूत्रंयोजयेत्स्नेहवस्ति
ना० सुप्तस्यवामपार्श्वेनवामजंघाप्रसारिणः॥ कुंचितापरजंघास्यनेत्रंस्निग्धेगुदेन्यसेत्
बध्वावस्तिमुखंसूत्रैर्वामहस्तेनधारयेत्० पीडयेद्दक्षिणेनैवमध्यवेगेनधीरधीः॥ जृंभा
कासक्षवादींश्चवस्तिकालेनकारयेत्० त्रिंशन्मात्रामितःकालःप्रोक्तोवस्तेस्तुपीडने
ततःप्रणिहितःस्नेहउत्तानेवाक्शतंभवेत्० प्रसारितैःसर्वगात्रैर्यथावीर्यंप्रसर्पति०
ताडयेत्तलयोरेनंत्रीन्स्त्रीन्वारान्शनैःशनैः॥ स्फिजोश्चैवंततःश्रोणिंशय्यांचैवोत्क्षिपे
त्ततः॥ जातेविधानेनुततःकुर्यान्निद्रांयथासुखं० सानिलःसपुरीषश्चस्नेहःप्रत्ये

तियस्यवै॰उपद्रवं विना चैव स सम्यगनुवासितः ॥ जीर्णान्नमथ सायाह्ने स्नेहे प्रत्यागते पुनः ॥
लघ्वन्नं भोजयेत्कामं दीप्ताग्निस्तु नरो यदि॰ अनुवासिताय दातव्यमितरेह्नि सुखोदकं॰ धान्यशुंठी
कषायं वा स्नेहव्यापत्तिनाशनं॰ अनेन विधिना षड्वा सप्त वाष्टौ नवापि वा॰ विधेया वस्तयस्तेषाम
न्ते चैव निरूहणं॰ अथवा यस्य तत्कालं स्नेहो निर्याति केवलः ॥ तस्यान्योल्पतनो देयो नहि स्निग्ध
श्चतिष्ठति॰ अशुद्धस्य मलोन्मिश्रः स्नेहो नैति यदा पुनः ॥ तदांगशिथिलाध्मानं शूलं श्वासश्च जा
यते॰ पक्वाशयगुरुत्वं च तत्र दद्यान्निरूहणं॰ तीक्ष्णं तीक्ष्णौषधैर्युक्तं फलवर्ति हितापि वा॰ यथा
नुलोमनं वायोर्मलं स्नेहश्च जायते॰ तथा विरेचनं ▪ दद्यात्तीक्ष्णं नस्यं च शस्यते॰ यस्य नोपद्रवं
कुर्यात्स्नेहवस्तिरनिस्सृतः ॥ सर्वोस्यो वा वृतो रौक्ष्यादुपेक्ष्यः स विजानता॰ अनुयातं त्वहोरा
त्रात्स्नेहं संशोधनैर्हरेत्॰ स्नेहवस्तौ चनायातेन्यान्यः स्नेहो विधीयते॰ गुडूच्यैरंडपूतीकभार्गी
वृषकरोहिषं॰ शतावरी सहचरं काकनासा पलोन्मिताः ॥ यवमाषातसीकोलकुलत्थान्प्रसृतो
न्मितान्॰ चतुर्द्रोणेंभसः पक्त्वा द्रोणशेषेण तेन च॰ पचेत्तैलाढकं पिष्टैर्जीवनीयैः पलोन्मितैः ॥
अनुवासनमेतद्धि सर्ववातविकारनुत्॰ षट्सप्ततिर्व्यापदस्तु जायंते वस्तिकर्मणि॰ दूषिताः

समुदायेन ताश्चिकित्स्याश्च सुश्रुतात्० पानाहारविहारश्च परिहारश्च कृत्स्नशः॥ स्नेहपान
समाः कार्य्या नात्र कार्य्या विचारणा० इति शार्ङ्गधरे स्नेहबस्तिरध्यायः॥ अथ निरूहबस्तिविधिः
॥ निरूहबस्तिर्बहुधा भिद्यते कारणान्तरैः॥ तैरेव तस्य नामानि कृतानि मुनिपुंगवैः॥ निरूह
स्यापरं नाम प्रोक्तमास्थापनं बुधैः॥ स्वस्थाने स्थापनाद्दोषधातूनां स्थापनं मतं० निरूह
स्य प्रमाणं च प्रस्थं पादोत्तरं परं० मध्यमं प्रस्थमुद्दिष्टं हीनं च कुडवास्त्रयः॥ अतिस्निग्धोत्क्लिष्ट
दोषः क्षतोरस्कः कृशस्तथा० आध्मानछर्दिहिक्कार्शःकासश्वासप्रपीडितः॥ गुदशोफातिसा
रार्त्तो विषूचीकुष्ठसंयुतो॥ गर्भिणी मधुमेही च नास्थाप्याश्च जलोदरी० वातव्याधावुदावर्त्ते
वातासृग्विषमज्वरे० मूर्छातृष्णोदरानाहमूत्रकृछ्राश्मरीषु च० वृध्यसृग्दरमंदाग्निप्रमेहेषु नि
रूहणं० शूलेम्लपित्ते हृद्रोगे योजयेद्विधिवद्बुधः॥ उत्सृष्टानिलविण्मूत्रं स्निग्धं स्विन्नमभोज
नं० मध्यान्हे गृहमध्ये च यथायोग्यं निरूहयेत्० स्नेहबस्तिविधानेन बुधः कुर्य्यान्निरूहणं०
जाते निरूहे च ततो भवेदुत्कटकासनः॥ तिष्ठेन्मुहूर्त्तमात्रं च निरूहागमनेच्छया० अनायाते ना
मुहूर्त्तात्तु निरूहं शोधनैर्हरेत्० निरूहैरेव मतिमान् क्षारमूत्राम्लसैंधवैः॥ यस्य क्रमेण

गच्छति विट्पित्तकफवायवः ॥ आद्यं वं चोपजायेत सुनिरूहं तमादिशेत् ॰ यस्य स्याद्वस्तिरस्याल्पवे
गो हीनमलोनिलः ॥ मूत्रार्त्तिजाड्यारुचिमान् दुर्निरूहं तमादिशेत् ॰ विविक्तता मनस्तुष्टिः स्निग्धता व्याधि
निग्रहः ॥ आस्थापनस्नेहवस्त्योः सम्यग्दाने तु लक्षणं ॰ अनेन विधिना युंज्यान्निरूहं वस्तिदानवित् द्वि
तीयं वा तृतीयं वा चतुर्थं वा यथोचितं ॰ सस्नेहस्कः पवने पित्ते दो पयसा सह ॰ कषायकटुमूत्राद्यः कफे त
स्याः त्रयो हिताः ॥ पित्तश्लेष्मानिलाविष्टं क्षीरयूषरसैः क्रमात् ॰ निरूहं भोजयित्वा च ततस्तमनुवास
येत् ॰ सुकुमारस्य वृद्धस्य बालस्य च मृदुः स्मृतः ॥ वस्तिं तीक्ष्णः प्रयुक्तो वा तेषां हन्याद्बलायुषी ॰ एरण्ड
ल्क्लेशनं सर्वं मुष्णेदो बलतरं ततः ॥ पश्चात्संशमनीयं च दद्याद्वस्तिं विचक्षणः ॥ एरंडबीजं मधुकं पिप्पली
सैंधवं वचा ॰ हबुषाफलकल्कैश्च वस्तिरुत्क्लेशनः स्मृतः ॥ उत्क्लेशनवस्तिः ॥ शताह्वा मधुकं बिल्वं कौ
टजं फलमेव च ॰ सकांजिकः सगोमूत्रः वस्तिर्दोषहरः स्मृतः ॥ दोषहरावस्तिः ॥ प्रियंगु मधुकं मुस्ता
तथैव च रसांजनं ॰ सक्षीरः शस्यते वस्तिर्दोषाणां शमनं स्मृतं ॰ संशमनवस्तिः ॥ त्रिफलाक्वाथगो
मूत्रक्षौद्रक्षारसमायुताः ॥ ऊषादिप्रतिवापास्तु वस्तयो लेखनाः स्मृताः ॥ लेखनावस्तयः ॥ बृंह
णद्रव्यनिः क्वाथैः कल्कैर्मधुरकैर्युताः ॥ सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः ॥ बृंहनवस्तयः ॥

शा॰५ पे २५

वदर्य्यैरावती शेलुशाल्मली धन्वनागराः॥ क्षीरसिद्धाः स्योऽद्भुक्ता नाम्ना पिच्छिलसंज्ञिताः॥ स्र
जो रक्तेरणरुधिरेऽडुक्तादयाविवच्चाणे॥ मात्रा पिच्छिलवस्तीनां पले द्वादशभिर्मिताः॥ पिच्छिलवस्तयः
दत्वादौ सैंधवस्याक्षं मधुनः प्रसृतिद्वयं॰ विनिर्मथ्य ततो दद्यात्स्नेहस्य प्रसृतित्रयं॰ एकीभूते ततः स्ने
हे कल्कस्य प्रसृतिं क्षिपेत्॰ संमूर्छितं कषायं तु चतुःप्रसृतिसंयुतं॰ क्षिप्त्वा विमथ्य दद्याद्धि निरूहं कुश
लो भिषक्॰ एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतो भवेत्॰ वाते चतुःपलं क्षौद्रं क्षिपेत्स्नेहस्य षट्पलं॰ पित्ते
चतुःपलं क्षौद्रं दद्यात्स्नेहपलत्रयं॰ कफे च षट्पलं क्षौद्रं दद्यात्स्नेहं चतुःपलं॰ इति निरूहमात्राविधिः॥
एरंडक्वाथतुल्यांश मधुतैलपलाष्टकं॰ शतपुष्पपलार्द्धेन सैंधवार्द्धेन संयुतं॰ मधुतैलक संज्ञोयं वस्ति
र्वीजी विलोडितः॥ मेदोगुल्मकृमिप्लीहमेदोदावर्त्तनाशनः॥ बलवर्णकरश्चैव वृष्योदीपनबृंहणः॥
मधुतैलवस्तिः॥ क्वाथाज्यक्षीरतैलानां प्रसृतिः प्रसृतिर्भवेत्॰ हबुषासैंधवान्तांशो वै वस्तिः स्या
द्यापनः परः॥ यापनवस्तिः॥ एरंडमूलनिःक्वाथो मधुतैलससैंधवं॰ षड्पुष्पकल्कयोवस्तिः सवचा
पिप्पलीफलं॰ युक्तरथवस्तिः॥ पंचमूलस्य निःक्वाथः तैलं मागधिका मधु॥ ससैंधवः समधुकः सिद्ध
वस्तिरिति स्मृतः॥ सिद्धवस्तिः॥ स्नानमुष्णोदकेः कुर्याद्दिवास्वप्नमजीर्णतां॰ वर्जयेद्यपरं सर्वमा

र्षिकी॰ तदूर्द्ध पलमात्रा च स्नेहस्योक्ता भिषग्वरैः॥ अथास्थापनशुद्धस्य तस्य स्नानभोजने॥ स्थितस्य जानुमात्रे

चरेत्स्नेहवस्तिवत्॰ इति शार्ङ्गधरे विनिरूहवस्तिविधिरध्यायः॥ अतः परमुत्तरवस्तिः॥ अतः परं
प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितं॰ द्वादशांगुलकं नेत्रं मध्ये च कृतकर्णिकं॰ मालतीपुष्पवृन्ताभं छिद्रं सर्ष
पसन्निभम्॰ पंचविंशतिवर्षाणां मध्यमात्रा द्विकात्रे च पीठेन्विष्य शलायका॰ स्निग्धया मेढ्रमा
र्गं च ततो नेत्रं नियोजयेत्॰ शनैः शनैर्घृताभ्यक्तं मेढ्ररंध्रे गुलानि षट्॰ ततो वपीडयेद्वस्तिं श
नैर्नेत्रं च निर्हरेत्॰ ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः॥ स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्या
द्दशांगुलं॰ मुद्गप्रवेशं च योन्यन्तश्चतुरंगुलं॰ द्व्यंगुलं मूत्रमार्गे च सूक्ष्मं नेत्रं नियोजयेत्॰
मूत्रकृच्छ्रविकारेषु बालानामेकमंगुलं॰ शनैर्निष्कंपमाधेयं सूक्ष्मं नेत्रं विचक्षणैः॥ योनिमार्गेषु
नारीणां स्नेहमात्रा द्विपालिकी॰ मूत्रमार्गे पलोन्मानं बालानां चैव कार्षिकी॰ उत्तानायै स्त्रियै देह
घा ऊर्ध्वजान्वै विचक्षणः॥ अप्रत्यागच्छति भिषग्वस्तावुत्तरसंज्ञिते॰ भूयो वस्तिं निदध्याच्च संयुक्तं
शोधनैर्गणैः॥ फलवर्त्तिं निदध्याच्च योनिमार्गे दृढं भिषक्॰ सूत्रैर्विनिर्मितां स्निग्धां शोधनद्रव्य
संयुतां॰ दृश्यमाने तथा वस्तौ रोधयेद्वस्तिविशारदः॥ क्षीरीवृक्षकषायेण पयसा शीतलेन च॰ व
स्तिशुक्ररुजः शंसा स्त्रीणामार्त्तवजां रुजां॰ हन्यादुत्तरवस्तिस्तु नाविनो मीहनो क्वचितः॰ सम्य
ग्दत्तस्य लिंगानि व्यापदः क्रमश्च॰ वस्तेरुत्तरसंज्ञस्य समानानि स्नेहवस्तिना॰ घृताभ्यक्ते ग

श्रीरामं
शा० ध० ७६

हेन्ते प्याम्लेहृणा स्वाऽच्छा सन्निभाः ॥ मलप्रवर्त्तिनी पत्तिः फलवर्त्तिश्च सा स्मृता ॥ इति फलवर्त्तिः ॥ इति
शार्ङ्गधरे बस्तिविधिरध्यायः ॥ अथ नस्यविधिः ॥ नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं यदौषधं ॥ नावनं न
स्यकर्मेति तस्य नामद्वयं मतं ॥ तस्य भेदो द्विधा प्रोक्तो रेचनं स्नेहनं तथा ॥ रेचनं कर्षणं प्रोक्तं स्नेहनं
वृंहणं मतं ॥ कफपित्तानिलध्वंसे पूर्वमध्यापराह्णके ॥ दिनस्य गृह्यते नस्यं रात्रावत्युत्कटे गदे ॥
नस्यं त्यजेद्भोजनान्ते दुर्दिने चापतर्प्पिते ॥ तथा नवप्रतिश्यायी गर्भिणी गरदूषितः ॥
अजीर्णी दत्तबस्तिश्च पीतस्नेहोदकासवः ॥ क्रोधशोकाभिभूतश्च तृषार्त्तो वृद्धबालकौ ॥ वेगा
वरोधी स्नातश्च स्नातुकामश्च वर्जयेत् ॥ अष्टवर्षस्य बालस्य नस्यकर्म समाचरेत् ॥ अशीति
वर्षादूर्ध्वं च नावनं नैव दीयते ॥ अथ वैरेचनं नस्यं ग्राह्यं तैलैः सुतीक्ष्णकैः ॥ तीक्ष्णभेषजसिद्धैर्वा
स्नेहक्वाथैरसैस्तथा ॥ नासिकारंध्रयोरष्टौ षड्द्वौ वा बिंदवः ॥ प्रत्येकं रेचनं योज्यं मुख्यमध्यांतमा
त्रया ॥ नस्यकर्मणि दातव्यं शाणैकं तीक्ष्णमौषधं ॥ हिंगु स्याद्यवमात्रं तु माषैकं सैंधवं मतं ॥ क्षीरं
चैवाष्टशाणं स्यात्पानीयं च त्रिकार्षिकं ॥ कार्षिकं मधुरद्रव्यं नस्यकर्मणि योजयेत् ॥ अवपीडः प्रध
मनं द्वौ भेदावपरौ मतौ ॥ शिरोविरेचनस्यात्रैतौ च देयौ यथायथं ॥ कल्कीकृतादौषधाद्यः पीडितो
निःसृतो रसः ॥ सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः ॥ षडंगुला द्विवक्त्रा या नाडी चूर्णं तया धमेत् ॥

तीक्ष्णं कोष्णलमितं वक्ष्ये वाते: प्रधमनं रितत्. ऊर्ध्वजत्रुगते रोगे कफजे स्वरसंक्षये. अरोचके प्र
तिश्याये शिर:शूले च पीनसे. शोफापस्मारकुष्ठेषु नस्यं वैरेचनं हितं. भीरुस्त्रीकृशबालानां
नस्यं स्नेहेन सस्यते. गलरोगे सन्निपाते निद्रायां विषमज्वरे. मनोविकारे कृमिषु युज्यते
चावपीडनं. अत्यंतोत्कटदोषेषु विसंज्ञेषु च दीयते. चूर्णं प्रधमनं धीरै: स्तद्धि तीक्ष्णतरं य
त:। नस्यं स्यात् गुडशुंठीभ्यां पिप्पल्या सैंधवेन वा. जलपिष्टेन तेनाह्नि कर्णनाशाशिरोग
दा:। मन्याहनुगलोद्भूता: नश्यंति भुजपृष्ठजा:। मधूकसारकृष्णाभ्यां वचा मरिच सैंधवै:।
नस्यं कोष्णजलै: पिष्टं कुर्यात्संज्ञाप्रबोधनं. अपस्मारतमोन्मादसन्निपातेऽपतंत्रके.
सैंधवं श्वेतमरिचं सर्षप: कुष्ठमेव च. बस्तमूत्रेण संपिष्टं नस्यं तंद्रानिवारणं. रोहित
स्य च पित्तेन भावितं मरिचं वचा. कट्फलं चैव तच्चूर्णं हयं संज्ञाप्रबोधनं. अथ बृंहणन
स्यस्य कथ्यते ऽधुना. मर्शश्च प्रतिमर्शश्च द्वाभेदौ स्नेहने मतौ. मर्शस्य तर्पणी
मात्रा स्यात् अष्टौ शाणा: स्मृता बुधै:। मध्यमा च चतु:शाणा हीना शाणमिता स्मृता. तंत्रांतरे
पि मात्रा कथिता. नस्यस्य स्नेहकस्यापि द्वेया: षोडशबिंदव:। शुक्तिश्च पाणिशुक्तिश्च

मात्रा स्निग्धस्य कीर्तिता। एकैकस्मिंस्तु मात्रेयं हेया नासापुटे बुधैः। मर्शस्यापि त्रिधेत्सां वा
यीन्द्स दोषबलाबलं। एकांतरं द्व्यंतरं वा नस्यं दद्याद्विचक्षणः। अल्पं चापरमप्येवा सप्ताहं वा प्रयोजि
तं॥ मर्शः शिरोविरेके च व्यापदो विविधाः स्मृताः। दोषोत्क्लेशात्क्षयाच्चैव विज्ञेयास्ताय या क्रमं। दोषो
त्क्लेशनिमित्ताश्च युंज्याद्वमनशोधनं। क्षयनिमित्ताश्च यथास्वं बृंहणं मतं। शिरोनाशा
क्षिरोगेषु सूर्यावर्तार्द्धभेदके। दंतरोगे [illegible] बले हीने मन्याकर्णशिरोगदे। मुखशोषे कर्णनादे
वातपित्तगदे तथा। अकालपलिते चैव केशश्मश्रुप्रपातने। युज्यते बृंहणं नस्यं स्नेहैर्वा मधुर
द्रवैः। बृंहणं नस्यं च यथा सशर्करं पयः। पिष्ट्वा च माज्येन कुंकुमस्य। नस्यप्रयोगतो हन्याद्वातरक्त
भवाः रुजाः। भ्रूशंखाक्षिशिरःकर्णसूर्यावर्तार्द्धभेदकान्। नस्यं स्याद्धतैलेन तथा नारायणे
न च। माषबाहिना वा सर्पिर्भिस्तत्तद्व्यजसाधितैः। तैलं कफे स्याद्वाते च केवलं पवने वसा। दद्या
न्नस्यं सदा पित्ते सर्पिर्मज्जानमेव च। माषबालनामारास्नाभिर्वला गंधर्वरोहिषैः॥ लतोशुगंधा
गंधा कोष्ठस्तुर्हिंगु सैंधवसंयुतः॥ कोष्णनस्य प्रयोगेण पक्षाघातं सकंपनं। जयेदर्दितवातं
च मन्यास्तंभावबाहुको॥ प्रतिमर्शस्य मात्रा तु द्विद्विबिंदुमिता मता॥ प्रत्येकशो नासिकयोः

स्नेहेनैति विनिश्चितं॰ स्नेहेग्रेपिद्वयं यावन्निमग्नं चोद्धतात्तु ॥ तर्जन्या यं स्रवेद्विंदुसा मात्राविंदुसंज्ञिता॰ स
वं विधैर्विंदुसंज्ञैरष्टभिर्विंदुकस्तथा॰ समयाः प्रतिमर्शस्य बुधैः प्रोक्तास्चतुर्दश॰ प्रभाते दंतकाष्ठांते गृहान्निर्गमने
तथा॰ व्यायामाध्वव्यवायान्ते विरामूत्रांतेजनेकृते॰ कवलान्ते भोजनान्ते दिवास्वप्नोत्थिते तथा॰ वमनान्ते तथा सायं
प्रतिमर्शः प्रयुज्यते॰ ई बदुच्छिकनात्स्नेहो यदा वक्त्रं प्रपद्यते॰ नस्ये निषिक्तं तं विद्यात्प्रतिमर्शः प्रमाणतः ॥ उच्छिष्टं नपि
वेच्चैनं निष्ठीवन्मुखमागतम्॰ न्हीणेतस्मात्स्यप्रोषार्त्तबालवृद्धे प्रयुज्यते॰ प्रतिमर्शो नशाम्यंति शिरोगाश्चैवोर्ध्वजत्रु
गाः॥ वलीपलितनाशश्च वत्समिंद्रियजं भवेत्॰ विनीतनिम्बका गारी शिवा श्लेष्मश्च कारिणी॰ एकैके तैलनस्ये
न पलितं नश्यति ध्रुवं॰ अथ नस्यविधिं वक्ष्ये नस्यग्रहणहेतवे॰ देशे वातरजोमुक्ते कृतदंतनिघर्षणं॰ विशुद्धधू
मपानेन स्विन्नभालगले तथा॰ उत्तानं शायितं किंचित्प्रलंबशिरसं नरं॰ आस्तीर्णे तस्तपादं च वस्त्राच्छादित
लोचनं॰ समुन्नमितनासाग्रं वैद्यो नस्ये नियोजयेत्॰ कोष्णेनाच्छिन्नधारेण हेमताराद्धिशुक्तिभिः॥ शुक्त्या वा
वा पत्रशुक्त्या वा प्रोतैर्वा नस्यमाचरेत्॰ नस्ये चासिच्यमाने तु शिरो नैव प्रकंपनं॰ न प्रकुप्येन्न भाषेत नोच्छि
द्रं न हसेत्तथा॰ एते हि विहितः स्नेहो नैवांतः संप्रपद्यते॰ ततः कासप्रतिश्यायशिरोक्षिगदसंभवः॥ शृंगाटकम
भिप्लाव्यस्यापये वर्त्मि लेद्रवं॰ पंचसप्तदशैव स्युर्मात्रा नस्यस्य धारणे॰ उपविश्याथ निष्ठीवेन्नासावक्त्रगतं द्र
वं॰ वामदक्षिणपार्श्वाभ्यां निष्ठीवेन्मुखं न हि॰ नीते नस्ये मनस्तापं रजः क्रोधं च संत्यजेत्॰ शायीत निश्चात्य

ष्काच प्रोत्तानो वा कृ सतंनरः ।। तथैव रेचनं नस्यं पाते धूमो वा कवलो हितः ।। नस्यत्रीएयपादिकानि लक्षणानि प्रयोग
तः ।। शुद्धहीनातियोगानि विशेषाच्छास्त्रचिंतकैः ।। लाघवं मनसः शुद्धिः श्रोतसां व्याधिसंक्षयं । चित्तेंद्रियप्रसा
दश्च शिरसः शुद्धिलक्षणं । कंडूपदेहौ गुरुताश्रोतसां कफसंश्रवः ।। मूर्द्ध्नि हीनविशुद्धे तु लक्षणं परिकीर्तितं ।
मस्तुलुंगागमो वातवृद्धिरिंद्रियविभ्रमः ।। शून्यता शिरसश्चापि मूर्द्धि गाढविरेचने । कफः प्रसेकः शिरसो गुरु
तेंद्रियविभ्रमः ।। लक्षणं तदतिस्निग्धे तत्र तुक्ष्णं च हापयेत् । भोजयेच्चानभिष्यंदि नस्यवातिक्रमात् दिशेत् । वमनं
नस्यंति रूक्षश्चानुवासनं । एतानि पंच कर्माणि कथितानि मुनीश्वरैः ।। इति शार्ङ्गधरे नस्यविधिरध्यायः ।। अथ
धूमपानविधिरारभ्यते । धूमस्तु षड्विधः प्रोक्तः शमनो बृंहणस्तथा । रेचनः कासहा चैव वमनो व्रणधूपनः ।।
शमनस्य तु पर्यायो मध्यमः प्रायोगिकस्तथा । रेचनस्यापि पर्यायो शोधनस्तीक्ष्ण उच्यते । अधूमार्तश्च खल्वेते
श्रांतो भीतश्च दुःखितः ।। गृबस्ति विरक्तश्च रात्रौ जागरितस्तथा । पिपासितश्च दाहार्त्तो स्तालुशोषी तथो
दरी । शिरोभितापी तिमिरी छर्द्याध्मानप्रपीडितः ।। क्षतोरस्कः प्रमेहार्त्तः पांडुरोगी च गर्भिणी । रूक्षः
क्षीणोभ्यवहृतः क्षीरक्षौद्रघृतासवः ।। भुक्तान्नदधिमत्स्याश्च बालो वृद्धः कृशस्तथा । अकाले चाति
पीतश्च धूमः कुर्यादुपद्रवान् ।। तत्रेष्टं सर्पिषः पानं नावनांजनतर्पणं । सर्पिरिक्षुरसं द्राक्षां पयो वा श

कैरांबुना ॰ मधुराम्लोरसोवापिवमनायप्रदापयेत् ॰ धूमस्तुद्वादशाद्वर्षाद्दृश्यतेशीतिकान्नहि ॰ कासश्वासप्र
तिश्यायमन्यात्हनुशिरोरुजः॥ वातश्लेष्मविकारांश्चहन्याद्धूमःसुयोजितः॥ धूमोपयोगात्पुरुषःसन्नेंद्रियवाग्मनः। दृढ
केशद्विजश्मश्रुःसुगंधिवदनोभवेत् ॰ धूमनाडीभवेत्तत्रत्रिखंडाचत्रिपर्विका ॰ कनिष्ठिकापरीणाहराजमाषागमांत
रा ॰ धूमनाडीभवेद्दीर्घाशमनारोगिणोंगुलैः॥ चत्वारिंशन्मितेस्तद्द्वात्रिंशद्भिर्हिमता ॰ तीक्ष्णाचचतुर्विंशति
भिःकासघ्नेषाउशोन्मितेः॥ दशांगुलैर्वानमीयेतस्याद्व्रणनाडिका ॰ कलायमंडलस्थूलाकुलत्थागमरंध्रका ॰ अथै
षीकांप्रलिपेच्चतुलदलंद्वादशांगुलं ॰ धूमद्रव्यस्यकल्केनलेपश्चाष्टांगुलःस्मृतः॥ कल्कंकर्षमितंलिप्ताछाया
शुष्कंचकारयेत् ॰ इषीकामपनीयाथस्नेहाक्तांवर्तिमादरात् ॰ अंगारैर्दीपितांकृत्वाधृत्वानेत्रस्यरंध्रके ॰ वद
नेनपिबेद्धूमंवदनेनैवसंत्यजेत्। नासिकाभ्यांततःपीत्वामुखेनैववमेत्सुधीः। शरावसंपुटच्छिद्रेवात्क
ल्कमंगारदीपितं ॰ छिद्रेनेत्रंनिवेश्यापिव्रणंतेनैवधूपयेत् ॰ इत्यादिकल्कंशमनेस्निग्धस्तुजैरसंयुतैः ॰ रेच
नेतीक्ष्णाकल्कंचकासघ्नेनघ्नेदकोषणं ॰ वामनेस्नायुचर्मीघंदघाद्धूमस्यपानकं ॰ व्रणेनिंबवचाघंचधूमनंसंप्रश
स्यते ॰ अन्येपिधूपायोगेषुकर्तव्यारोगशांतये ॰ सर्षपा ॰ मयूरपिच्छं निम्बस्यपत्राणिवृहतीफलं ॰ मरिचंहिंगु
मांसीचवीजंकर्पाससंभवं ॰ छागरोमाहिनिर्मोकं विष्ठावैडालिकीतथा ॰ गजदंतश्चचूर्णंकिंचिद्घृतविमिश्रितं ॰ जोदेषु
धूपनंदत्तंसर्वान्बालग्रहान्जयेत् ॰ पिशाचान्राक्षसान्जित्वासर्वज्वरहरंभवेत् ॰ अपराजिताधूपः। परिहार

स्तुधूपेषु कार्य्यो रेचनं नस्यवत० नेत्राणि धातुजान्याहुर्नत्वं शारिजान्यपि० इति शार्ङ्गधरे धूमपानविधिरध्या
यः ॥ अथ गंडूषकवलप्रतिसारणविधिः ॥ चतुर्विधश्च गंडूषः स्नेहनः शमनस्तथा० शोधनो रोपणश्चैव कवल
श्चापि तद्विधः ॥ स्निग्धोष्णैः स्नेहिकैर्वाते स्वादुशीतैः प्रसादनः ॥ पित्ते कट्वम्ललवणै रूक्षैः संशोधितः कफे० कषा
यतिक्तमधुरैः कटूष्णै रोपणो व्रणे० चतुःप्रकारो गंडूषः कवलश्चापि कीर्तितः ॥ असंचारी मुखे पूर्णे गंडूषो
कवलश्चलः ॥ तत्र द्रवेण गंडूषः कल्केन कवलः स्मृतः ॥ द्रवो द्रवेषु चूर्णैर्वा गंडूषे कोलमात्रकं० कर्षप्रमाणं कल्कश्च
कवलैर्दीयते बुधैः ॥ धार्य्यस्ते पंचमाद्वर्षी गंडूषकवलादयः ॥ गंडूषो लुस्पितं कुर्य्यात् स्विन्नभालगलादिकः ॥
मनुष्यस्त्रीन् तथा पंच सप्त वा दोषनाशनात्० कफपूर्णास्यता यावत् छेदो दोषस्य वा भवेत्० नेत्रघ्राण
श्रुति यावत्तावद्गंडूषधारणं० तिलकल्कोदकं क्षीरं स्नेहो वा स्नेहिके हितं० तिलानीलोत्पलं सर्पिः शर्करा क्षीरमे
वच० सक्षौद्रो दग्धवक्त्रस्य गंडूषो दाहनाशनः ॥ वैशद्यं जनयत्यास्ये संदधाति मुखव्रणान्० दाहतृष्णाप्रश
मनं मधुगंडूषधारणं० विषक्षाराग्निदग्धे च सर्प्पिर्धार्य्यं पयोप्यवा० तिलसैंधवगंडूषो दंतचाले प्रश
स्यते० शोषं मुखवैरस्यं गंडूषः कांजिको जयेत्० सिंधुत्रिकटुकाराजीभिः रक्तिके न कफे हिते ॥ त्रिफला मधुगं
डूषः कफास्रपित्तनाशनः ॥ दार्वीगडूची त्रिफला द्राक्षा जाती पाश्वपल्लवाः ॥ यवासश्चेति तत्क्वाथः बल्काश
न्हौद्रसंयुतः ॥ शीतो मुखे धृतो हन्यान्मुखपाकं त्रिदोषजं० यस्यौषधस्य गंडूषस्तस्यैव प्रतिसारणं० कवल

श्चापित्तस्यैव ज्ञेयो ऽत्र कुशलैर्नरैः॥ कवलांतरं यथा॰ केसरं मातुलुंगस्य सैंधवोषणसंयुतं॰ स्यात्कवलत्तोजाड्यमरु
चिकफवातजे॰ कल्कोवलेहश्चूर्णं च त्रिविधं प्रतिसारणं॰ अंगुल्यग्रगृहीतं च यथा संमुखरोगिणां॰ प्रतिसारणं चूर्णं॰
हरिद्रा३ कुष्ठं हार्वीसमंगा पाठातिक्ता च पीतिका॰ तेजनी मुस्तलोध्रं च चूर्णं स्यात्प्रतिसारणं॰ रक्तस्रुतिं दंतपीडां शोथं दाहं च
नाशयेत्॰ हीनयोगात्कफोत्क्लेशो रसाज्ञानारुची तथा॰ अतियोगान्मुखे पाकः शोषतृट्स्याल्कमोभवेत्॰ व्याधेरप
चयस्तुष्टिर्वैशद्यं वक्त्रलाघवं॰ इंद्रियाणां प्रसादश्च गंडूषे शुद्धिलक्षणं॰ इतिश्रीशार्ङ्गधरे गंडूषाविधिरध्यायः॥ अथ
लेपमूर्द्धतैलकर्णपूरणविधिः॥ अथ लेपस्य नामानि लिप्तानियश्च लेपनं॰ दोषघ्नो विषहा वर्ण्यश्च मुखलेप
स्त्रिधा मतः॥ त्रिप्रमाणश्चतुर्भागत्रिभागार्द्धांगुलोन्नतः॥ आर्द्रो व्याधिहरः स स्याच्छुष्को दूषयति छविम्॰ दोष
कांजिने १:८ घ्नो लेपमाह यथा॰ पुनर्नवादारुशुंठीसिद्धार्थशिग्रुमेव च॰ पिष्ट्वा च वारनालेन लेपः सर्वशोफजित्॰ विभीतफल
मज्जस्तु लेपो दाहार्तिनाशनः॥ शिरीषं मधुयष्टी च तगरं रक्तचंदनं॰ एलामांसीनिशायुग्मं कुष्ठं वालकमेव च॰
इति संचूर्ण्य लेपोयं पंचमांशाज्यसंयुतं॰ जलेन क्रियते सुज्ञैर्दशांग इति संज्ञितः॰ विसर्पान्विषविस्फोटान्शोफान्
दुष्टव्रणान्जयेत्॰ विषहालेपो यथा॰ भल्लातकोपामः॥ अजादुग्धतिलैर्लेपो नवनीतेन संयुतः॥ शोफमारुष्करं हं
ति लेपो वा कुलसम्यत्तिलैः॥ लांगल्यातिविषालीं देवजालिनी मूलबीजकैः॥ लेपो धान्याम्बुसंपिष्टः कीटविस्फोटनाशनः
वर्ण्यलेपो यथा॰ रक्तचंदनमंजिष्ठालोध्रकुष्ठप्रियंगवः॥ वटांकुरा मसूराश्च व्यंगघ्ना मुखकांतिदः॥ मातुलुं

गजदन्तसर्पिः शिलाशोशाल्कतोरसः। मुखकांतिकरो लेपः पिडकाव्यंगकीलजित्॰ लोध्रंधान्यवचालेपस्तारुणप
पिडकापह४ तद्वद्गोरोचनायुक्तं मरिचं मुखलेपनात्॰ सिद्धार्थकवचालोध्रसैंधवैश्च प्रलेपनं॰ व्यंगेषु चार्जु
नत्वग्वामाजिष्ठावा समान्विफा॰ लेपः सनवनीतो वा श्वेताश्वखुरजामपि॰ अर्कक्षीरहरिद्राभ्यां मर्द्दयित्वा
विलेपनात्॰ मुखकार्ष्ण्यं शमं याति रक्तालोम्रवंधुवं॰ वटस्य पांडुपत्राणि मालती रक्तचंदनं॰ कुष्ठं कालीयकं
लोध्रमेभिर्लेपं प्रयोजयेत्॰ तारुणपिडकाव्यंगनीलिकादिविनाशनं॰ पुराणमपि पिण्याकं पुरीषं कुक्कुटस्य
च॰ मूत्रपिष्टः प्रलेपोयं शीघ्रं हन्यादरुंषिका॰ खदिरारिष्टजंवूनां त्वग्भिर्वा मूत्रसंयुतैः॥ कुटजत्वक्ससैंधवं

वानरीबीजं१ वालेपाद्धन्यादरुंषिकां॰ पिपालवीजं मधुकैः कुष्ठमाषैः ससैंधवैः। कार्प्पासफलके मूर्द्धि प्रलेपो मधुसंयुतः॥
दुग्धेन खरी खसंवीजं प्रलेपाद्दारुणं जयेत्॰ आम्रवीजस्य चूर्णन्तु शिवाचूर्णसमं ह्यः॰ दुग्धपिष्टप्रलेपोयं दा
रुणं हंति दारुणं॰ रसौस्तिक्तपटोलस्य पत्राणां तद्विलेपनात्॰ इन्द्रलुप्तं शमं याति त्रिभिरेव दिनैर्ध्रुवं॰ इन्द्रलुप्ता
पहो लेपो मधुना वृहतीरसः। गुंजामूलफलं वापि भल्लातकरसोपि वा॰ गोक्षुरस्तिलपुष्पाणि तुल्यं च म
धुसर्पिषा॰ शिरः प्रलेपनं तेन केशसंवर्द्धनं परं॰ हस्तिदंतमसीं कृत्वा छागदुग्धं रसांजनं॰ रोमाण्येतेन जा
यंते लेपात्पाणितलेष्वपि॰ यष्टीदीवरमद्वीकातिलाज्यक्षीरलेपनैः। इन्द्रलुप्तसमं याति केशाः स्युः स
घनाद्दृढाः। चतुःपहानां लग्नोमनखश्रृंगास्थिभस्मभिः। तैलेन सह लेपोयं रोमसंजननः परः॥ अयो

रजोभृंगराजस्त्रिफलाकृष्णमृत्तिका॰ स्थिरमिक्षुरसे मासं लेपनात्पलितं जयेत्॰ धात्रीफलद्वयं पथ्यात्पथ्येकं च विभीतकं॰
पंचाम्रमज्जा लोहस्य कर्षैकं च प्रदीयते॰ पिष्ट्वा लोहमये भांडे स्थापयेदुषितं निशि॰ लेपोयं हंति न चिरात् अकालपलितं
महत्॰ त्रिफलानीलिकापत्रं लोहं भृंगरजः समं॰ अजामूत्रेण संपिष्टं लेपात्कृष्णीकरं स्मृतं॰ त्रिफलालोहचूर्णं चव्य
ड़िमं त्वग्विशेतपा॰ प्रत्येकं पलिकं चूर्णं सर्वं कुर्याद्विचक्षणः। भृंगराजरसस्यापि प्रस्थषट्कं प्रदापयेत्॰ निःक्षिप्य लो
हमये पात्रे भूमिमध्ये निधापयेत्॰ मासमेकं ततः कुर्यात् छागीदुग्धेन लेपनं॰ कुर्वीत शिरसि रात्रौ च संवेष्ट्य एरंडपत्रकैः
स्वपेत्प्रातः ततः कुर्यात् स्नानं तेन च कुज्यते॰ पलितस्य विनाशश्च त्रिभिर्लेपैर्न संशयः। शंखचूर्णस्य भागौ द्वौ हरि
तालश्चैकभागिकः। मनःशिला चार्द्धभागा स्वर्जिका चैकभागिका॰ लेपोयं वारिपिष्टस्तु केशाणुन्नूपा प्रदी
यते। अनयालेपयुक्त्या च सप्तवारं प्रयुक्तया॰ निर्मूलकेशस्थानं स्यात् न्हापणस्य शिरो यथा॰ तालकं शा
णयुग्मं स्यात्षट्शाणं शंखचूर्णकं॰ द्विशाणिकं पलाशस्य क्षारं दत्वा च मर्द्दयेत्॰ कदल्याः कंदतोयेन रवि
पत्ररसेन च॰ अस्यापि सप्तभिर्लेपैर्लोमशातनमुत्तमं॰ सुवर्णपुष्पीकाशीशं विडंगानि मनःशिला॰ गोवत्स४
रोचना सैंधवं चैव लेपनं श्वित्रनाशनं॰ ~~अस्यापि सप्तभिर्ले~~ वायस्येडगजाकुष्ठलसाभिंडिटिकाल्हता॰ वत्समूत्रे
ण संपिष्टः प्रलेपात् श्वित्रनाशनं॰ तालकं शाणमात्रं स्यात् चतुःशाणा च वाकुची॰ गोमूत्रपिष्टं तच्चूर्णं लेपनात् श्वित्र
नाशनं॰ वाकुचीवेतसोलाम्लाकाकोडुम्बरिका कणा॰ रसांजनमयश्चूर्णं तिलाः हेमास्त्वेहैकतः। चूर्णयित्वा ग
वायसीकाकमाचीरसेगजाम्भस्नातः॰ तस्यवीजो निर्

(राल)

वांपित्तैः पिष्ट्वा च गुटिका कृतः ॥ अस्याः प्रलेपाच्छिन्नानि प्रशाम्यंत्याशु वेगतः ॥ धात्री सर्जरसश्चैव यवक्षा
रश्च चूर्णितः ॥ सौवीरेण प्रलेपोयं प्रयोज्यः सिध्मनाशने ॥ दर्वी मूलकबीजानि तालकः सुरदारु च ॥ ताम्बूल
पत्रं सर्वाणि कार्षिकानि पृथक् पृथक् ॥ शंखचूर्णं शाणमात्रं सर्वाण्येकत्र चूर्णयेत् ॥ लेपोयं वारिणा पिष्टः
सिध्मानां नाशनः परं ॥ हरीतकी सैंधवं च गैरिकं सरसांजनं ॥ विडालको जलापिष्टः सर्वनेत्रामयापहः ॥
रसांजनं व्योषयुतं संपिष्य वटकीकृतं ॥ कंडूपाकान्वितं हंति पांडुजनामिकं क्रमं ॥ प्रपुन्नाटस्य बीजानि वा
कुची सर्षपास्तिलाः ॥ कुष्ठं निशाद्वयं मुस्तं पिष्ट्वा तक्रेण चेत् कृतः ॥ प्रलेपा हस्मनश्येति कंडूदद्रुविचर्चिकां ॥ हे
मक्षीरी विडंगानि हरिद्रा गंधकस्तथा ॥ दद्रुघ्नः कुष्ठसिंदूरं सर्वाण्येकत्र मर्दयेत् ॥ धत्तूरनिंबताम्बूलपत्राणां
स्वरसः प्रपक्व ॥ अस्य त्रिलेपमात्रेण पामा दद्रुविचर्चिकाः ॥ कंडूव्रणरसोश्चैव प्रशामं याति वेगतः ॥
दूर्वाभया सैंधवं च चक्रमर्दः कुठेरकः ॥ रुमिस्तक्रयुतो लेपः कंडूदद्रुविनाशकः ॥ दूर्वानिशायुतो लेपः
कंडूपामाविनाशनः ॥ कृमिदद्रूहरश्चैव शीतपित्तापहः स्मृतः ॥ सिद्धार्थरजनीकुष्ठैः प्रपुन्नाटतिलैः
सह ॥ कटुतैलेन संमिश्रं दद्रुघ्नं लेपनं परं ॥ रास्नानीलोत्पलं दारु चंदनं मधुकं बला ॥ घृतक्षीरयुतो लेपो
वातवीसर्पनाशनः ॥ मृणालं चंदनं लोध्रमुशीरं कमलोत्पलं ॥ सारिवामलकी पथ्या लेपः पित्तविसर्पहा ॥

त्रिफला पद्मकोशीर समंगा करवीरकं । नलमूलमनंता च लेपः श्लेष्मविसर्पिणां ॥ मांसी सर्जरसो लोध्रं
मधुकं सहरेणुकं । मूर्वानीलोत्पलं पद्मं शिरीषकुष्ठमेःसह । प्रलेपः पित्तवातास्रेशातधौतघृतप्लुतः ॥ आ
मलकं घृते संभृष्टं पिष्टं कांजिकवारिभिः ॥ जयेन्मूर्द्धि प्रलेपेन रक्तं नासिकया श्रुतं । कुष्ठमेरंडतैलेन
लेपात्कांजिकपेषितं । शिरोर्त्तिं वातजां हन्यात्पुष्पं वा मुचुकुंदकं । देवदारुनतं कुष्ठं नलदं विश्वभेषजं । स
कांजिकस्नेहयुक्तो लेपो वातशिरोर्त्तिनुत् । चंदनोशीरयष्ट्याह्वबलाव्याघ्रनखोत्पलैः ॥ क्षीरपिष्टैः
प्रलेपः स्याद्दाहपित्तशिरोरुजः ॥ धात्रीकसेरुह्रीवेरपद्मपद्मकचंदनैः ॥ दूर्वोशीरनलानां च मूलैः
कुर्यात्प्रलेपनम् ॥ शिरोर्त्तिं पित्तजां हन्याद्दाहपित्तरुजं तथा । हरेणुतगरोशीलेयमुस्तैलागुरुदारुभिः ॥
मांसीरास्नारुबुकैश्च कोष्णो लेपः कफार्त्तिनुत् । शुंठी कुष्ठ प्रपुन्नाटदेवकाष्ठैः सरोहिषैः ॥ मूत्रपिष्टैः सुखो
ष्णैश्च लेपः श्लेष्मशिरोर्त्तिनुत् । सारिवा कुष्ठमधुकवचाकोष्णोत्पलैस्तथा । लेपः सकांजिकस्नेहः सू
र्य्यावर्त्तार्द्धभेदयोः ॥ वरीनीलोत्पलं दूर्वातिलाः कृष्णाः पुनर्नवा । शंखके ऽनंतवाते च लेपः सर्वशिरोर्त्तिनु
त् ॥ अथ लेपविधिश्चान्यः प्रोच्यते सुज्ञसंमतः । दोषघ्नस्य कपित्तोन्मे दो प्रलेपाख्यप्रदेहकौ । च मध्यमा
हिषंयदृक्षोन्नतं संमितस्तयोः ॥ शीतस्तनुर्विशोषी च प्रलेपः परिकीर्त्तितः ॥ आर्द्रो घनस्तथोष्णः स्या
त्प्रदेहः श्लेष्मवातहा । रामाभिमुखमीद्दयोः प्रलेपाख्यप्रदेहकौ । वीर्य्यसम्पत्कृशिशत्याक्षुनोमरूपैः

शिरामुखैः। न रात्रौ लेपनं कुर्यात्शुष्यमाणं न धारयेत्॰ शुष्यमाणमुपेक्षेत प्रदेहं पीडनं प्रति॰ तमसापि
हितो ह्यूष्मा रोमकूपमुखैः स्थितः। विना लेपेन निर्याति रात्रौ नालेपयेदतः॥ रात्रावपि प्रलेपा हि विधिः कार्य्यो
विचक्षणैः अपाकिशोथे गंभीरे रक्तश्लेष्मसमुद्भवे॰ आदौ शोथापहरे लेपे द्वितीये रक्तसेचनं। तृतीयश्चो
पनाहः स्याच्चतुर्थः पाटनक्रमः। पंचमः शोधनीयः स्यात्षष्ठो रोपण उच्यते॰ सप्तमो वर्ण्णकरणं प्रय
स्येते क्रमामताः। सर्षपा॰ बीजपूरजटा हिंग्वाहे वदारु महौषधं॰ रास्नाग्निमंथलेपोयं वातशोथविना
शनः। मधुकं चंदनं मूर्वा नलमूलं च पद्मकं॰ उशीरं वालकं पद्मं पित्तशोथे प्रलेपनं॰ हलसाप्ररा ग्णपिराप
कं शिग्रुत्वक् सिकता शिवा॰ मूत्रपिष्टः सुखोष्णोयं प्रदेहः श्लेष्मशोथहा॰ द्वे निशे चंदनं द्वे च शिवा दूर्वाप्र
नैर्नवा॰ उशीरं पद्मकं लोध्रं गैरिकं रसांजनं॰ आगंतुके रक्तके च शोथे कुर्यात्प्रलेपनं॰ शणमूलक
शिग्रूणां फलानि तिलसर्षपाः। सक्तवः किण्वमतसी प्रदेहः पाचनः स्मृतः। दंतीचित्रकमूलत्व
क् स्नुह्यर्कपयसा गुडः॥ भल्लातकास्थि कासीससैंधवैर्दारणः स्मृतः। चिरविल्वोग्निको दंतीचि
त्रको हयमारकः। कपोतकंक(काक)गृध्राणां मलं लेपेन दारणं॰ स्वर्जिका पावसूकाद्याः क्षारलेपेन दारणः
हेमक्षीर्यास्तथा लेपो व्रणे परमदारणः॥ तिलसैंधवयष्ट्याह्व निंबपत्रनिशायुगैः। त्रिवृद्धृतयुतैः पिष्टैः
प्रलेपो व्रणशोधनः। निंबपत्रघृतक्षौद्रदार्वीमधुकसंयुतः। तिलैश्च सह संयुक्तो लेपः शोधनरोपणः। करं

जारिष्टनिर्गुंडीलेपो रन्ध्रव्रणकृमीन्॰ लघुनस्याप्यबालेपो दिग्धनिंबधवोऽथवा। निम्बपत्रत्वचं दंतीरसतसैंधवमाक्षिकैः
दुष्टव्रणप्रशमनो लेपः शोधनरोपणः॰ मदनस्य फलं तिक्तं पिष्ट्वा कांजिकवारिणा॰ कोसांकुर्यान्नाभिलेपं शूलशांति
र्भवेत्ततः॥ शिग्रुमूलशालिकेरंडयवगोधूमकृष्णैः॥ सुखोष्णो वृद्धलेपोयं वातविद्रधौ॰ पैत्तिके सर्पिषा लाजा
मधुकैः शार्करान्वितैः॥ प्रलेपः क्षीरपिष्टैर्वा पयस्याशीरचंदनैः॥ इष्टिकासिकतालोहकिट्टंगोशकृता सह॰ सुखोष्णश्च
प्रदेहोयं मूत्रैः स्यात्श्लेष्मविद्रधौ॰ रक्तचंदनमंजिष्ठानिशामधुकगैरिकैः॥ न्योद्रणविद्रधौ लेपरक्तागंतुनिमित्तजे॰
जलवेतसः धनिचुलः शिग्रुबीजानि दशमूलसमं पिबा॰ प्रदेयो वातगंडेतु सुखोष्णः संप्रदीयते॰ देवदारुविशाला च कफगंडे प्रलेपकः
सर्षपारिष्टपत्राणि दग्धभल्लातकैः सह॰ छागमूत्रेण संपिष्टमपचीघ्नं प्रलेपनं॰ सर्षपाशिग्रुबीजानि शाणबीजातसी
यवाः॥ मूलकस्य च बीजानि तक्रेणाम्लेन पेषयेत्॰ गंडमालार्बुदग्रंथिर्लेपेनानेन शाम्यति॰ प्रहृयित्वाङ्कुरे एणांग
केवलानिलपीडितं॰ तत्र प्रदेहं दद्याच्चापि कृष्णगुंजाफलैः कृतं॰ तेनावबाहुजा पीडा विश्वाचीगृध्रसीतथा॰ अन्यापि
वातजा पीडा प्रशमं याति वेगतः॥ धत्तूरेरंडनिर्गुंडीवर्षाभूशिग्रुसर्षपैः॥ प्रलेपः श्लीपदं हंति चिरोत्थमपि दारुणं
अजाजीरुषाकुष्ठमेरंडवदरान्वितं॰ कांजिकेन तु संपिष्टं कुरंडघ्नं प्रलेपनं॰ करवीरस्य मूलेन परिपिष्टेन वारिणा॰
असाध्यापि व्रजत्यस्तं लिंगोत्था रुक्प्रलेपनात्॰ हरेलकादंतित्रिफला ताम्रभस्म मधुसंयुतं॰ उपदंशे प्रलेपोयं सद्यो
रोपयति व्रणं॰ रसांजनं शिरीषेण पथ्यया च समन्वितं॰ सक्षौद्रलेपनं योज्यमुपदंशगदापहं॰ चिंचिणीत्व

श्रीराम॰
शा॰ध॰ ८३

माकंदो सहकारः तस्य मूलं आम्रजटेत्यर्थः ३

गमखीचूर्णैमुपदंशहरं परं॰ अग्निदग्धेतुगान्धीरीत्वक्चंदनगैरिकैः॥ सामृतः सर्पिषास्निग्धैः प्रलेपं कारयेद्भिष
क्॰ तिंडत्वक्कं वा येर्वा घृतमिश्रैः प्रलेपयेत्॰ मवाहृष्टामखीकाथातैलेनघृतयातया॰ दग्धास्यवाग्निदग्धे प्रलेपे व्रण
रोपणं॰ पलाशोडुंबरिफलैस्तिलतैलसमन्वितैः॥ मधुना योनिमालिप्य गाढीकरणमुत्तमम्॰ माकंदमूलसंयुक्तं
मधुकर्पूरलेपनात्॰ गतेपियौवने स्त्रीणां योनिर्गाढाति जायते॰ मरिचं सैंधवं कृष्णा नागरं वृहतीफलं॰ अ
पामार्गस्तिलाः कुष्ठं यव माषाश्च सर्षपाः॥ अश्वगंधा तद्वच्चूर्णं मधुना सह योजयेत्॰ अस्य संततलेपेन मर्दनी
श्च प्रजायते॰ लिंगवृद्धिस्तनोत्सेधः स्तनंतिर्भुजकर्णयोः॥ शिलाश्वगंधसिंधूत्थछागीक्षीरे घृतं पचेत्॰ तल्लेपो
न्मर्दनाच्चैव लिंगवृद्धिः प्रजायते॰ इक्ष्वाकुणिकापत्ररसैः सूतं विमर्दयेत्॰ रक्तस्य करवीरस्य काष्ठेन च मुहुर्मु
हुः॥ तल्लिप्तलिंगसंभोगाद्योनिश्रावोतिजायते॰ ताम्बूलपत्रचर्णेन तु चूर्णं कुष्ठशिवाभवं॰ वारिणा लेपनं कुर्या
त्रात्रौ रोमध्वनाशनं॰ कुलत्थसक्तवः कुष्ठं मांसी चेद्भवजं रजः॥ सक्तवश्च एणकस्येव त्वग्धेयात्र कारयेत्॰ स्वेददौ
र्गंध्यनाशश्च जायते॥ स्यवधूनात॰ वचासौवर्चलं कुष्ठं रजन्यौ मरिचानि च॰ एतल्लेपप्रभावेन वशीकरणमुत्तमम्
अथ मूर्द्धतैलस्य विधानमाह॰ अभ्यंगः परिषेकश्च पिचुर्वस्तिरिति क्रमात्॰ मूर्द्धतैलं चतुर्द्धा स्याद्बलवच्च यथो
त्तरं॰ अभ्यंगाद्याः पूर्वमस्मिका सर्वतः स्मृताः॥ शिरोवस्तिविधिश्चात्र प्रोच्यते सुज्ञसंमतः॥ शिरोवस्तिश्च
र्मिणः स्याद्विमुखो द्वादशांगुलः॥ शिरःप्रमाणं तद्बध्वा मस्तके माषपिष्टकैः॥ संधिरोधं विधायाथ स्नेहैः कोष्णैः

प्रपूरयेत्॥ तावद्धार्यस्तु यावत्स्यान्नासानेत्रमुखस्रुतिः। वेदनोपशमो वापि मात्राणां वा सहस्रकं॥ विनाभोज
नमेवात्र शिरोबस्तिः प्रशस्यते॥ प्रयोज्यस्तु शिरोबस्तिः पंचसप्तात्मेव च॥ विमोच्याथ शिरस्तावस्तिं गृहीयाच्च समं
ततः॥ ऊर्ध्वकायं ततः कोष्णनीरैः स्नानं च कारयेत्॥ अनेन दुर्जया रोगा वातजा यांति संक्षयं॥ शिरःकंपादयस्तेन सर्वका
लेषु युज्यते॥ अथ कर्णपूरणं॥ स्वेदयेत्कर्णदेशं तु किंचित्तु पार्श्वशायिनः॥ मूत्रैः स्नेहैः रसैः कोष्णैस्ततः श्रोत्रं प्रपूरये
त्॥ कर्णं च पूरितं रक्षेच्छतं पंचशतानि च॥ सहस्रं वापि मात्राणां श्रोत्रकंठशिरोगदे॥ रुजावतः करावर्तं कुर्यात्क्वाटकयायु
तं॥ एषा मात्रा भवेदेका सर्वत्रैव विनिश्चयः॥ रसाद्यैः पूरणं कर्णे भोजनात्प्राक्प्रशस्यते॥ तैलाद्यैः पूरणं कर्णे भास्करेऽ
स्तमुपागते॥ तद्यथा॥ पीतार्कपत्रमाज्येन लिप्तं वह्नौ प्रतापयेत्॥ तद्रसः श्रवणे न्यस्तः कर्णशूलहरः परः॥ कर्णशूलातु
रे कोष्णं वस्तमूत्रं ससैंधवं॥ निक्षिपेत्तेन नश्यंति शूलपाकादिका रुजः॥ शृंगवेरं च मधुकं सैंधवं तिलमेव च॥ कटुस्नं
कर्णयोर्देयमेतद्धि वेदनापहं॥ कपित्थमातुलुंगाम्लशृंगवेररसैः शुभैः॥ सुखोष्णैः पूरयेत्कर्णं कर्णशूलोपशांतये॥ आ
कीकुरानप्यपिष्टास्तैलात्कान्लवणान्वितां॥ सन्निरुध्या स्नुहीकांडकोरिते ते[सहुडपत्र]दीवत्ते॥ पुटपाकक्रमेणात्तरसे
स्तस्य प्रपूरयेत्॥ सुखोष्णस्तेन नश्यंति कर्णपीडाः सुदारुणाः॥ मततः पंचमूल[काष्ठानि]काडान्यष्टांगुलानि च॥ क्षौ
मेनावस्त्रसंसिक्तं तैले नादीपयेत्ततः॥ यत्तैलं च्यवते तस्मात्सुखोष्णं तेन पूरयेत्॥ ज्ञेयं तद्दीपिकातैलं सद्योग

आर्द्रकं ८

आरग्वधशिरीषंजंबू अश्वत्थसर्जानां पंचकषायं चकषायं तेके

हानिर्बधिरतानां॰ स्वं स्याद्दीपिका तैलं कुष्ठो देवतरोस्तथा॰ तैलं स्योनाकमूलेन मंदेऽग्नौ परिपाचितं तद्धरेच्छ्रु॰ त्रिदोत्थं कर्ण-
शूलं च पूरणात्॰ कल्कक्वाथेन यष्ट्यादेः काकोलीमाषधान्यकैः। सूकरस्य वसा पक्वा कर्णनाद्यर्त्तिनाशिनी॰ स्वर्जिकामूलकं
शुष्कं हिंगु लसुना समन्वितं॰ शतधा प्याचेत्तैलं पक्वं शुक्ति चतुर्गुणं॰ व्रणं दंशूलबाधिर्यं श्रावं कर्णस्य नाशयेत्॰ अ-
पामार्गक्षारजले तत्क्वाथं कल्कितं क्षिपेत्॰ तत्र पक्वं जलं तैलं बाधिर्यं कर्णनादकं॰ शंबूकस्यैव मांसेन पचेत्तैलं तु सर्षपं॰
तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति॰ चूर्णं पंचकषायाणां कपित्थरसमेव च॰ कर्णस्रावे प्रशंसंति पूरणं मधु-
नासह॰ तिंदुकान्यभयालोध्र समंगामलकानि च॰ तेयाः पंचकषायास्तु कर्मणस्मिन्निग्वरैः॥ स्वर्जिकाचूर्णसं-
मिश्रं बीजपूररसं क्षिपेत्॰ कर्णस्रावे रुजो दाहस्तेन शांतिर्न संशयः। आम्रजंबूप्रवालानि मधूकस्य वटस्य च॰
एभिः संसाधितं तैलं हंति कर्णप्रशांतिकृत्॰ पूरितं हरितालेन गवां मूत्रयुतेन च॰ अपवा सार्षपं तैलं कर्णकी-
टहरं परं॰ खरसंशिग्रुमूलस्य स्वर्या वर्त्तरसं तथा॰ मूषणं चूर्णितं चैव कपिकच्छूजटारसं॰ तैलेकत्रं क्षिपेत्क-
र्णे कर्णकीटहरं परं॰ इतिश्रीशार्ङ्गधरे लेपकर्णपूरणविधिः॥ अथ शोणितस्रावविधिः॥ शोणितं स्रावयेज्जं-
तोरामयं प्रसमीक्ष्य च॰ प्रस्थं प्रस्थार्द्धिकं वापि प्रस्थार्द्धमथापि वा॰ शरत्काले स्वभावेन कुर्याद्रक्तश्रुतिं न-
रः॥ त्वग्दोषा ग्रंथिशोफाद्यानस्युरक्तश्रुते पि तत्॥ मधुरं वर्णतो रक्तमशीतो संतताप्गुरु॥ शोणितं स्नि

विस्रता विगंधा भूमिगुणः १ रागस्तेजोगुणः १ चलत्वमेकत्रस्थितिगुणो वातगुणः १ विलयः विलयो व्याकाशगुणः १

ग्धविस्रं स्याद्दाहश्चापि पित्तवत्॰ विस्रता द्रवता रागश्चलनं विलयस्तथा॰ भूम्यादिपंचभूतानामेते रक्तगुणाः
स्मृताः। रक्ते दुष्टे वेदनास्यास्यपाको दाहश्च जायते॰ रक्तमंडलता कंडूः शोथश्च पिडकोद्गमः। वक्त्रे रक्तांगनेत्रत्वं शिराणां पूर
णं तथा॰ गात्राणां गौरवं निद्रा मदो दाहश्च जायते॰ हीणे म्लमधुराकांक्षा मूर्च्छा च त्वचि रूक्षता॰ शैथिल्यं च शिराणां
स्याद्धाताद्युन्मार्गगामिता॰ अरुणं फेनिलं रूक्षं परुषं तनु शीघ्रगं॰ अस्कंदि शरूचीनिस्तोदि रक्तं स्याद्वातदूषितं॰ पित्तेन
पित्तं हरितं नीलं श्यावं च विस्रकं॰ अस्रगुरुसं माक्षिकाणां पिपीलिकानामनिष्टकं॰ शीतलं बहलं स्निग्धं गैरिकोदकसन्निभं
मांसपेशीप्रभं स्कंदि मंदगं कफदूषितं॰ द्विदोषदुष्टं संसृष्टं त्रिदुष्टं पूतिगंधकं॰ सर्वलक्षणसंयुक्तं कांजिकाभं च जाय
ते॰ विषदुष्टं भवेच्छ्यावं नासिकोन्मार्गगं तथा॰ विस्रं कांजिकसंकाशं सर्वकुष्ठकरं तथा॰ इंद्रगोपप्रभं ज्ञेयं प्रकृति

जंतुविशेषः

स्थमसंहितं॰ शोथो दाहांगपाके च रक्तवर्णो ऽसृजः स्रुतौ॰ वातरक्ते तथा कुष्ठे सपीडे दुर्जये ऽनिले॰ पाणिरोगश्ली
पदे चाविषदुष्टे च शोणिते॰ ग्रंथ्यर्बुदापचीजंतुद्रंनोगरक्ताधिमंथयोः॰ विदारीस्तन्यरोगेषु गात्राणां सादगौरवे॰ र
क्ताभिष्यंदतंद्रायां पूतिघ्राणास्यदेहके॰ यकृत्प्लीहविसर्पेषु विद्रधीपिडकोद्गमे॰ कर्णौष्ठघ्राणवक्त्राणां पाके दाहे शि
रोरुजे॰ उपदंशे रक्तपित्ते रक्तस्रावः प्रशस्यते॰ रघुरोगेषु शृंगैर्वा जलौकालाबुकैरपि॰ अपवापि शिरामोक्षैः कु
र्यादृक्स्रावणं नरः। न कुर्वीत शिरामोक्षं कृशस्यापि व्यवायिनः। क्लीबस्य भीरोर्गर्भिण्याः सूतिकापांडुरोगिणः॰ पं
चकर्मविशुद्धस्य पीतस्नेहस्य वार्शसां॰ सर्वांगशोथयुक्तानामुदरश्वासकासिनां॰ छर्दितीसारयुक्तानाम

तिस्विन्नतनोरपि॰ऊनषोडशवर्षस्य गतसप्ततिकस्य च॰ आयातःशुनिरक्तस्य शिरामोक्षो न शस्यते॰
एषां चात्ययिके रोगे जलौकाभिस्तु निर्हरेत्॰ तथा चैव यक्ष्माणां शिरामोक्षोपि शस्यते॰ गाढंगेन जलौ
काभिरलावूभिरपि त्रिधा॰ वातपित्तकफैर्दुष्टं शोणितं स्रावयेद्बुधः। द्विदोषाभ्यां तु संसृष्टं त्रिदोषैरपि दूषितं॰
शोणितं स्रावयेद्युक्त्या शिरामोक्षैः प्रैस्तथा॰ गच्छति शोणितं शृं॰गं दशांगुलमितं बलात्॰ जलौका हस्तमा
त्रं तु तुंबी च द्वादशांगुलं॰ पदमंगुलमात्रं तु शिरा सर्वांगशोधिनी॰ शीते निरंते मूर्छार्तिनिद्राभीतिमदश्र
मैः। भुक्तानां न स्रावयेद्रक्तं तथा विरामस्त्रसंगिनां॰ अप्रवर्तिनि रक्ते च कुष्ठत्रिकटुसैंधवैः। मर्द्दयेद्व्रणवक्त्रं
च तेन सम्यक्प्रवर्तते॰ तस्मान्न शीते नात्युष्णे नास्विन्ने नातितापिते॰ पीत्वा यवागूं तत्रस्य स्रावयेच्छो
णितं बुधः। अतिस्विन्नस्य काले तप्ते वाति शिराव्यधात्॰ अतिप्रवर्तते रक्तं तत्र कुर्यात्प्रतिक्रियां॰
अतिप्रवृत्ते रक्ते च लोध्रसर्जरसांजनैः। यवगोधूमचूर्णैर्वा धवधन्वनगैरिकैः। सर्पनिर्मोकचूर्णैर्वा भस्म
ना क्षौमवस्त्रयोः। अस्य व्रणस्य वध्वा चशीतैश्चोपचरेद्व्रणं॰ विशुद्ध्यैर्ध्व शिरां तावद्दहेत्क्षारेणवाग्निना॰
व्रणं कषायः संधत्ते रक्तं स्कंदयते हिमं॰ व्रणस्य पाचयेत्क्षारो दाहः संकोचयेच्छिरां॰ संयप्या दाहतः।वामा
दुःशोष्ये हन्त्यापकरस्यांगुष्ठमूलजां॰ दहेच्छिरां व्यत्ययेन वामांगुष्ठशिरां दहेत्॰ शिरादाहप्रभावेन मुच्छ

शोषः प्रणश्यति। विमूर्च्छा पार्श्विशूलेन जायतेऽग्नेः प्रदीपनं। संकुचंति यतस्तेन रसश्लेष्मवहाः शिराः॥ यदा वशि
ष्यते ह्रीहोः शिशोः संजायते रुजः। तदा तस्यां नदीहे संकुचंत्य स्रुजः शिराः॥ रक्ते दुष्टे विशिष्टेऽपि व्याधिर्नैव प्र
कुप्यति॥ अतस्तत्र व्यंसावशेषं रक्ते नाति क्रमोदितः॥ आध्मानं त्वेपकं तस्मात् तिमिरं शिरसो रुजं। पक्षाघातं श्वास
कासौ हिक्कादाहं पांडुतां। कुरुतेऽतिस्रुतं रक्तं मरणं वा करोति च। हतस्योत्सृजि रस्रुजा देहस्तेनैव धार्यते। विना
ते न व्रजेज्जीवो रक्ते दक्तमतो बुधः॥ शीतोपचारैः कुपिते स्रुते रक्ते समारुते। कोष्णेन सर्पिषा शोफं सव्यथं परिषे
चयेत्। क्षीणस्य शशोरभ्रहरिणच्छागमांसजः॥ रसः समुचितः पाने क्षीरं वा षष्टिकान्वितं। पीडाशांतिर्लघुत्वं च
व्याधेरुद्रेकसंक्षयः॥ मनस्वास्थ्यं भवेज्ज्ञात्वा सम्यग्विस्राविते स्रुजि। व्यायाममैथुनं क्रोधं शीतस्नानप्रवातकार।
एकाशनं दिवानिद्रां क्षाराम्लकटुभोजनं। शोकं वादमजीर्णं च त्यजेदाबलदर्शनात्। इति शार्ङ्गधरे शोणितस्रा
वविधिरध्यायः॥ अथ नेत्रप्रसादनकर्माणि सेकश्चाश्च्योतनं पिंडी विडालस्तर्पणं तथा। पुटपाकोंऽजनं
चेभिः कल्कैर्नेत्रमुपाचरेत्। सेकस्तु सूक्ष्मधाराभिः सर्वस्मिन्नयने हितं। मीलिताक्षस्य मर्त्यस्य प्रदे
यश्चतुरंगुलात्। स चापि स्नेहनो वातेरक्ते पित्ते च रोपणः॥ लेखनश्च कफे कार्यस्तस्य मात्राधुनोच्य
ते। षड्वाक्शतैः स्नेहनेषु चतुर्भिश्चैव रोपणे। वाक्शतैर्विबुधैः कार्यः सेको लेखनकर्मणि।

कार्यस्तु दिवसे सेको रात्रावत्यंतिके गदे० सयष्ट्या० एरंडत्वक्पत्रमूलैः शृतमाजं पयो हितं० सुखोष्णं सेवनं नेत्रे वा
ताभिष्यंदिशमनं० परिषेके हितं नेत्रे पयः कोष्णं ससैंधवं० रजनीदारुसिद्धं वा सैंधवेन समन्वितं० वाताभिष्यं
दिशमनं हितं मारुतप्प्यये० शुष्काक्षिपाके च हितमिदं सेवनं व्रणतप्या० स्यावरं मधुकं तुल्यं घृतभृष्टं सुचूर्णितं
छागक्षीरे स्थितं सेकात्पित्तरक्ताभिघातजित्० त्रिफलालोध्रयष्टीभिः शर्कराभद्रमुस्तकैः। पिष्टैः शीतांबुना
सेको रक्ताभिष्यंदनाशनः। लाक्षामधुकमंजिष्ठारोध्रकालानुसारिवा० पुंडरीकयुतः सेको रक्ताभिष्यं
दनाशनः। श्वेतलोध्रं घृते भृष्टं चूर्णितं पटविश्रुतं० उष्णांबुनाविमृतं सेकाच्छूलघ्न सेचनं० आश्च्यो
तनं० अथाश्च्योतनं कार्यं निशायां न कदाचन उन्मीलितेक्षि हस्ताद्व्यंगमध्ये विंदुभिर्द्व्यंगुलादितः० विंदवोष्टौ
लेखने देयाः स्नेहने दश विंदवः। रोपणे द्वादश प्रोक्तास्ते शीते कोष्णरूपिणः। उष्णे च शीतरूपाः स्युः सर्वत्रै
वमनिश्चयः। वाते तिक्तं तथा स्निग्धं पित्ते मधुरशीतलं० तिक्तोष्णरूक्षं च कफे क्रमादाश्च्योतनं हितं० आ
श्च्योतनानां सर्वेषां मात्रा स्याद्वाक्शतं हितं० निमेषोन्मेषणं पुंसामंगुल्या छोटिकापि च० गुर्वक्षरो
च्चारणं वा वाङ्मात्रा विश्रुता बुधैः। विल्वादिपंचमूलेन वृहत्यैरंडशिग्रुभिः। कोष्णमाश्च्योतने कोष्णं वा
ताभिष्यंदनाशनं० अथ पिष्टैर्निम्बपत्रैः स्वचं लोध्रस्य लेपयेत्० प्रताप्य वह्निनापि ध्मात द्रसो नेत्र

अंग्रुलि सेचो
रिके हूलाई
च लाई देना

पूरणात्॰ वातोत्थं रक्तपित्तोत्थमभिष्यंदं विनाशयेत्॰ त्रिफलाश्च्योतनं नेत्रे सर्वाभिष्यंदनाशनं॰ जात
रोगा विनश्यंति नवसंतिकृदाचनं॰ त्रिफलायाः कषायेण प्रातर्नयनधावनात्॰ स्त्रीस्तन्याश्च्योतनं ने
त्रे रक्तपित्तानिलार्त्तिजित्॰ क्षीरसर्पिर्घृतं वापि रक्तपित्तरुजं जयेत्॰ गव्यक्षीरोत्थितं सर्पिस्तर्पणं प्र
विधीयते॰ दृष्टिः प्रसादनं श्रेष्ठं तिमिरस्यापिकर्षणं॰ अथ पिडिका॰ पिंडिकावलिका प्रोक्ता वध्यतेवर्त्म
पक्ष्मके॥ नेत्राभिष्यंदियोग्यास्ता व्रणेष्वपि निबध्यते॰ अभिष्यंदाधिमंथे च संजातश्लेष्मसंचये॰ स्निग्धस्वि
न्नांतमांगस्य शिरस्तो हरेद्विरेचयेत्॰ अधिमंथेषु सर्वेषु ललाटे वेधयेच्छिरां॰ अशांते सर्वथा मंथेषु भ्रुवोरु
परि दाहयेत्॰ अभिष्यंदेषु सर्वेषु बध्नीयात्पिंडिकाबुधः॥ वाताभिष्यंदशांत्यर्थं स्निग्धोष्णा पिंडिका भवेत्॰ ए
रंडपत्रमूलत्वग्निर्मिता वातनाशिनी॰ पित्ताभिष्यंदनाशाय धात्रीपिंडी हिता भवेत्॰ महानिंबदलोध्र
तापिंडी वा पित्तनाशिनी॰ शिग्रुपत्रकृता पिंडी श्लेष्माभिष्यंदहारिणी॰ निंबपत्रकृता पिंडी श्लेष्मपित्तहरा
भवेत्॰ त्रिफला पिंडिका प्रोक्ता नाशाने श्लेष्मपित्तयोः॥ पिष्टा कांजिकतोयेन घृतभृष्टा च पिंडिका॰ लोध्र
स्य हरति क्षिप्रमभिष्यंदं म[illegible]॰ शुंठीनिंबदलैः पिंडी सुखोष्णा स्वल्पसैंधवं॰ धार्या चक्षुषि संयो
गात्शोथकंडूव्यथापहरी॰ अथ बिडालपद्धकः॥ बिडालको वहिर्लेपो नेत्रपक्ष्मविवर्जितः॥ तस्य मात्रा प

रसांजन १

रिञ्जेयाम्रुखलेपविधानवत्॰ सयथा॰ यष्टीगैरिकसिंधुत्थदार्वीतार्क्ष्यैः समांशकैः॥ जलपिष्टैर्वहिर्ले
पः सर्वनेत्रामयापहः॥ रसांजनेन वा लेपः पथ्या विश्वदलैरपि॰ वचाहरिद्राविश्वैर्वा घृताक्तैर्नागरैर्गै
रिकैः॥ इध्यास्तसैंधवंलोध्रं मधूच्छिष्टं घृतेद्घृते॰ पिष्टमंजनलेपाभ्यां सघोनेत्ररुजापहं॰ लोहस्यपात्रे संघृ
ष्टो निम्बफलोद्भवः॥ किंचिद्द्रुतो वहिर्लेपो नेत्रबाधां व्यपोहति॰ संघृष्टापि मरिचं केशराजस्वरसमर्दना
त्॰ लेपनाद्दर्शणं नाशं करोत्येष प्रयोगराट्॰ स्विन्नांभित्वा विनिःषीड्य भिन्नां मंजननामिकां॰ शि
लैलानतसिंधूत्थैः सक्षौद्रैः प्रतिसारयेत्॰ अथ तर्पणं॰ अथ तर्पणकं वच्मि नेत्रतृप्तिकरं परं॰ यद्रू
क्षं परिशुष्कं च नेत्रं कुटिलमाविलं॰ शीर्णपक्ष्मशिरोत्पातकृच्छ्रोन्मीलनसंयुतं॰ तिमिरार्जुनशुक्रार्धै रभि
ष्यंदाधिमंथकैः॥ शुष्काक्षिपाकशोथाध्यैर्युतं वातविपर्ययैः॥ तन्नेत्रं तर्पणे योज्यं नेत्ररोगविशारदैः॥
दुर्दिनात्युष्णशीतेषु चिंतायासंभ्रमेषु च॰ अशांतोपद्रवे चाक्ष्णि तर्पणं न प्रशस्यते॰ वातातपरजो
हीने देशे चोत्तानशायिनः॥ आधारौ माषचूर्णेन क्लिन्नेन परिमंडलौ॰ समौ दृढावसंबाधौ कर्तव्यौ
नेत्रकोशयोः॥ पूरयेद्घृतमंडेन विलीनेन सुखोदकैः॥ अपवा शतधौतेन सर्पिषाक्षीरजेन वा॰ निम
ग्नान्यक्षिपक्ष्माणि यावत्तस्तावदेव हि॰ पूरयेन्मीलिते नेत्रे तत उन्मीलयेज्जनैः॥ धारयेद्वर्त्मरो

रक्तामसंस्रनेत्रा
भ्यंतरे ५

गेषु वान्यत्राणां शतं बुधैः। स्वस्थे कफे संधिरोगे मात्रा पंचशतं स्मृतं० कफे च षट्शतं वर्त्मरोगे सप्तशतं मतं०
दृष्टिरोगे त्वष्टशतमधिमंथे सहस्रकं० सहस्रं वातरोगेषु धार्य्यमेवं हि तर्प्पणं० स्विन्नेन यवपिष्टेन स्नेहवी
रितं ततः॥ यथास्वं धूमपानेन कफमस्य विरेचयेत्० एकाहं वा त्र्यहं वापि पंचाहं चेष्यते परं० तर्पणे तृप्तिलिंगा
नि नेत्रस्यैतानि भावयेत्० सुखस्वप्नावबोधत्वं वैशद्यं वर्णपाटवं० निर्वृतिर्व्याधिशांतिश्च क्रियालाघवमेव च
अपथ्यात् गुरुस्निग्धं नेत्रं स्यादतितर्पितं० रूक्षमस्राविलं रुग्णं नेत्रं स्याद्धीनतर्पितं० रूक्षस्निग्धोप
चाराभ्यामेतयोः स्यात्प्रतिक्रिया० अथ पुटपाकः॥ अत ऊर्ध्वं प्रवक्ष्यामि पुटपाकप्रसाधनम्० द्वौ
बिल्वमात्रौ मांसस्य पिंडौ स्निग्धस्य पेषितौ० द्रव्याणां बिल्वमात्रं तु द्रवाणां कुडवो मतः॥ तदेकत्वं स
मालोड्य पत्रैः सुपरिवेष्टितं० पुटपाकेन तत्पक्वं गृह्णीयात्तद्रसं बुधः। तर्पणोक्तविधानेन यथावदव
चारयेत्० दृष्टिमध्ये निषेक्तव्यो नित्यमुत्तानशायिनः। स्नेहनो लेखनीयश्च रोपणश्चैव स त्रिधा०
हितः स्नेहोऽतिरूक्षस्य स्निग्धस्यापि हि लेखनः। दृष्टेर्बलार्थमितरः पित्तास्रग्व्रणवातनुत्० स्निग्ध
मांसवसामज्जामेदःस्वाद्वौषधैः कृतः॥ स्नेहनः पुटपाकस्तु धार्य्यो द्वे वाक्शते दश। जंघालानां यकृ
न्मांसैर्लेखनद्रव्यसंयुतैः॥ कृष्णलोहरजस्ताम्रशंखविद्रुमसिंधुजैः॥ समुद्रफेनकासीसस्रो

रसांजन१

तोजं दधिमस्तुभिः॥ लेखनो वा कृतं धार्यं तत्स्ये तावद्विधारणं० स्तन्यजांगलमध्वाज्यतिक्तकद्रव्यपाचितः॥
लेखनात्रिगुणं धार्यः प्रटपाकस्तु रोपणः॥ वितरेत्तर्पणे क्रातुक्रियाव्यापत्ति दर्शने० अथांजनं० अथ संपक्व
दोषस्य प्राप्तमंजनमाचरेत्० हेमंते शिशिरे चैव मध्याह्नेंजनमिष्यते० पूर्वाह्ने वापराह्ने वा ग्रीष्मे शरदि चेष्य
ते० वर्षास्वनभ्रे नात्युष्णे वसंते च सदैव हि० लेखनं रोपणं चैव तत्प्रसादनं तथांजनं० लेखनं क्षारतीक्ष्णाम्ल
रसैरंजनमुच्यते० कषायतिक्तकरसयुक् सस्नेहं रोपणं मतं० मधुरं स्नेहसंपन्नमंजनं तु प्रसादनं० गुटिकार
सचूर्णानि त्रिविधान्यंजनानि तु० कुर्यात् लोकपांगुल्यारीनानि च यथोत्तरं० श्रांते प्ररुदिते भीते पीतमद्ये
नवज्वरे० अजीर्णे वेगघाते च नांजनं तु प्रशस्यते० हरेणुमात्रां कुर्वीत वर्तिं तीक्ष्णांजने भिषक्० प्रमा
णं मध्यमे सार्धं द्विगुणं तु मृदौ भवेत्० रसक्रियानूत्तमा तु त्रिविडंगमिता हिता० मध्यमा द्विविडंगा स्याद्धी
ना त्वेकविडंगिका० वैरेचनिकचूर्णं च द्विशलाकं विधीयते० म्रदौ तु त्रिशलाकं स्यात्तत स्नेः स्नेहिकं
जने० मुखयोः कुटिला श्लक्ष्णा शलाका ष्टांगुलोन्मिता॥ अश्मजा धातुजा वा स्यात् कलायपरिमंड
ला॥४॥ ताम्रलोहाश्मसंजाता शलाका लेखने मता० सुवर्णरजतोद्भूता शलाका स्नेहने मता० अं
गुलीनां मृदुत्वेन कल्पिता रोपणे बुधैः॥ सायं प्रातर्वीजनं स्यात्तत्सहानेव कारयेत्० नातिशीतो ता

कुक्कुट ५

क्षवातान्त्रवेलायां संप्रशस्यते॰ हृत्समागाद्दधः कुर्य्यादपांगयावदंजनं॰ अपवर्त्ति॥ शंखनाभिर्विभीतस्यमज्जा
पथ्यामनः शिला॰ पिप्पली मरिचं कुष्ठं वचा चेति सम्मांशकं॰ छागीक्षीरेण संपेष्य वर्त्तिः कुर्य्याद्यवोन्मिता॰ हरे
णुमात्रां संघृष्य जलैः कुर्य्याद्दृष्यांजनं॰ तिमिरं मांसवृद्धिं च काचं पटलमर्बुदं॰ रात्र्यंधं वार्षिकं पुष्पं वर्त्तिश्चंद्रो
दयो जयेत्॰ चंद्रोदयवर्त्तिः॥ अपलेखनं॰ पथ्या शाठ [illegible] रसैर्बहुशः परिभाविता॰ करंजबीजवर्त्तिस्तु द्वेष्ठपुष्पं वि
नाशयेत्॰ लेखनी वर्त्तिः॥ समुद्रफेनसिंधूत्थशंखदन्तांउवल्कजे॥ शिग्रुबीजयुतैर्वर्त्तिः शुक्रादीन् शस्त्रवल्लि
खेत्॰ लेखनी वर्त्तिः॥ दन्तैर्दंतिवराहोष्ट्रगोऽश्वयाजखरोद्भवैः॥ शंखमुक्ताब्धिफेनेन मधुते स्सर्वैः सुचूर्णितैः
' दंतवर्त्तिः कृताश्वहृग्रा शुक्राणां नाशिनी स्मृता॰ लेखनी वर्त्तिः॥ नीलोत्पलं शिग्रुबीजं नागकेसरकं तथा॰
एतत्कल्कीकृता वर्त्ति रतिनिद्रां निवारयेत्॰ लेखनी वर्त्तिः॥ अपरोपणी॰ तिलपुष्पाण्यशीतिः स्युः ष
ष्टिः पिप्पलितंडुलाः॥ जात्याः कुसुमपंचाशन्मरिचानि च षोडश॥ सूक्ष्मपिष्टा जलैर्वर्त्तिः कृता कुसुमि
काभिधा॥ तिमिरार्जुनशुक्राणां नाशिनी मांसवृद्धिहृत्॰ एतस्याश्चांजने मात्रा प्रोक्ता सार्द्धहरेणुका
रोपणी कुसुमिका वर्त्तिः॥ रसांजनहरिद्रे द्वे मालती निम्बपल्लवाः॥ गोशकृद्रससंयुक्ता वर्त्तिर्नक्तांध्यना
शिनी॰ रोपणी वर्त्तिः॥ धात्र्यक्षपथ्याबीजानि एकद्वित्रिगुणानि तु॰ पिष्ट्वा वर्त्तिर्जलैः कुर्य्यादंजनं

गेरुर

छिन्नरोगयुक्तं॰ नेत्रस्रावं हरत्याशु वारक्तरुजां तथा॰ वेनलनीववर्त्तिः॥ अथ रसक्रिया॰ तुत्थमाक्षिकसिंधूत्थसिताशं-
खमनःशिला॰ गैरिकोदकफेनं च मरिचं चेति चूर्णयेत्॰ संयोज्य मधुना कुर्याद्रंजनार्थं रसक्रिया॰ वर्त्मरोगा-
र्मतिमिरकाचशुक्लहरी परा॰ लेखनी रसक्रिया॰ वटदुग्धेरण संयुक्तो मुख्यः कर्पूरजः कणः॥ न्हिप्रमंजन- (सन्निपात)
तो हंति कुसुमं तु द्विमासिकं॰ लेखनी रसक्रिया॰ न्हौशंखलाल संघृष्टैः मरिचैर्नेत्रमंजयेत्॰ अतिनिद्राशम-
यात्ति तमः सूर्योदयादिव॰ लेखनी रसक्रिया॰ जातीपुष्पं प्रवालं च मरिचं कटुकी वचा॰ सैंधवं वस्त-
मूत्रेण पिष्टं तं धूम्रमंजनं॰ शिरीषबीजगोमूत्रकृष्णामरिचसैंधवैः॥ अंजनं स्यात्प्रबोधाय सरसोम-
शिलावचैः॥ लेखनी रसक्रिया॰ अथ प्रसादनी रसक्रिया॰ दार्वीपटोलमधुकं सनिंबं पद्मकोत्प-
लं॰ प्रपौंडरीकं चैतानि पचेत्तोये चतुर्गुणे॰ विपाच्य पादशेषं तु ततस्तं नीत्वा पुनः पचेत्॰ शीते
तस्मिन्मधुसितां दद्यात्स्याद्रसक्रिया ततः॥ रसक्रियेयं दाहाश्रुरक्तरागरुजापहा॰ रोपणी रसक्रि-
या॰ रसांजनं सर्जरसो जातीपुष्पं मनःशिला॰ समुद्रफेनं लवणं गैरिकं मरिचानि च॰ एतत्समां-
शं मधुनापिष्टं प्रक्लिन्नवर्त्मनि॰ अंजनं क्लेद[illegible]हकंडूघ्नं पक्ष्मणां च प्ररोहणं॰ रोपणी रसक्रिया॰
गुरूचीस्वरसः कर्षः न्हौद्रं स्यान्माषकोन्मितं॰ सैंधवं क्षौद्रतुल्यं स्यात्सर्वमेकत्र मर्दयेत्॰ अंजये-
न्नयनं तेन पिल्ला~~[illegible]~~मितिमिरं जयेत्॰ काचं कंडूलिंगनाशं शुक्लकृष्णगतान्रोगान्॰ रोपणी रसक्रिया॰

समुद्रफेनं
शिरीषबीज ६
अथ मुखालेपनं
छागमूत्र ५

दुग्धेकं दूर्न्होऽन्देण नेत्रस्रावं च सर्पिषा। रुब्ध्यं तैलेन तिमिरं कांजि(के)न निशांध्यता। उजलेन वाजयेद्राशुभा स्कुरस्तिमिरं पप्पा।
शरपणी रसक्रिया। बब्बूलदलनिःक्वाथो लेहीभूतस्तदंजनात्। नेत्रस्रावो व्रजत्येव मधुयुक्तो न संशयः। शरपणी रसक्रिया।
त्रिजैलस्य फलं घृष्ट्वा पानीयेन नेत्रमंजनं॥ चक्षुस्रावः प्रशांत्यर्थं कार्यमेतन्महौषधं। शरपणीरसक्रिया। अपस्नेहनीरस
क्रिया। कतकस्य फलं घृष्ट्वा मधुना नेत्रमंजयेत्। ईषल्लकूर रसारितं स्कृतं नेत्रप्रसादनं। नेत्रप्रसादनी रसक्रिया। सर्पिः
न्हौऽहंचांजनं स्यात् शिंघानस्यभेषजं। स्नेहनीरसक्रिया। अपचूर्णांजनं। दन्तारातत्वक् शिलाकाचशंखचंदनसे
धवैः। द्रव्यै रंजनयोगोयं क्षव्यामीदि विलेखनं। लेखनं चूर्णांजनं। कणा छागयकृन्मध्ये पक्वा नेत्रयुगे जिता। अचिराद्
तिनक्तांध्यंत दृत्सन्हौऽद्मूषणं। लेखनमंजनं। शाणार्द्धं मरिचं द्वौ च पिप्पल्यर्णवफेनयोः। शाणार्द्धं सैंधवात् शाणा नव सौवी
रकांजनात्। पिष्टं तु सूक्ष्मं चित्रापा चूर्णांजनमिदं शुभं। कंडूकाचकफार्तानां मलानां च विशोधनं। लेखनमंजनं। शिलायां
रसकं पिष्ट्वा सम्यगाप्लाव्य वारिणा। गृहीयात्तज्जलं सर्वं त्यजेच्चूर्णमधो गतं। शुष्कं च तज्जलं सर्वं पर्पटीसन्निभं भवेत्
विचूर्ण्य भावयेत्सम्यक् त्रिवेलं त्रिफलारसैः। कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत्। अंजयेन्नयनं तेन सर्वदो
षहरं हितं। सर्वरोगहरं चूर्णं चक्षुषोः सुखकारि च। मदु चूर्णांजनं। अग्नितप्तं हि सौवीरं निषिंचेत् त्रिफलारसैः। सप्त
वेलं तथा स्तन्यैः स्त्रीणां सिक्तं विचूर्णितं। अंजयेत्तेन नयनं प्रत्यहं चक्षुषोऽहितं। सर्वान्नेत्रविकारांस्तु तन्यादेता
न्न संशयः। प्रसादनं चूर्णांजनं। त्रिफलाभृंगशुंठीनां रसेन तद्वच्च सर्पिषा। गोमूत्रमध्वजाक्षीरैः सिक्तो नागः प्रतापितः॥

कायफल३

खपरीया

प्रत्यंजनंतीक्ष्णातमेनेनेचूर्णप्रसादनं ॥ नयना ० कुंदेनागेकुतेतुल्यंसूतंविनिक्षिपेत् ० २

रसांजनं २

तद्दलाकारतस्त्येवसर्वान्नेत्रभवान्गदान् ० गतदोषमपेतासुपश्चंतंसम्यग्गमसि ० भल्लातल्याग्निपथ्यादोषेकार्यप्रत्यंजनं
ततः गतहानिर्वीतदोषेद्दिणाधावन्तंसंप्रयोजयेत् ० ह्रसांजनंतथातुल्यंसर्वमेकत्रचूर्णयेत्। दशांशंशोनकर्पूरंतस्मिन्चू
र्णंप्रदापयेत् ० एतत्प्रत्यंजनंनेत्रेगदजिन्नयनामृतम् ० नयनामृतप्रसादचूर्णांजनं ० जयपालेभवंमज्जाभावयेन्निंबु
कद्रवैः। एकविंशतिवेलंतुततोवर्तिंप्रकल्पयेत् ० मनुष्यलालयाघृष्ट्वातेनाचामयंजयेत् ० सर्पदष्टविषंजित्वासंजी
वयतिमानवम्। विषहरीवर्तिः। भुक्त्वापाणितलंघृष्ट्वाचक्षुषोर्यदिदीयते ० जातारोगाविनश्यंतितिमिराणितथै
वच ० आयुर्वेदसमुद्रस्यगूढार्थमणिसंचयः। ज्ञातःकेश्चिद्बुधैस्तैस्तुलताविविधसंहिता ० किंचिद्दर्शिततोञ्ज्ञी
ताह्यतेयंसंहितामया ० कृपाकदाचित्विन्हेषमस्याःकुर्वन्तुसाधवः १ विविधगदार्तिदरिद्रनाशनंयाहरिरम
णीवकरोतियोगरत्नैः। विलसतुशार्ङ्गधरस्यसंहितासाकविहृदयेषुसरोजनिर्मलेषु ॥ इतिश्रीशार्ङ्गधरस्व
कृताविरचितेप्रसादनकर्मविधिरध्यायः ॥ श्लोकसंख्या २६६० सम्वत् १८८७ शाके १७५२ आषाढशु
क्ल १४ चंद्रवासरे ॥ लि० नंदरामोपाध्या स्वार्थपरार्थवा ॥ श्री विश्वेश्वरोजयति ॥ रामरामरामराम ॥

जयपाल
बिजं २